त्रिरसौ त्यैक उचुरिति सूत्रार्थः। मृत्योः पाहि। रुक्म देवस ऐद्वयजुषि दैव्यो बृहस्पो। हे रुक्म। मृत्यो रकाले
मरणान्मां पाहि। हे द्वितीय रुक्म। विद्योत्। विद्युतः मां पाहि। विद्योततइति विद्योत्। द्युत दीप्तौ विद्धि स्मा
द्विपूर्वाद्विचु प्रत्यये गुणे रूपसिद्धिः। पंचम्या लुक्। विद्युसाताद्वदे सर्थः। एषोर्थो ब्राह्मणे। अथाधिरो
हति पारुण्यर्चा विरुणो वैदेवानां राज्ञा स्वयैवैनमेतद्देवतया भिषिंचति निषसाद धृतव्रतइति। अथ सु
वर्णरजतो रुक्मो व्युपास्यति मृत्योः पाहि विद्योत्पाहीति॥ का०॥ सर्व सुरभ्युन्मृदितं नैषैर भिषिंचत्सा
मुखादवस्त्वा वयन्प्रतिदिशं सर्वत्र सावित्रं मश्विनोः सरस्वत्या इंद्रस्येति प्रति मंत्रं वेतसपात्रस्थापि
तं वसाग्रहद्भ्रेषैः प्रतिदिशं स्थितो ध्वर्यु रामुः खा दवस्त्वा वयन्त्राज्ञासंदीस्थं यजमानमभिषिंचति
मंत्रत्रयेण। कीदृशं। सर्वैः सुरभिभिः चंदनकर्पूरकस्तूरी केसरादिभिरुद्वर्त्तितं। सावित्रं यजुर्देवस्य
त्वेति सर्वत्र त्रिष्वपि मंत्रेषु न्वेतीति सूत्रार्थः। देवस्य त्वा। सावित्रं यजुः। हे यजमान। सवितुर्देवादिप्र
र्वं प्राणितां प्रेरकस्य देवस्य प्रसवे आज्ञायां वर्त्तमानोहं अश्विनोर्बाहुभ्यां पूष्णो देवतायाहस्ताभ्यां

॥३९॥

रभ्यां त्वा त्वां अभिषिंचामी स्युत्तरकंडिकास्थेनान्वेतव्यं। स्वहस्तस्यान्यहस्तत्वोक्तिः प्राशस्त्यार्था। तथाहि श्रु
तेः। देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामिति सविता वै देवानां प्रसविता तेनस्मा
दाह देवस्यत्वा सवितुः प्रसव इत्यश्विनोर्बाहुभ्यामित्यश्विनाउ वै देवानामध्वर्यू तस्मादाहाश्विनोर्बा
हुभ्यामिति पूष्णो हस्ताभ्यामिति पूषा वै देवानां भागदुघः पाणिभ्यामुपनिधाता तस्मादाह पू
ष्णो हस्ताभ्यां न स्वाभ्यामिति।१। अश्विनोर्भैषज्येन। त्रीणि लिंगोक्तदेवत्यानि। आद्यं प्राजापत्या बृह
ती। द्वे गायत्र्यौ। हे यजमान अश्विनोर्भैषज्येन। वैद्यकर्मणा त्वामभिषिंचामि। किमर्थं। तेजसे कां
त्यै। ब्रह्मवर्चसाय च सर्वत्रास्खलितवेदवेदांगज्ञानजनिता कीर्तिर्ब्रह्मवर्चसं। तस्मै। ब्रह्महस्तिभ्यां व
र्चसइत्यर्थः (?)। सरस्वत्यै भैषज्येन। षष्ठ्यर्थे चतुर्थी। सरस्वत्या भिषक्कर्मणा च त्वं त्वामभिषिंचामि। कि
मर्थं। वीर्याय अन्नाद्याय च। वीर्यं सामर्थ्यं। अन्नाद्यमन्नस्य भक्षण (?) सामर्थ्यं। तस्मै। तथा। इंद्रस्येंद्रियेण
इंद्रियपाटवेन। सामर्थ्येन च। बलाय श्रियै सर्वसमर्थ्ये यशसे कीर्त्यै च त्वामभिषिंचामि॥२॥ को॰॥
यजमानमालभते कोसीति। आलभते स्पृशतीत्यर्थः। कोसि कतमोसि। प्राजापत्या गायत्र्यौ उष्णिग्गा
र्भौ। षट्सप्तैकादश्यो ष्णिग्गर्भेति वचनात्। हे यजमान। त्वं कः प्रजापतिरसि। प्रजापतिर्वै क इति श्रुतेः।
कतमः अस्यंतेकः कतमः श्रेष्ठः प्रजापतिरसि। प्रजापतयो हि पुराणे बहवोभिहितास्तेषु त्वं श्रेष्ठतमोसि।
कस्मै प्रजापतिपदप्राप्तये त्वामहमभिषिंचामीति शेषः। कायप्रजापतिरूपाय च त्वामभिषिंचा

॥३९॥

वानस्मि ॥ का० ॥ सुश्लोके स्याल भोद्धूयति । अध्वर्युणास्य स्तूयमानः सुश्लोकादिसंज्ञान्नरानाह्वयतीति हेत
सुश्लोक एहीति । शोभनः श्लोकः कीर्तिर्यस्य स तथा । श्लोकोयं नु सिपद्येचेति केल्याल । शोभनं मंगलं
द्रुयो यस्य स तथा तत्संबोधनं हे सुमंगल । त्वमेहि । सत्योऽविनश्वरी राजा यस्य स तथा । सत्येन राजत इति
वा सत्यराजा । तत्संबोधनं हे सत्यराजन् । त्वमेहि ॥ ३ ॥ का० ॥ अंगानि चालभते यथालिंगं शिरोम इति प्र
तिमंत्रं । यजमानो यथालिंगमात्मांगान्यालभते तद्रूपर्थः । शिरो मे श्रीरित्यारीत्यावयवदेवसंपर्वर्चं । तत्रेति
तीयायागायत्री । अंसा ह्यवसाना महापंक्तिः । त्रिष्टोऽनुष्टुभः । अभिषिक्तो यजमान इंद्ररूपः सन् आत्मानं
सर्वात्मकं पश्यन्नाह । मेम मशिरः शिरसि श्रीः शोभा कांतिर्वर्ततामिति सर्वत्राध्याहार्यं ॥ विस्तत्ति यस्य यः ।
मुखं प्राछत्राद्धिजन्या । मुखं मुखे यशो अस्तु । पवास्करं वा क्ष्यमस्तु । केशाः केशेषु श्मश्रूणि श्मश्रुलोम
सु च त्विषिर्दीप्तिरस्तु । इष्टिति जरामा अस्तु । राजते सो राजा । दीप्यमानो मे प्राणे मुखवायुरमृतमस्तु मर
णराहितो अस्तु । यद्वा अमृतं मरणहीनं यथा तथा मे प्राणो राजास्तु । चक्षुरिंद्रियं सम्यक् राजत इति सम्राट् स्वका
र्यपटु अस्तु । श्रोत्रमिंद्रियं विशेषेण राजते स्वकार्यं इति विराडस्तु ॥ ४ ॥ जिह्वा मे । मे जिह्वा । रसनेंद्रियं भद्रं क
ल्याणरूपास्तु । उत्तमरसमश्नातु । वाक् वागिंद्रियं । महः महते पूज्यते इति महः । पूज्यमानास्तु । सर्वप्राणि
प्रियेत्यर्थः । महः पूजापात्रमिति सस्मादसुन्प्रत्ययः । मनो मम अंतरिंद्रियं मन्युः क्रोधस्वरूपं शत्रून् प्रत्यस्तु । यद्वा ।

अप्रतिष्ठा नाधिष्ठेययोरन्के दोषप्रचारेणन्नाद्यवत्तेर्भिन्नं पायुरूपमिंद्रियं। अंगप्रकरणात् = ६

मनइंद्रियं मन्युर्ज्ञानात्मकमस्तु। मनु अवबोधने। स्मात् औणादिको युद्। तथा। भामः तातेसो भामः। बुद्धि
पदार्थः स्वराट् स्वतएव राजमानास्तु। ननु कुतश्चित्स्पृति हन्यतामित्यर्थः। यद्वा भामः क्रोधः। तद्गणपा
ठात्। शत्रुषु स्वराट् स्वतंत्रोस्तु। तदुक्तं। अवध्यकोपस्य विहंतुरापदो भवंति वश्याः स्वयमेव देहिनः इ
ति। अंगुलीः अंगुलयः। मोदाः आनंदरूपाः संतु। गुणगुणिनोरन्नेदोप। चारादेवं प्रयोगः। मुदहर्षे।
स्मात्प्रचा घञ्। अंगानि। प्रमोदाः प्रकृष्टहर्षाः संतु। अंगुल्यादीनां पुत्रादीनामव स्तुस्पर्शनेन संतो
षोस्त्वित्यर्थः। तथा। मेममभिंत्रं सहः अस्तु। सहते भिन्नवति शत्रूनिति सहः। रिपुनाशकोस्तु।।५।।बाहू
मेबलं। मे बाहू बलं अस्तु। बलवंतो स्तामित्यर्थः। यद्वा बाहू बाह्वोर्बलमस्तु। बाहुवोर्बलमितिते त्तिरी
यश्रुतेः। बलमिसन्नुवर्त्तते। इंद्रियं च बलं। स्वकार्यदक्षमस्तु। मे हस्तौ। कर्म। वीर्यवास्तु। सत्कर्मानुष्ठा
नेकुशलौ सामर्थ्यवंतौ वस्तामित्यर्थः। हस्तकरयोरूर्ध्वाधरत्वेन भेदो द्रष्टव्यः। तथा। मम आत्मा अं
तरात्मा। उरः हृदयं च। क्षत्रं। क्षतात्रायत इति क्षत्रं। त्राणकरमस्तु।।६।।पृष्ठीर्मे। मे मम पृष्ठीः पृष्ठप्रदे
।।४७।। शाः विभक्तिव्यत्ययः। राष्ट्रं देशः देशवत्सर्वाधारमस्तु। परस्पाद्यः परत्रचभयुज्यमानो वि नाप्लिव ।।४७।।
तिं बत्यर्थं स्थापयतीति व वनाल। मे मम उदरं अंसौ स्कंधौ ग्रीवाः ग्रीवाप्रदेशाः व्यस्यपा बहुवचनं। श्रोणी
कटिदेशौ। उरू सक्थिनी। अरत्नी हस्तदेशौ जानुनी च। सर्वतोन्यान्यंगानि च विशः प्रजाः। प्रजा वै सो

ध्याः सन्तु। यद्वा प्रजावन्म दधीनाः सन्तु। ज्ञितेंद्रियो भूयासमित्यर्थः॥७॥ नाभिर्मे। मेनाभिः चित्तं ज्ञानरूपम
स्तु। मेममपायुर्गुदेंद्रियं विज्ञानं विविधज्ञानजनितसंस्कारा धारमस्तु। यद्वा मेनाभिश्चित्तं विज्ञानं
पातीति पायुः चास्तु। चित्तं सामान्याज्ञानाधारं। विज्ञानं निश्चितज्ञानाधारं चास्त्वित्यर्थः। बुद्धिरहंका
रश्चित्तमित्येतिमनसो वृत्तित्रैदा॥ भसन्ता। स्त्री प्रजननं अपचितिः पूजा सरूपमस्तु। पुत्राद्युत्पादकत्वेन सु
भगमस्तु। यजमानपत्नी विषयमेतत्॥ मे आंडौ वृषणौ आनंदनं दौ स्तां। आनंदेन संभोगसुखेनानं
दतस्तौ तथा। तत्सुखसंस्कारौ भवतामित्यर्थः। पसः पसतेः स्पृशतिकर्मण इतिया स्कोक्तेः पसो लिंगं
भगः सुभगरूपमस्तु। सौभाग्यरूपं चास्तु। भग ऐश्वर्यं सौभाग्यं संपत्तिरिति भेदः। सर्वदा भोगासक्तं प्रज
फलवच्चास्त्विति तात्पर्यार्थः॥८॥ जंघाभ्यां पद्भ्यां। अहं जंघाभ्यां पद्भ्यां च धर्मः। धर्मरूपोस्मि। तीर्थयात्र
दक्षेयमित्यर्थः। उपलक्षणमेतत्। सर्वांगैर्धर्मरूपत्वादेवं विशांपते अपां राजा सन्प्रतिष्ठितोस्मि। धर्म
प्रतिष्ठितो हि राजा भवति॥ का०॥ कृष्णाजिने ऽवरोहति। प्रतिक्षत्र इति। आसंदीतो यजमानः कृष्णाजिन
उपविशतीत्यर्थः। प्रतिक्षत्रे प्रतितिष्ठामि। विश्वेदेवदैत्यं यजुः। अतिशक्वरी। अहं क्षत्रे क्षत्रियजातौ क्ष
त्राणे च प्रतितिष्ठामि। प्रतिष्ठायुक्तो भवामि। राष्ट्रे देशे अश्वेषु गोषु प्रतितिष्ठामीति प्रत्येकमन्वयः।
॥९॥ प्रत्यंगेषु। अंगेषु करपादाद्यवयवेषु। आत्मन्। आत्मनि चित्ते। प्राणेषु पंचसु। पुष्टे पुष्टौ। द्यावापृ

योः स्वर्गेह लोकयोर्यद् ज्योतिष्टोमादौ च प्रतितिष्ठामीति प्रत्येकमन्वयः। क्रियापदावृत्तिः फलानि त्रयपयो
तनार्था। द्रविणयद्देरयोः प्रतिष्ठा नाम। तद्धनीकरणं। गो अश्व प्रतिष्ठा। तद्भोगः। प्राणानां प्रतिष्ठा। नी
रोगत्वं। आत्मप्रतिष्ठा। निराधित्वं। पुष्टप्रतिष्ठा। धनपुत्रादिसमृद्धिः। द्यावापृथिव्योः प्रतिष्ठा। तनै
यलोकोक्तिः। यज्ञप्रतिष्ठा। सांगतत्करणं। वन्यविम्बः प्रत्युमान् निराधिव्याधिः श्रीमान् यज्ञकर्ता
चत्रवेयमिति श्रावः॥१०॥ का०॥ त्र्यादेवा इति त्रास्त्रांते जुहोति। द्वास्त्र समामेसमे वषट्कृते त्र्याद
तिकंडिकाद्यात्मकेन मंत्रेण त्रयस्त्रिंशांवसाग्रहं जुहोति इति सूत्रार्थः। त्र्यादेवाः। त्र्यवसाना देवदे
त्रसापंक्तिः। एकादशादेवाः दैवैर्वद्यमाणैः सहमामां अवंतु रक्षंतु। कीदृशाः। त्रयाः। त्रयोऽवयवा ये
षांते तथा। संख्याया अवयवे तयप्। द्वित्रिभ्यां तयस्यायज्वा। समयज्ञादेनुः। एकादश। त्रिगुणा इत्यर्थः। ते च
कतीति स्वयंस्तुतिराह। त्रयस्त्रिंशाः। तिसृभिरधिका त्रिंशत् संख्या येषां ते तथा। त्रयस्त्रिंशत् संख्या इ
त्यर्थः। कीदृशाः सुराधसः। राध इति धननाम। शोभनं राधो येषां ते तथा। तथा। बृहस्पतिपुरोहिताः
बृहस्पतिः पुरोहितो येषां ते तथा। तथा। सवितुः सर्वप्रेरकस्य देवस्य परब्रह्मणः सवे आज्ञायां वर्त ॥४१॥
॥४१॥ मानाः। देवाः दीप्यमानाः। क्रीडादिगुणैः। दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकां
तिगतिषु इति धातुः॥११॥ कथमवंतु तत्राह॥ प्रथमाद्वितीयैः। विश्वेदेवदेवत्यमाद्रीर्लिंगं यजुः।

प्रकृतिछंदः। प्रथमा देवाः द्वितीयैर्देवैः सहिताः मामवंतु। द्वितीयास्तृतीयैः सह। तृतीयाः सत्येन सह। स
त्यं यज्ञेन सह। यज्ञो यजुर्भिः सह। यजूंषि सामभिः सह। सामानि ऋग्भिः सह। ऋचः पुरोनुवाक्याभिः सह। पुरो
नुवाक्या याज्याभिः सह। याज्या वषट्कारैः सह। वषट्कारा आहुतिभिः सह। एवं त्रिप्रकारेण एकादश संख्यै
र्देवैरुत्तरोत्तरं पालिता आहुतयो मे मम कामान्निःशेषान्समर्द्धयंतु समृद्धान्कुर्वंतु। ऋधु वर्द्धने। स्माल्लेट्।
नुः। त्रेवनं त्रः तृप्तिकरत्वेन देवानां स्थानं हविरित्यर्थः। हुतमिदं स्वाहा। सुहुतमस्तु। एषो र्थो ब्राह्मणे
त्रया देवा एकादशेत्येतद्ब्राह्मणे तस्य सामर्थ्यं तु कथमेषा प्रतिष्ठा त्रया हि देवा एकादश त्रयस्त्रिंशाः सुराध
स इति त्रयस्त्रिंशम् इन्द्राग्निदेवा बृहस्पतिपुरोहिता इति ब्रह्म वै बृहस्पतिर्ब्रह्मपुरोहिता इत्येवैतदाह देवस्य
सवितुः सव इति देवेन सवित्रा प्रसूता इत्येवैतदाह देवा देवैरवंतु मेति देवा ह्येनं देवैरभिषिंचति प्रथ
मा द्वितीयैरिति प्रथमा ह्येतं द्वितीयैरभिषिंचंतीत्यादौ ॥१३॥ कात्या०॥ प्रत्यस्तं त्वं यजमानो लोमानि
प्रयतिरिति। यजमानो ग्रहणेषु प्रसक्तं उपवैह वषट्कं न ह्वयतीति सूत्रार्थः। लोमानि प्रयतिः। लो
म सर्गादि देवस्याऽनुष्टुप्। मम लोमानि। प्रयतिः प्रयतनं प्रयतिः प्रयत्नः। तद्रूपाणि संतु। तथा धर्मी
[illegible]स्यां। यथा मम लोमस्वपि प्रयत्नः। वेदाः प्रमाणं वदंतीति सामानाधिकरण्यं तथा। मे मम त्वक्।
आ [illegible] नीतिः आगतिस्त्वास्तु। आनमेति नतानि यस्या तथा। आगच्छंति नतानि यां प्रतीति सा त

था। स्वर्गे मदीयां त्वचं दृष्ट्वा भूतान्यागच्छंतु नमेतु चेत्यर्थः। तथा। मे मम मांसे। उपनतिः। उपपाद्यमानीयेनम
तिभूतानि यस्मिं स्तथा। स्त्रीलिंगं बा दसं। मम अस्थि। वसु धनं। तद्रूपमस्तु। मे मम मज्जा आनतिः आनमं
ति भूतानि यस्ये सा तथा। उपलक्षणमेतत्। तेन। मम सप्त धातवो पि जगद्वशीकरणसमर्थाः भूयासु
रिति स्वं प्रति प्रार्थनापरोयं मंत्रः। एवमर्थो ब्राह्मणे समाम्नायते। तद्रूपहेव मिश्रते सन्नमयति लोमा
नि मयति रिति प्रैववारेष लोकांश्च देवताश्च विनमयितः सौत्रामण्या ऽभिषिच्यते तदेत दुवां तस्मात्सा
न सुपद्यते तया हत्वेन एवसर्वतनुः सांगः संभवतीति। एषो नुवाकः परमात्मपरत्वेस्पष्टार्थः। तथाहि। हे
परमात्मन्। वैं दृत्रस्य हतादि स्यादि हिंसनात्त्रस्य त्राणस्य। नाभिः मुख्यं स्थानमसि। नाभिशब्देनात्र
यार्थः। मध्यं वै नाभिर्मध्यमन्नयमिति श्रुतेः। परित्राणाय साधूनां विनाशाय च दुष्कृतां। धर्मसंस्थापनार्था
य संभवामि युगे युगे इति भगवद्वचनात्। यत्र सा रक्षणत्त्राणं तत्राह। हस्ये त्वे योनिरसीति। हत्रस्य। जं
रतादि क्रियमाणस्य कष्टस्य हननस्यापि त्वमेव योनिः कारणं। तेषां निमित्तमात्रत्वात्। यद्यद्विभूतिमत्सत्वं
॥४२॥ श्रीमदूर्जितमेव वा। तत्तदेवावगच्छ त्वं मम तेजोंश संभवमिति स्मरणात्। एवं सति। अयं प्राकृतो जनः
त्वां मा हिंसीत्। अनुजनेन त्वदवज्ञां न कुर्यात्। सर्वं जगत्त्वत्स्वरूपं ज्ञात्वा सुखं प्राप्नोतु। एवं संप्रार्थ्य
स्तुतिः। स्वकार्यं प्रार्थयते। हे परात्मन्। अयं जनस्त्वद्भक्तिं करोतु। वामा वा। मा मां। मा हिंसीः। मा छिन्न

नाय। त्वदन्तर्जनेनेन मोक्षं कुरु। सर्वदा त्वामेव वन्दिष्यामी सर्धः। यतस्त्वं साम्राज्याय सर्वप्रतिपालनाय
सर्वैश्वर्याय च पस्पासु प्रजासु विषये निषसाद उपविष्टवानसि। कीदृशस्त्वं धृतव्रतः। त्रीष्ठ संरक्ष
णरूपव्रतवान्। वारयति दुःखानीति वरुणस्त्वामीयत्तेन न क्षानिति वा वरुणः। अ। सत्यमेव। यत
स्त्वं सुक्रतुः। क्रतुरितिसंकल्पनाम। सत्यसंकल्पः। अन्यजनवन्नवितथसंकल्प इत्यर्थः। अन्य
त्सर्वं यथायथं स्वबुध्योह्यं। वेदस्य कामधेनुरूपत्वात्। ये दाक्षिणात्याः वंतिपठितानि द्विजातिभिः।
तावंति हरिनामानि कीर्तितानि न संशयः इति श्रीनकोक्तेः। सर्वे वेदा यत्पदमामनंतीति कठश्रुतेः
वेदैश्च सर्वैरहमेव वेद्य इत्यादि भगवद्वचनाच्च परमात्मपरत्वं सर्ववेदस्य स्थले पल्लवेन॥१४॥देश
तः कालतश्चैव गुणतश्चैव सर्वतः। अनंतं सर्वलेखानाम इदं ध्येयं विष्णुमाश्रये॥ ॥इति श्रीमन्नागदेव
हाल्मजेन श्रीमदनंताचार्येण प्रथमन्नाखिनाविरचितायां वेदार्थप्रदीपिकायामेकविंशाध्यायस्यस
तमोनुवाकः॥ अध्यायः समाप्तः॥ अनंताचार्यवर्येण व्याख्यात छेकविंशकः। अध्यायः श्रीहरेः प्री
त्येऽस्तामपि विशेषतः॥ ७॥ ॥ ॥१॥ ॥ ॐ इषम्॥ देशतः कालतश्चैव गुणतश्चैव सर्वतः। अ
नंतं देवताध्यक्षं विष्णुं वंदे श्रियः पतिं। अत उत्तरमवभृथः प्रवर्तते॥ कात्यायनः॥ मासर
कुर्तं रूपयति यद्देवा इति। अवभृथेष्टिं रक्षायद्देवा इत्यादिना वरुण नोमुंचे [illegible] तेन मंत्रेण मा

सरकं नं जलेतारयति॥ यद्देवाः॥ अग्निवायुसूर्यदेवत्यास्तिस्रोऽनुष्टुभः कुष्माण्डीसंज्ञाः। दीव्यंतीति देवा दी-
प्यमानाः हे देवासः देवाः वयं यत् देवहेळनं देवानां हेडनमपराधं चकृम। कृतवंतः। करोतेर्लिट्। संहिता-
यां दीर्घश्छांदसः। अग्निः तस्मादेनसः पापात् मां अमुंचतु। अंतर्भावितण्यर्थत्वात् मोचयतु। पृथक्करोत्वि-
त्यर्थः। न केवलमेतदेव। किं तर्हि। विश्वात् विश्वस्मात् सर्वस्मात् अंहसः पापाच्च मुंचतु। उ से स्मादभा-
व आर्षः। देवास इत्यत्र आज्जसेरसुगिति असुक्। देवास इत्यत्र पादादित्वान्न सर्वनिघातत्वं। चकृमेत्य-
स्यामंत्रितपरत्वान्न तथात्वं॥१॥ यदि दिवा। यदि चेत्। दिवा अहनि। यदि चेन्नक्तं रात्रौ वयं एनांसि पा-
पानि चकृम। वायुस्तस्मादेनसो विश्वादंहसश्च मां मुंचतु॥२॥ यदि जाग्रत्। संभाव्यात् लुङ्। यदि जाग्र-
त् जाग्रदवस्थायां। यदि स्वप्ने स्वप्नावस्थायां एनांसि वयं चकृम। सूर्यस्तस्मादेनसो विश्वादंहसश्च
मां मुंचतु। ब्राह्मणे तु जाग्रत्स्वप्नशब्दौ मनुष्यपितृपरत्वेन व्याख्यातौ। यद्देवा देवहेळनमिति देव-
ता देवैनमेनसो मुंचतीति यदि दिवा यदि नक्तमिति यद्वा होरात्राभ्यामेनः करोति तस्मादेवैनं मुंचति
यदि जाग्रद्यदि स्वप्न इति मनुष्या वै जागरितं पितरः सुप्तं मनुष्यकिल्बिषाच्चैवैनं पितृकिल्बिषा-
च्च मुंचतीति। तदा मनुष्ययज्ञविषये पितृयज्ञे विषये यदेनश्चकृम तस्मान्मे चकृवित्यर्थः॥३॥ यद्ग्रा-
मे॥ लिंगोक्तदेवत्यं यजुः। ग्रामे अरण्ये प्रकाशाप्रकाशात्वेन सभायां पशुपातादिना। इंद्रिये इंद्रिय-

॥४५॥

विषये दुर्विषयग्रहणेन यदेनो वयं चकृमेति प्रत्येकमन्वयः। यच्छब्दस्य प्रतिवाक्यं श्रवणात् । तथा । अरे
अर्ये वैश्ये पस्वामिनि च । अर्यः स्वामिवैश्ययोरिति निपातनात् । यदेनश्चकृम । यदिति केवलमुक्त्वान्यद्विगं ।
आवयोः पत्नीयजमानयोर्मध्ये एकस्य पत्न्या वा मम वा अधि धर्मणि अधिकृते धर्मविषये । यदेनः ध
र्मलोपलक्षणं जातं । तस्यैनसः अवयजनं नाशनमसीति कुंभे प्रतिवचनं । धर्मनक्राब्दोनकारं नं ।
ध्रुवेण धर्मणा । देवास्ताभिर्धर्मिणीङ्स्यादौ दुर्नाल । अवपूर्वो यजतिर्नाशनार्थः ॥ किंच । हे वरुण
त्वा पाशः सर्वा देवताः अघ्न्याः अहननार्हाः प्रजनीयाः ॥ यदिति यद्बहुस्त्रवा दिनमाहुः । एवं सत्यपि । अस्मा
न्निष्प्राप्तिपरिहारार्थं कास्ता आपो देवताः । कश्च वरुणः इति यदशपामहे । आक्रुश्यामहे । तत्पाप
क्रूरे । वरुण सत्र विष्टुति लोपः ॥ ततस्तस्मादेनसः तास्मात्पापान्नो अस्मान्मुंचेमोचय ॥ ५० ॥ पूर्ववन्मन्त्र
पर्वदिसंदितेन अवभृथेत्यादि ओषधी रतापड्त्यं तेन मन्त्रेण सुराकुंभस्य जले मज्जनं कार्यं
स्पर्थः । अवभृथ निचुंपुण । अत्राप्यत्नीतिमन्त्रपाठे विनियोगः । यज्ञदेवत्या जगती प्रजापतिदृष्टा । अव
भृथीना निपातादप्रजले यत्र क्रियन्ते सोयमवभृथः । हे अवभृथ । अवभृथाख्य यज्ञ । त्वं निचुंपुण
नितरां मंदगच्छ ॥ चुपिर्मन्दगतौ । कीदृशः । निचेरुरसि । नितरां चरणशीलोसि । शीघ्रगमनोसि । त
थापि त्वं निचुंपुण । मंदं गच्छ । कुत इत्यत आह । देवैर्द्योतनात्मकैः अस्मदीयैरिंद्रियैः देवकृतं हविः

स्वामि षुदेवेषु कृतं हविर्यदेनः पापमस्ति । तत् अहमेव । यद्वि । अस्मिन् जले अवनीमहानस्मि । तथा मर्त्यैर्मनुष्ये
ष्वस्मदीयेर्कृ । खिगादिभिर्मर्त्यकृतं मर्त्येषु मनुष्येषु कृतमवज्ञारूपं यदेनोऽस्ति तदप्यवया । सेषमि स्म नुष्य
ज्ञनीयं । किंच । हे देवावभृथाख्य यज्ञ । पुरुराव्णः । रादाने इति धातुः । बहुविरुद्धफलदायिनो रिषो वधा
न्मां पाहि पालय । रिषतिर्हिंसार्थः । विरुद्धफलदायीव यस्त्वत्प्रसादादस्माकं मा भूदित्यर्थः । रातेर्वन्प्र
त्यये पुरुरावेति रूपं । यजेर्लुङि आत्मनेपदे उत्तमैकवचनम् अयक्षीति ॥ समुद्रे ते । अब्देवसाद्विपदाविर
ट् । हे अवभृथ । ते तव हृदयं समुद्रे समुद्रसमानास्वप्सु अंतर्मध्ये प्रतितिष्ठत्वितिशेषः । किंच । ओष
धीः विरक्ति व्यत्ययः । ओषधयः त्वां संविशंतु । उत अपि च आपोऽपि विशंतु ॥ का० ॥ सुमित्रिया न इत्यपे
ञ्जलिना दाय दुर्मित्र्या इति द्वेष्यं परिषिंचति द्वे विक्रमौ उदङ् ऊंखा । यजमानो व तथ प्रदेशाद्द्वौ विक्रमौ
दीच्यां गत्वा सुमित्र्या इति जलां जलिमादाय स्यादिति रिपुस्तां प्रति सिंचतीति सत्वार्थः ॥ सुमित्र्या । सं
अब्देवसाऽऽनुगती । हे अवभृथ । आपः अब्देवताः ओषधयश्च नोऽस्माकं सुमित्रियाः मित्रेषु साध्व्यः सं
किंच । एता एव तस्मै दुर्मित्र्याः । अमित्रत्वेनावस्थिताः संतु । सत्के । योऽस्मान्द्वेष्टि । यं च वयं द्वि

द्वेषं कुर्मः । उक्तोऽर्थो ब्राह्मणे । यद्ग्रामे यदरण्ये इति ग्रामे वा हारण्ये वैनः क्रियते तस्माद्देवेन मुंचतीयत्स
भायां यदिंद्रिय इति सभ्यादेवा देवेन मेनसो मुंचति यच्छूद्रे यदर्ये यदेनश्चकृमा वयं । यदेकस्याधि ध

ष्णितस्यावयजनमसीतिसर्वस्मादेवैनमेनसोमुंचतियदापोअघ्न्याइतिवरुणेतिन्नापामहेततोवरुणनो
मुंचेतिवरुण्यादेवैनमेनसोमुंचतीतिसाद्दे॥४॥का०॥अवभृथवल्नात्वावासोऽपासृनंद्रुपदादिवेति।
मलस्यावेवज्ञायापतीसौम्निकाविभृथेवन्नात्वाकर्मकालधृतवासोप्स्युज्झिपतइतिसूत्रार्थः।द्रुपदादिवमुमु
चानः।अब्देवसानुष्टुप्। आपोजलदेवताः एनसःपापान्मामांशुंधंतु पुनंतु।शुंधंतुशुंधितिधातुः।
पापात्पृथक्कुर्वंतु।तत्र दृष्टांतत्रयमाह। द्रुपदादिवेत्यादिना।पलाशीद्रुद्रुमागमाद्रुमस्मिन्धानाद्रुस्तरुस्त
न्मयंपदंद्रुपदं।पादुका।तस्मात्मुमुचानः पृथग्भवन्यथापादुकादोषेरसंबद्धोभवति।मुचेर्विकरण
नृ व्यत्ययेनभूगानविजृहोस्मादिदृवाँढिदूवेसूतेमुमुचानइतिरूपं।यथाच।स्विन्नःउष्मजन्यस्वेदयुक्तःप्रा
णीस्नातःसन्मलात्पृथग्भवति।यथाच।आज्यंपवित्रेणेवपूतं।इवशब्दोभिन्नक्रमः।तथाचमहाभाष्ये।
केषांशालीनामोदनः इति विग्रहेकिमोदनः शालीनामिस्यसमर्थसमासोयथातथात्रेतिज्ञेयं।पवित्रेणगा
लनवस्त्रेणपूतंगालितंआज्यंयथाकीटादिभ्यःपृथग्भवति।तथाआपोमांशुंधंत्विति पूर्वेणान्वयः।यद्वाद्रु
पदात्।वृक्षस्थानान्मुमुचानःफलपुष्पादिर्यथाविविक्तोभवतितथेति।उक्तोर्थोब्राह्मणेपि।द्रुपदादि
वमुमुचानइतिवासोऽपप्लावयति यथेषीकांमुंजाद्विवृहेदेवमेनंसर्वस्मात्पाप्मनोविवृहति तिस्ना
तितमेववापहतइति॥का०॥सामवदुत्क्रमणमागमनंच।सामवदिति।उद्वयमित्तिमंत्रेणभनेलो

।निष्क्रमणं। अपामसोमममृता अभूमेति मन्त्रपतां सर्वेषां त्रिपद्भूदेस्यागमनमितिसूत्रार्थः। उद्वयं। सूर्य
देवत्यानुष्टुप्प्रस्कण्वदृष्टा। वयं तमसः परि परितः तमसः तमो बहुलादस्माल्लोकात् उदगाम ऊ
द्गतवंतः निर्गताः। गमेर्लुङि छन्दसि लुप्ते मस्य नत्वे रूपसिद्धिः। कीदृशा वयं। उत्तरं उत्कृष्टतरं स्वः स्वर्गं।
स्वरव्ययं स्वर्गनाकेत्यभिधानात् पश्यंतः ईक्षमाणाः। किंच। देवत्रा। देवलोके। देवमनुष्येति सप्तम्यास्त्राप्र
त्ययः। सूर्यं देवं पश्यंतः संतः। कीदृशं सूर्यं। उत्तमं ज्योतिः। यद्वा सूर्यं पश्यंतो वयं उत्तमं ज्योतिः परं ब्रह्म
उदगन्म प्राप्ताः। ब्राह्मणेपि। उद्वयं तमसस्परीति पाप्मा वै तमः पाप्मानमेव तमोपहते स्वः पश्यंत उ
त्तरमिति अयं वै लोकोऽध्युत्तरोस्मिन्नेव लोके प्रतितिष्ठति देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तममि
ति स्वर्गो वै लोकः सूर्यो ज्योतिरुत्तमं स्वर्ग एव लोके ततः प्रतितिष्ठतीति॥ २१॥ क॰ ०॥ आहवनीयमुप
तिष्ठते ऽपो अद्येति। यजमान आहवनीयमुपतिष्ठते इत्यर्थः। अपो अद्य। अग्निदेवत्या पंक्तिः। हे
अग्ने। त्वं मां वर्चसा ब्रह्मवर्चसेन प्रजया पुत्रादिकया च धनेन च त्वं संसृज संयोजय। चकारद्वयं ॥४५॥
सर्वसमुच्चयार्थं। त्वं कं। यो ऽहं अद्य अपः अन्वचारिषं। अवभृथकर्मणा जलं अनु चरितवानस्मि
॥४५॥ प्राप्तोस्मि। चरतेर्लुङि उत्तमैकवचनं। किंच। यो ऽहं [illegible]रसेन जलस्य मधुररसेन समसृक्ष्महि।
संसृष्टोस्मि। सृजेर्लुङि व्यत्ययेनैकवचने बहुवचनं। यस्मादहं पयस्वान् उदकवान् सन् आगमं

आगतवानस्मि। गमेर्लुङ्। पुषादीति च्लेरङ्। एषो ऽर्थे ब्राह्मणे। अनेनेद्ममेत्याहवनीयमुपतिष्ठते ऽयो
ऽग्ने त्वद्वारिषीमि सपामेवरसमवरुन्धेरसेनसमस्ये त्वं हि सपामेवरसमात्मेयधत्तेपयस्वानग्न
आगमं तं मासंसृज वर्चसा प्रजया च धनेन च समिद्धमानुष्मास्तदृति॥ का०॥ एधो ऽसीति समिधमादा
याहवनीये ऽभ्यादधाति समिदसीति। यजमानेनोक्तिन्दोषः। एधो ऽस्येधिषीमहि। समिदुवत्सेपजुषी। हेस
मित्। त्वमेधः एधयति दीपयतीत्येधः। दीपिकासि। इन्धिदीप्तावित्यतः। असुन्। प्रत्ययांतः। वयंत्व
त्प्रसादात्। एधिषीमहि पुत्र धनादिभिर्वृद्धिं प्राप्नुयाम। एधतेराशीर्लिङ्। हे समिन्तां त्वं सम्यग्दीप्यत
इति समिदसि। तेजस्वास्सि। त्वत्संयोगेनेवाग्नेर्ज्वलनात्। अतो मय्यपि विषये तेजो धेहि। धारय॥ एषो ऽर्थो
ब्राह्मणे। एधो ऽस्येधिषीमहीति समिधमाधत्ते एधो ह वा अग्नेः समित्समिदसि तेजो ऽसि तेजो मयि धे
हीत्याहवनीये समिधमभ्यादधाति समिधमेवैतया समिन्धे स एनं समिद्धस्तेजसा समिन्धइति॥७॥
का०॥ जुहोति समावववर्तीति। यजमानः स्रुक्स्थितमाज्यं जुहोति समाववर्त्तीति मंत्रेण सप्तर्षः। समा
ववर्ति। आग्नेयी गायत्री। वैश्वानरज्योतिर्दृष्टिर्मंत्रं वा स्य यजुराग्नेयं। पृथिवी समाववर्ति। सूर
र्य ऽ। सूर्योपि समाववर्ति। अङ्गिरो वेणाह। विश्वम्। कृत्स्नमपि जगदिदं समाववर्त्ति। प्रवृत्तिकल्पमावर्त्त
तइत्यर्थः। अतो विश्वो ऽतवर्त्ति। रिवन्तोः हे हे अग्ने त्वत्प्रसादाद्वैश्वानरज्योतिर्भूयासं। विश्वेभ्योन

रेभ्यो हितत्वाद्वैश्वानरः परमात्मा तस्य ज्योतिरिव ज्योतिस्तत्तुल्यः संसारे यातायातरहितो भूयासं तत्
धाविभक्तम्नं हतः कामान् काम्यंत इति कामास्तान्मनोरथान्व्यश्नवै आप्नुयां भूः स्वाहा । तवनं भूः ।
सत्तास्वरूपं ब्रह्म । तस्मै स्वाहा । सुहुतमस्तु । भूरि सत्त्वाये । अहं वैश्वानरो भूत्वेति भगवद्वचनाद्वैश्वा
नरत्वाद्वः परमात्मपरः ॥ २ ॥ ॥ इति प्रथमोनुवाकः ॥ ॥ का० ॥ अभ्यादधामीति प्रस्तरं च माहवनीये ति
स्रः समिधो ऽभ्यादधाति । सो त्रामण्यादावादिस्थेष्टिं समाप्य त्रिपश्वर्थमाहवनीयदक्षिणाग्नीविह
त्याग्नत्वाधाने ब्रह्मवरणं च कृत्वा हे वनीये यजमानस्तिस्रः समिधः प्रस्तरं च मादधाति स्वर्थः । अ
भ्यादधामि । अग्निदेवत्यास्तिस्रोऽनुष्टुभ आश्वतराश्विदृष्टाः । हे अग्ने व्रतपते । व्रतस्य नियमस्य पा
लक । अहं समिधं त्वयि अभ्यादधामि जुहोमि । तेन समिदाधानेन दीक्षितः सन्नहं व्रतं नियमं श्र
द्धं आस्तिक्यबुद्धिं च उपैमि । प्राप्नोमि । वद्धयं परस्परं समुच्चयार्थं । अतस्त्वा । त्वां दूंधे । दीपयामि ।
॥ १ ॥ यत्र ब्रह्म । अहं पुण्यं पवित्रं तं लोकं प्रज्ञेषं । जानीयां । लोकमप्राप्तानां तल्लोकज्ञानं प्रकर्षेण न भव

॥४६॥ तीति हेतोः प्रशब्देन स्वलोकगमनं प्रार्थ्यते । तं कं । यत्र लोके । ब्रह्म ब्राह्मणजातिः । क्षत्रं क्षत्रजातिश्च ॥४६॥

तौ सह अवियोगेन चरतः तिष्ठतः । कीदृशौ ब्रह्मक्षत्रे । सम्यंचौ । लिंगव्यत्ययः । समीचीने । सम्यकू अं
चत इति तथा । यत्र च अग्निना सह देवाः तिष्ठंति । सराचारस्तताः [illegible] श्रिया विप्राश्च यंगछंति यत्र चा

ष्यादयो देवास्तिष्ठंति तं देवलोकं प्राप्नुयामिति तात्पर्यार्थः ॥२॥ यत्रेंद्रः। यत्र लोके इंद्रश्च वायुश्च द्वौ स
मं चो संगतौ मिथः ए अयं नौवासं हचरतः। यत्र च लोके। सेदिः। सदनं सदिः। आदगमेति चा त्किप्रत्ययः।
लिङ्खादे त्वा भ्यासलोपो। सुप्रत्ययकृते रूपसिद्धिः। अन्नाप्राप्तिजनितं दुःखं सेदिः। स यत्र न विद्यते।
षद्लृविसरणगत्यवसादनेष्विति धातुः। तं लोकं प्रद्ले ष मिति पूर्ववत्। प्रै पूर्वाज्ज्ञानातेः सि। बहुलं छं
दसीति सिप्रत्यय इडागमे च कृते रूपं॥३॥ अंशुं दुनाते। सुरादेवस्यानुष्टुप्। पूर्ववत्सुरा सं सर्ज ने विनियुक्ता।
हे सुरे ते तव। अंशुं दुनाति। सोमस्यांशुना भागेन सह पच्यतां। संयुज्यतां। पृच्वी संपर्के। तव परुः पर्व। सो
मस्य परुषा पर्वणा सह पच्यतां। तेतव गंधः अच्युतः अनष्टः रसश्च सोमं भवतु। तद्वंधरसानां मिलनं चे
न आलिंगतु। किमर्थं। मदाय। मत्ततायै हर्षायवा। सुरायुक्तः सोमः पीतो मदजनको भवति। अनयोर्म्न
योर्योगोस्त्विति अर्थः। प्रपालनपूरणयोः। अस्मादुसुनि। उरदित्वे परुरिति रूपं। परमेश्वरपरत्वं
स्पष्टं। यथा। हे हरे। तें शुना तेजसा मे अंशुर्जीव तेजः पच्यतामिति। ते पर्वणा उत्सवकालेन म
म पर्व पच्यतां। ते गंधः। कीर्तिर्व्यापकत्वाद्धारकत्वाच्च गंधशब्दवाच्या। सौमं सोम्यं सात्विकजनेन
भवतु। तथा। तव अच्युतः रसः प्रीतिश्चाविलुड्विति ॥४॥ सिंचंति परि। सुरादेवस्य ऽदेवत्यावा ऽनुष्टु
प। पूर्ववत्सुरादानेविनियुक्ता। बभ्रवे। बभ्रवे। बभ्रुवर्णाय। अवादेन ऽऽग्र्यंदसः। उकारांतपाठो वा।

षष्ठ्यर्थे चतुर्थी। तस्याः सुरायाः। मदे स्थितः सुरयामत्त इंद्रः। किंत्वः किं स्विदिति वदति। त्वं किं कस्य त्वमित्याद्य
न्यातिरस्कारकं वचो वदति। यां सुतां सिंचंति पात्रे ऋत्विजः। परिषिंचंति पय आदिभिः। उक्षितां वंतिग्रहेः।
पुनंति त्वगोवालैः पवित्रैर्हिरण्यादिभिस्तां सुरामिंद्रः पीत्वा नन्विलं वदतीति पर्वणान्वयः॥५॥ धाना
वंतं करंभिणं। इंद्रदेवस्य गायत्री विश्वामित्रदृष्टा। समाने त्र्यवृणाकर्मणि धानाहोमे विनियुक्ता। प्रातः स
वने पुरोडाशस्यापुरोनुवाक्यापि। हे इंद्र। त्वं। प्रातः प्रातः काले। नोस्माकं पुरोडाशं जुषस्व। कीदृशं। धा
नाभिर्घृतेपक्वतं धानावंतं। करंभोस्यास्तीति करंभिणं। अपूपा अस्य संतीत्यपूपवंतं। उक्थं शास्त्रमस्या
स्तीत्युक्थिनं। पुरोडाशाभिस्यप्याहारो विशेषणत्वात्कार्यः॥६॥ का०॥ एं अं बृहत्सामगायतेति। बृहदिंद्रा

अध्वर्युप्रेषितो ब्रह्मा इंद्रदेवतायां बृहतीछंदस्कायामृचि साम गायतीत्यर्थः॥ बृहदिंद्राय। इंद्रदे
वत्या बृहती नमेध पुरुषमेधक्रेषिर दृष्टा। हे मरुतः। मरुत्संबद्धा ऋत्विजः। इंद्राय इंद्रार्थं यूयं बृहत्सा
म गायत। गानं कुरुत। कीदृशं बृहत्। वृत्रहंतमं। वृत्रं पापमतिशयेन हंतीति वा वृत्रमसुरं अतिश ॥४७॥

॥४७॥ येन हंतीति वा वृत्रहंतमं। नौ यदृहस्पेति नुहुः। पुनः कीदृशं। येन साम गानेन ऋतं यज्ञं वर्द्धयंतीत्यृत
वृधो देवा ऋत्विजो वा देवाय इंद्राय ज्योतिः तेजः अजनयन्। उदपादयन्। ऋतावध इत्यत्र दीर्घश्छांद
सः। कीदृशं ज्योतिः। देवं दीप्यमानं। तथा जागृवीति जागृविजार गरणशीलं। अविनश्वरमित्यर्थः।
वृत्रहन्निति प्रातिपदिकांतनकारस्य स्वादिष्वसर्वनामस्थाने इति पदसंज्ञायां नलोपः प्रातिपदिकांतस्येति नलोपे प्राप्ते नलोपः सुप्स्वरसंज्ञा
तुग्विधिषु कृतीति नलोपस्यासिद्धत्वात् नाह्रस्य। नकारांतात् सरस्वच्छस्य तरप्तमपश्च सयस्य नुड् आगमश्च स्वति नुटः परावयवत्वेपि वार्तिका
त्सर्वांगत्वमिति विवेकः।

सामगानेनैन्द्रस्तेजस्वी जायत इत्यर्थः। एवोऽर्थे आत्मने। बृहत्सां गायति बृहत्साम्नां वा असावादित्यः श्रियां प्रति
ष्ठायां प्रतिष्ठित स्तपति बृहत्सामैवेनं मतं श्रियां प्रतिष्ठायां प्रतिष्ठापयतीति ॥७॥ का०॥ ब्रह्मानुमंत्र
णमध्वर्यो अद्रिभिरिति। ब्रह्मापयानुमंत्रयत इत्यर्थः। अध्वर्यो अद्रिभिः। ऐन्द्री गायत्री। हे अध्वर्यो त्वं।
सोमं पवित्रे वं बलमयो आनय॥ सिंच। कीदृशं। अद्रिभिः। अध्यावय पर्वै ग्रावभिः सुतं अभिषुतं। ततः
पुनीहि। गालय। किमर्थं। इंद्राय इंद्रस्य पातवे पानार्थं पातुमित्यर्थः। तुमर्थे तवे प्रत्ययः।८॥ ॥इति
द्वितीयोनुवाकः॥ ॥का०॥ त्रयस्त्रिंशं वसा ग्रहं गृह्णातियो भूतानामिति। यो भूतानां। आ स्वादिनी
नारायणीया ग्रहदेवसा कोंडिन्य दृष्टा पंक्तिः। यः परमात्मा। नारायणः। भूतानां जरायुजादिचतुर्विधानां
प्राणिनां अधिपतिः अधिकं पालकः। यस्मिन्परमात्मनि लोकाः भूरादयस्त्रयश्चतुर्दश वा अधिश्रिताः आश्रि
ताः। महान्सर्वोत्कृष्टोय्यः। महतः महत्तत्त्व प्रमुखस्य तत्त्वगणस्य। ईशे ईष्टे। नियंता भवति। लोपस्त आ
त्मनेपदेष्विति तलोपे लटि तङि प्रथमैकवचने ईशाए स्वर्य इत्यस्य रूपं। अधिगर्थदयेशां कर्मणीति क
र्मणि षष्ठी। हे ग्रह। अहं तेन परमात्मना। तदनुग्रहेण त्वा। त्वां गृह्णामि। मयि। निमित्तसप्तमी यां म
म स्वर्गादिनिमित्तं त्वां गृह्णामि। उक्तोर्थो ब्राह्मणे। सएष सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स
न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानेष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतु

॥ वधरणएषांलोकानामसंज्ञे दाये स्वादो ॥२॥ उपयामगृहीतोसि । यजुः सा मत्रिष्टुप् । एषतेयोनिः । यजुः प्रा
णापस्याबृहती । सादने विनियुक्ते ग्रहदेवसेढ्ढू यजुषी पूर्ववद्व्याख्येये ॥२॥ का० ॥ त्रोबम्हत्विजः प्राण मन्दं
जपयंति प्राणपामइति । सप्तास्त्र ग्रहहोमानंतरं त्रोबम्हत्विजः सर्वेवजिघ्रंति कंडिकाद्वयेनेत्यर्थः । प्रा
णपामे । ग्रहदेवसेढ्ढू अनुष्टुबुपरिष्टाद्बृहत्यौ । हे ग्रह त्वं मेमम प्राणान्यातीति प्राणपा असि । एवम
पानपाः । चक्षुष्पाः श्रोत्रपाश्चासीति व्याख्येयं । किंच । मेवाचः वागिंद्रियस्य विश्वं सर्वं भेषजं यस्मा
त्स विश्वभेषजस्त्वमसि । वागिंद्रियभेषजं तु अध्ययनाध्यापनजपादिप्रवर्त्तनं । किंच । मेमनसो वि
लायकः असि । विलाययति विषयेभ्यो निवर्त्य परमात्मविषये स्थापयतीति विलायकः । आत्मतृ
ग्रदश्वासीत्यर्थः । यद्वा । लीङ् श्लेषणे । विलाययति वस्तुराशिभिः सह श्लेषयतीति विलायकः । बाह्ये
द्रियैः सह आंतरेंद्रियं योजयसीत्यर्थः । परमात्मपरत्वेस्य स्पष्टमेव ॥३॥ अश्विन कृतस्यते । हे ग्रह । उपहू
त आज्ञप्तोहं । तेतव । कर्मणि षष्ठी । त्वां भक्षयामि । कीदृशस्यते । अश्विनकृतस्य । करोतिर्दर्श्नार्थः । ॥४८॥
॥४८५॥ स्वार्थेण । वध्यशावआर्षः । अश्विनाभ्यां कृतो दृष्टस्तस्य । सरस्वत्याकेलः सरस्वतिकृतस्तस्य सरस्व
अकारांत... तिकृतस्य । सरस्वत्यादृष्टस्य । ङ्यापोः संज्ञाछंदसोर्बहुलमिति सरस्वती शब्दस्य ह्रस्वः । सुष्ठुत्राय
ते रक्षतीति सुत्रामा । तेनेंद्रेण कृतस्य दृष्टस्य । उपहूतस्य । ऋत्विग्भिः कृतोपहवस्य ॥४॥ ॥इति

तृतीयोनुवाकः॥ ॥आध्वर्यवं समाप्तं। इत उत्तरं सौत्रामणिकं हौत्रमुच्यते॥ का०॥ समिद्धो इंद्र इत्यस्याप्रियः
प्रथमस्या समिद्ध इत्याद्याप्रिएकादश ऋचः प्रथमस्यां इत्यपरेः। आप्रियः प्रयाज्यायाज्या इसे
र्थः। समिद्ध इंद्रः। आंगिरसदृष्टा एकादश प्रियस्त्रिष्टुभः। तासां क्रमादेता देवताः। इध्मः १ तनूनपान्नरा
शंसो वा २ इळः ३ बर्हिः ४ द्वारः ५ उषानक्ता ६ दैव्या होतारो ७ तिस्रो देव्यः ८ त्वष्टा ९ वनस्पतिः १० स्वाहा
कृतय ११ इति देवताः। यथायोगमिंद्राद्विविशेषणत्वेन व्याख्येयाः। अनेनानुवाकेनेंद्रः स्तूयते। इंद्रः कर्त्ता
वृत्रं मेघं दैत्यं पाप्मानं वा अवधान्‌ हतं चकार। वृत्रो वै त्रासुरो मेघ इति केचन। पाप्मा वै वृत्रो यो भूते वीरयि
त्वाति छुति कल्याणात्कर्मणः साधोरिति श्रुतिरुक्तार्थे प्रमाणं। दुरो द्वाराणि च विवार। मेघस्य द्वारा
णि स्रोतांसि विवृतान्यकरोत्। दैत्यपक्षे तेत्पुरो द्वाराणि शून्यान्यकरोदिति ज्ञेयं। द्वारशब्दस्य छांद
सत्वेन संप्रसारणे दुर इति रूपं। कीदृश इंद्रः। समिद्धः संदीप्तः। उषसामनीके प्रातःकाले पुरोरु
वा अग्रे प्रसरं यादृश्यां पूर्वकृत पूर्वां दिशं करोतीति आदित्यात्मना पूर्वस्याः कर्त्ता। सर्वनाम्नो वृत्ति
मात्रे पुंवद्भावः। त्रिंशि देवैः त्रिंशताता। त्रयस्त्रिंशाद्देवैः सह वावृधानः वर्द्धमानः। वृधु वर्द्धन इत्यस्य वि
करण व्यत्ययेन शपः श्लुः। रुजादीनां दीर्घो भ्यासस्येति सत्यासदीर्घे वावृधान इति रूपं। वज्रबा
हुर्वज्रं बाहौ यस्य स वज्रपाणिः॥ अत्रेंद्रादिशब्देनैवानेवाच्यते। विरुद्धगुणसमभिव्याहारात्।

यस्मिन्विरूढगतयोप्यभिन्नांपतंतीतिपुराणात्॥ इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्यः सस्सुपर्णोगरुत्मान्॥ ए
कंसद्विप्राबहुधावदंत्यग्निंयमंमातरिश्वानमाहुरितिश्रुतेश्च। अष्टौवसवएकादशरुद्राद्वादशादित्यास्तप
कृश्विंद्रादिंद्रश्चैवप्रजापतिश्चत्रयस्त्रिंशोरितिश्रुत्युक्तास्त्रयस्त्रिंशद्देवाः। आसामाप्रीत्वेश्राग्निणेउक्तं।
अनुष्टुप्त्रिष्टुभश्चप्रियोभवंति। आगता अनुप्रैषाभवंतीत्यादेः॥१॥ नराशंसः प्रति। प्रकृष्टंचेतो
ज्ञानंयस्यसः प्रचेताः। कर्मादिस्वरूपज्ञातायजमानः तंइंद्रप्रतियजतिप्रस्यहंयजति। तंके। यईदृशः।
नराशंसः। नराणामृत्विजामाशंसः आशंसनंयस्यसतथा। यद्वानराअस्मिन्नासीनाःशंसंतीतियास्को
क्तेर्नराशंसोयज्ञस्तद्वान्। अग्नीआदित्योवितिवस्पर्धेउत्त्ययः। तथा। यज्ञस्यधामस्थानंप्रतिमिमा
नः। मिमीतेसोमिमानः। प्रतिगणयन्। एतावंतियज्ञस्थानानीतितानिस्पर्धः। एकः प्रतिशब्दोमिमा
नइत्यनेनसंबध्यते। परोयजतीत्यनेन। तथा। शूरः शौर्यवान्। तनूनपात्। तनोतिविस्तारयतीतिस
ष्टिमितितनूर्मरीचिविस्तारस्यनपात्पौत्रः कः। रूपपात्मजत्वात्। यद्वातनूंशरीरंनपातयतिरक्षयति।
जठराग्निरूपेणेतितनूनपादग्निस्तद्रूपः। यद्वातनोतिभोगानितितनूर्गौः तस्याः नपात्पौत्रंघृतं।
गोःपयोजायतेपयसआज्यमिति। तृतीयसात्। पातीतिपात्। तादृशोनभवतीत्यपात्। सोपिन
भवतीतिनपात्। द्वौनञौप्रकृतमर्थंस्यातिशयंगमयतइतिवचनादस्येतरस्तनूकइत्यर्थः। नभा

॥४९॥

॥४९॥

ण्वपादिसादिनानञो नुकारलोपाभावः। पुनः कीदृशः। गोभिः वपावान्। तृतीयाषष्ठ्यर्थे। गोवपायुक्तः।
मधुना। मधुरसेन तद्युतेन समंजन्। हवींषि म्रक्षयन्। संपृंचन्। अंजू व्यक्तिम्रक्षणकांतिगतिष्विति
धातोः शतृप्रत्ययः। तथा। हिरण्ययैः पश्वेवदान भृतेः। चंद्रमस्या ~~समेस्या~~ स्तीति चंद्री। चंद्रं वै सुवर्णमि
ति श्रुतेः। यद्वा हिरण्यैर्यज्वनस्थं द्रव्यमाह्लादयतीति चंद्री। चदि आह्लादने। नवितः। नुम। ग्र
हादित्वादिनि रूपं ।२। ईळितो देवैः। ईदृश इंद्र आयातु। आगच्छतु। कीदृशः। देवैरीडितः। स्तुतः। ई
ड स्तुतौ। हरिवान्। इंद्राश्वा हरय उच्यंते। हरी अश्वौ विद्येते यस्य स तथा। अभिष्टिः। अभितः समंतादि
ष्टिर्यागो यस्य स तथा। इलोपश्छांदसः। यद्वा। अभितस्त्यमत इष्टिः अभिष्टिः। स्तौतेरौणादिको डिप्रस
यः। आजुह्वानः। आह्वयति देवानिति आजुह्वानः। हविषा यजमानं दत्त हविर्निमित्तेन। यद्वा ऋत्विग्भिरूप
हूयमानत्वादाजुह्वानः। कर्मणि कर्तृप्रत्ययः। हविर्निमित्तं द्विजैराहूयमान इत्यर्थः। शर्द्धमानः। श
र्द्ध इति बलनाम। अतिबलायमानः। पुरं रिपुनगरं दारयतीति पुरंदरः। गोत्रभित्। गोत्रभिंद्
ध्यात्त्रायंते इति गोत्रा मेघास्तान्वृष्ट्यर्थं भिनत्तीति गोत्रभित्। गोत्रा गिरि। भिनत्तीति वा। गोत्रान्गो
त्रजान्मरुतोऽभिनत्तीति वा तथा। वज्रबाहुर्वज्रहस्तः। नोऽस्माकं यज्ञं उपजुषाणः उपसेवमानः। जुषी
प्रीतिसेवनयोरस्माच्छानच्।३। जुषाणो बर्हिः। इंद्रो नोऽस्माकं प्राचीनं प्राग्भवे सदन्मीसीदत्। सीदतु। तत्रा

स्वामित्वे ऽर्थः । लेटो ऽडाटौ । इतश्च लोप इतीकारलोपश्छान्दसः । कीदृशीः ईडः । हरिवान् । हरीः रूपे द्रो विद्यते यस्य
स्वामित्वेन स तथा । अश्ववान्वा । पृथिव्याः प्रदिवा । द्वितीयार्थे षष्ठी । पृथिवीं देवयजनं भूमिं प्रदिवा प्रदि
वान् । सुपां सुलुगित्यादिना सो डादेशः । उरुप्रथाः । प्रथनं प्रथः ख्यातिः । उरुर्विस्तीर्णं प्रथो यस्य स त
था । सजोषाः । जोषणं जोषः । जोषसा प्रीत्या सह स्थितः सजोषाः । संवृष्ट इत्यर्थः । प्रथ प्रख्याने । जुषी प्रीतौ ।
वेदिस्थं = आभ्यामसुन्प्रत्ययः । बर्हिर्जुषाणः सेवमानः । ज्ञानं चित्रापो लुक् । कीदृक् बर्हिः । प्रथमानं । प्रथते तत्प्रथ
मानं विस्तीर्णं । स्योनं । स्योनमिति सुखनाम । सुखरूपं । अदितेर्वसुभिष्ठ्य अक्तं मन्त्रितं । बर्हिरञ्जनमन्त्रे आ
दित्यादीनामुक्तत्वात्तैरक्तं ॥४॥ इदं दुरः । दुरः यज्ञगृहद्वाराणि इन्द्रं यन्तु । प्राप्नुवन्तु । विवाहात् । द्वारकाणि
नवन्तीति विपरीतत्वादिन्द्रो द्वाराणि यातीत्यर्थः । कीदृगिमं दं । वृषाणं । वर्षतीति वृषाणं । वर्षितारं । इन्द्रः च
धिष्ण्येव वर्षीयानिति श्रुतेः । कीदृश्यो दुरः । कवष्यः । कु शब्दे । कूयन्ते कुर्वन्ति वा जनाया सुतः कवष्यः ससु
षिराः । सच्छिद्रे एव नाबद्धे प्रसरालः । कैतैरोणादिकोऽष षप्रत्ययः । षिद्गौरादिभ्यश्चेति ङीष् । तेथा धावमानाः ॥५०॥
धावं तइति धावमानाः । आदरयुक्ताद्वत्यर्थः । तत्रोपमा । जनयः सुपत्न्य इति । जनाः साध्व्यः पत्न्यो यज्ञे
॥५०॥ सहाधिकारिण्यो जनयः । स्त्रिय इव । लुप्तोपमा । ता यथा धावमानाः पतिं प्राप्नुवन्ति तथा द्वार इन्द्रं प्राप्नुयुरि
त्यन्वयः । पत्सु नेयि ज्ञसंयोग इति ङीप् । जायते यासु स्वयमिति जनयो जायाः । किं कृत्वा इन्द्रं प्राप्य । द्वारो दे

वीः देव्यः अग्निनेतः सर्वत्र विश्रयंतां विवृता भवंतु। कीदृश्यो दूरः। सुवीराः शोभना वीरा आरूढांतगामि
नः के चित्तो यासु ता स्तथा। महोभिर्महत्त्वैः। उरुत्वेवर्या प्रथमानाः विस्तृताः। कीदृशमिंद्रं वीरं। शूरं।
द्रुमणि करोतीति कर्मविष्टानि यस्य धाय्या गर्य यजाया पस्यो यज्याति ॥५॥ उषासानक्ता बृहती। उषाश्च न
क्ता च उषासानक्ता। दिवसरात्र्यौ। समासे उषसः शब्दस्योष सादेशः। विकल्पः पूर्व सवर्णत्वं। इंद्रं यज्ञ
तः संगतं कुरुतः। इंद्रेण संगमं कुरुतमित्यर्थः। यजिरत्र संगतिकरणार्थः। कीदृशमिंद्रं। बृहंतं महां
तं। शूरं विक्रांतं। देवानां देवं पूज्यं। कीदृश्यौ उषासानक्ता। बृहती बृहत्यौ। पयस्वती उदकवत्यौ। अंव
रुयापस्त्वे वे धात। सुदुघे सुष्ठु नवं दुघ्यस्ते तथा। दुहः कप घश्चेति कप। घादेशश्च। पेशसा विचित्र रू
पेण संवयंती संग्रथयंत्यौ इंद्रं विचित्ररूपेण सुवर्णेन वा यो जयंत्यौ। तत्र दृष्टांतः। ततं तंतुं। तंतु शोभना
यथा पटार्थं ततं विस्तीर्णं तंतुं सूत्रजातं पेशसा रूपविशेषेण कश्चित् संवयते तथा। सुरुक्मे शोभनं रु
क्मं रोचनं कांतिर्ययोस्ते सुरुक्मे। अत्रोषासानक्ता शब्द वाच्यौ कश्चित्सूर्यापती। देवानां देवं इंद्रं परमे
श्वरं माग्यवता धिहलोक युजत इत्यर्थः उक्ते श्च यः प्रकाशस्याग्रकारत्वेन तयोस्त च्छब्दवाच्यत्वात्। पयस्व
ती पयस्वत्यौ। देवपूजार्थमुदक संबद्धौ। शोभनं पूजाफलं दुग्धस्ते। पेशसा उत्तमेन पूजोपकरणेन।

तद्वयो =

संवयंती संपन्ने। सुरुक्मे शोभनालंकारवत्यौ। तंतुं ततमिति कर्मविशेषणे। ज्ञानेनोतीति तंतुस्तं। ततं व्या
प्तं। इति।६॥ दैव्याभिमाना। अयं चाग्निरसौ च वायुर्मध्यमस्तौ दैव्या देवसंबंधिनौ होतारौ अग्निवायू प्रा
चीनं प्राच्यां दिशि प्रवर्तमानं यथाऽऽहवनीयाख्ये मधुना मधुरेण हविषा यज्ञं कृत्वा अद्य धातः वर्द्धयतः। वृधेर्ले
ट्। दाटाविस्याद्। कीदृशौ होतारौ। पुरुत्रा। बहुधाभिमाना अभिमानौ प्रयत्नं निर्मिमाणौ। मनुषः मानुषा
होतुः प्रथमा प्रथमौ। मनुष इति सकारांतः शब्दः। सुवाचा। शोभना वाग्ययोस्तौ तथा सुवाचौ। यज्ञस्य मू
र्द्धन् मूर्द्धनि। प्रधाने गेहे इंद्रवानाद्यानौ। स्थापयंतौ। सर्वत्र प्रथमाद्विवचनस्याकारादेशः। अत्रापि जा
यापतिपरत्वेन पदानि योज्यानि॥७॥ तिस्रो देवीः। सरस्वती इळा भारतीति तिस्रो देव्यः पयसा हविषा
कृत्वा तंतुं यज्ञं अच्छिन्नं। छेदने विघ्नेन रहितं। कुर्वंतिति शेषः। कीदृश्यः। वर्द्धमानाः पुष्टियुक्ताः। काश्च।
पत्नीः पत्न्यो यज्ञसहायाः। ज्ञानप्रा ज्ञायादिव इंद्रं जुषाणाः सेवमानाः। देवीः देव्यः। दीप्यमानाः। विश्वस्मि
न्सर्वत्र तूर्णं गच्छतीति विश्वतूर्तिः। सर्वगामिन्यः। देवी विश्वतूर्तिरिति द्वयं तिसॄणां विशेषणं। वचन ॥५१॥
॥५१॥ व्यत्ययः॥८॥ त्वष्टारमिति। त्वष्टा देवः यज्ञस्य मूर्द्धन् मूर्द्धनि शिरःस्थानीये आहवनीये देवान् इम
नक्तु तेजयतु। अंतर्गतण्यर्थोऽनक्तिः तत्र तेजनार्थः। धातूनामनेकार्थत्वात्। कीदृशस्त्वष्टा। य

मासेयन्नाश्विने। यन्नो रूपाय वावृष्णो से श्रे। वृषसेवते ऽस्मा त्तव। इंद्राय पुरूपाणि। वचनव्यत्ययात्पुरू।
बहुरूपं बलं दधत् धारयन्। तथा अपाकः। पाक इति प्रज्ञस्य नाम। न विद्यते प्रज्ञास्यो यस्मात् सो ऽ पाकः२
पाकः। नञो ऽस्यर्थानां बहुव्रीहिर्वा च्योवोत्तरपदलोपश्चेति समासः। तथा अचिष्टुः। अंचनशीलः। सर्व
वगतः। अंचु गति पूजनयोः अस्मादौणादिकः स्तु प्रत्यय इडागमश्च। न विद्यते ऽचिष्टु ऽधृष्टको यस्येति वा ऽ
चिष्टुः। न विद्यते चष्टा द्रष्टा यस्येति वा ऽ चिष्टुः चाक्षिङः स्तुप्रत्यये ऽ स्येकारः। वृषा। वर्षिता। वृषाणं वर्षि
तारमिंद्रं यजन्। भूरि बहुरेतो यस्य स भूरिरेताः। सर्वजनकः। त्वष्टा त्वक्षतेः करोत्यर्थस्येति यास्को
क्तः। ईदृशं त्वष्टा देवानां जयत्विसत्वयः। अत्र त्वष्टृशब्दः परमात्मपरः स्पष्टः। ९॥ वनस्पतिरवसृ
ष्टः। वनस्पतिर्यूपो देवः मधुना मधुररसेन घृतेन यज्ञं स्वदाति स्वदतु। लेट्। लेटोऽडाटौ। कीदृशो
वनस्पतिः अवसृष्टो ना। न इवार्थे। आज्ञप्त इव। पात्रैः कृत्वा त्मन्या। आत्मनामनसा। आत्मनि वा स्वयं
जन्। अर्थात् स्वयं युसे पो जयन्। आत्मन्शब्दस्य तृतीयायाः सुपां सुलुगित्यादिनायाडित्यादेशः। मंत्रे
ष्वाङ्यादेरात्मन इत्यात्मन आकारलोपः। तत्र दृष्टांतः नृमितान। शमिता इव। यथा शमिता प
शुसंज्ञपनकर्त्ता पात्रैः पशुं आत्मना संयोजयति पुनः कीदृशो वनस्पतिर्देवः। हव्येरिंद्रस्य जठर
मुखमुदरं पृणानः पणीते[illegible] पृणानः पूरयन्निति स्वधः। यद्वा वनानां पतिर्देवा रुद्रः। वनानां पतये नम

इति श्रुतेः। हव्यैः पुरोडाशादिभिः मधुना घृतेन च इंद्रस्य उपलक्षणत्वात्सर्वदेवानां जठरं पूरयन् सन्। शमि

तेव। सत्वगुणवत्त्वाच्छांतो विष्णुरिव। अवसृष्टेन। प्रीतत्वाद्दत्तेन हस्तेन इव इह अध्विना। इमं यज्ञं स्वदतु इति

॥१०॥ स्तोकानामिंदु। इंद्रः। स्वाहा देवाः। नामैकदेशेनाम्नो ग्रहणमिति न्यायात्स्वाहाकृतयो देवाश्च मादयंतां।

तर्पयंतु। मदतृप्ताविति धातुश्छुरादिः। किमुद्दिश्येत्यत आह। स्तोकानामिंदुं प्रति। स्तोका वपासंधिघृत

बिंदवः तत्संबंधी य इंदुः सोमरसस्तं प्रति तमुद्दिश्य। वपासंबंध्याज्यस्तोकेषु सोमत्वमारोप्यते। यद्वा

स्तोकानामिंदुं बिंदुमुद्दिश्य। बकारलोपश्छांदसः इंद्रः। ऋषभ धरस्येति वत्। कीदृश इंद्रः। शूरः। शौर्य

र्यवान्। वृषवृषा वर्षतीति वृषा यते वृषायते सौ वृषाय माणः। दीर्घ आर्षः। वृषत्व वृषसं स्पर्धिनः। प्रति

जेत्रिसर्थः। वृषत्वेव वर्षिता। तुराषाट्। तुरां त्वरां शीघ्रं सहते शत्रून् जित्वा वर्ततीति तुराषाट्। कीदृशाः स्वा

हाकृतयः। घृतप्रुषा घृतबिंदुना पिमनसा मोदमानाः मोदं तेते मोदमानाः। संतुष्टाः। नास्तिम्बतंमम

णं येषां ते अम्लानाः॥११॥ ॥इति चतुर्थोनुवाकः॥ ॥का०॥ याज्यानुवाक्याश्च वपापुरोळाशपशूनामा

याविंद्र इति। षड्चोयथाक्रमं ऐंद्रस्य पशोः वपापुरोळाशपशुयागानां याज्या पुरोनुवाक्याः। तद्यथा।

आया विंद्र इति वपायाः पुरोनुवाक्या। आ न इंद्रो दूरादिति याज्या। आन इंद्रो हरिभिरिति पशुपुरोळा

म०छ०: ॥५२॥

॥५२॥

न्द्रस्य पुरोनुवाक्या। त्रातारमिंद्रमिति याज्या। इंद्रः सुत्रामेति पशुयागस्य पुरोनुवाक्या। तस्यैव यमिति
याज्येति सूत्रार्थः। आ याहींद्र। सप्त त्रिष्टुभ ऐंद्र्यः। इंद्र नोऽस्मान् अवसे। अधितुं रक्षितुं उपसमीपे
आयातु। तुमर्थे सेसेनिति सेन प्रत्ययः। स इंद्रः यातः सन् सधमादस्तु। सहदेवैः सार्द्धं मादयति ध=
तृप्यतीति सहमात्। सहनोऽजनकर्त्ता स्तु। सधमादस्थयोश्छंदसीति सहस्य सधादेशः। तुरादमीदयतेः
क्विप। कीदृशः सः। भूरिः विक्रांतः। स्तुतोऽस्माभिः। वावधानो वर्द्धमानः। यस्येंद्रस्य पूर्वी स्तविषीः पू
र्वी स्तविष्यः। तविषीति बलनाम। पूर्वकृतानि बलानि वृत्रवधादीनि प्रतापरूपाणि। द्यौर्न। स्वर्ग इव
कथ्यंते। स्वर्गे यथा स्तूर्यंते। तथा यस्य पूर्वी स्तविष्यः स्तूयंत इत्यर्थः। सुपां सुलुगिति विभक्तिव्यत्य
यः। तविषीति बलनाम। तवतेर्वृद्धिकर्मण इति यास्कः। किंच। यश्चेंद्रः क्षत्रं दैत्रियजातिं तत्त्रा त्राणं वाऽ
स्मदीयं पुष्यात् पुष्यति। लेटोऽडाटौ। इतश्च लोपः परस्मैपदेष्विति कारलोपः। कीदृशं क्षत्रं। अभिभूति
अभिभवति शत्रूनिति अभिभूति। त्राणपक्षे ऽभितो भूतिरैश्वर्यं यस्मादिति तत्तथा॥१॥ आन इंद्र। इंद्र
नोऽस्मान्। दूरात् दूरप्रदेशात् द्युलोकात् आ यासत्। आयातु। यातेर्लेटोऽडाटाविति सिब्बहुलं
लेटीति सिप् प्रत्ययः। तथा। नोऽस्मान् आसात् अंतिकप्रदेशात् दपि। आसादिति अंतिकनाम। आयासत्।
आयातु। अत्र यासदिति क्रियाद्वाभ्यामाङ्भ्यां प्रत्येकं संबध्यते। आङः क्रियायोगित्वनियमात्। दूरा

समीपादस्मान्प्रत्यागच्छ इत्यर्थः। किं कर्तुं। अवसे। अवितुं। अस्मद्रक्षणं कर्तुं। कीदृगिंद्रः। अभिष्टिकृत्। अभिष्टिमभिलाषं करोतीत्यभिष्टिकृत्। मनोरथप्रदः। उग्रः ... ओजिष्ठेभिः। तेजस्वितमैर्बलैर्युक्त इति शेषः। बहुलं छंदसीति सत एवं। ओजोस्ति येषां ते ओजस्विनः। अतिशयेन ओजस्विन ओजिष्ठाः। इष्ठन्प्रत्ययः। विन्मतोर्लुगिति विन्प्रत्ययस्य लुक्। नृमणां पालको नृपतिः। वज्रं बाहो यस्येति वज्रबाहुः। तथा। संगे समत्सु पृतन्यून् तुर्वणिः। संगः समदिति द्वे संग्रामनामनी। संगे एकस्मिन्संग्रामे। समत्सु बहुष्वपि संग्रामेषु युगपदुपस्थितेषु सत्सु पृतन्यून् शत्रून् तुर्वणिः। तुर्वी हिंसायां। तूर्वतीति तुर्वणिः। हंता। औणादिको निप्रत्ययः। पृतनामिच्छंतीति पृतन्यंति। सुप आत्मनः क्यजिति क्यच्। परेकव्यधरप्टतनस्यार्चिलोप इत्यलोपः। ततः क्याच्छंदसीत्युप्रत्ययः। संग्रामे शत्रूनां हंतेत्यर्थः॥२॥ आ नइंद्रो हरिभिर्यातु। अच्छ अभि। हरिभिः अश्वैः साधनैः आयातु। किमर्थं। अवसे राधसे च। रक्षणाय धनाय सर्वसिद्धये च। अवरक्षणे। ॥५३॥

॥५३॥ राधसंसिद्धौ। आभ्यामसुन्। आगत्य च वज्री इंद्रो नोस्माकं इमं यज्ञमनु प्रति। वाजसातौ। अन्नसंभजनेनिमित्तेति ष्ठाति तिष्ठातु। लेट्। लेटोडाटौ। सातौ। वनषणसंभक्तौ इति धातुः क्तिन्प्रत्यये अनु

नासिकः स्यादिति दीर्घरूपं। अन्नं वै वाज इति श्रुतेर्वाजोन्नं। कीदृशा इंद्रः। मघवा। मघं धनमस्यास्ती
ति मघवा। मघवा बहुलमिति तृजंतः। धनवान्। विरप्शी। विविधं रपति लपतीति विरप्शी। अति
महान्। विरप्शिन्निति महन्नामसु पाठात्॥३॥ त्रातारमिंद्रं। गर्ग ६ ४ ह्ला त्रिष्टुप्। त्रातारं रक्षितारं दुष्टे
भ्यः। इंद्रं ह्वयामि। तथा अवितारं आनंदादि मनोरथ प्रदानेनापि प्रीणयितारं ह्वयामि। तथा हवे हवे
आह्वाने आह्वाने यज्ञे यज्ञे वा सुहवं सुखेन हूयत इति सुहवस्तं इंद्रं ह्वयामि। इति प्रत्येकं क्रियापद सं
बंध आदरार्थः। कीदृशमिंद्रं। शूरं। शक्नोति वैरिणो हंतुमिति शक्रस्तं। पुरुभिर्बहुभिर्यज्ञकर्तृभिः पु
रुषु यज्ञेषु वा हूयत इति पुरुहूतस्तं पुरुहूतं। इंद्रं परमैश्वर्यवंतं। एवं मया हूतो मघवा धनवान् इंद्रः
नोस्मभ्यं स्वस्ति। अव्ययं। परमकल्याणं धातु ददातु करोतु। विकरण व्यत्ययो भ्यास लोपो वा। अ
त्राद्याश्चत्वार इंद्रशब्दा विशेषणतां गताः। पंचमो विशेष्यः। तथा हि। शक्रं ह्वयाम्यहमिति संबंधः। कीदृ
शमिति सत आह। त्रातारमिंद्रं। आत्मत्राणे समर्थं। न तावदेव। किंतु अवितारमिंद्रं। तत्तत्त्राणेपि सम
र्थं। न केवलमेतावत्। अपितु हवे हवे तत्तत्कार्यं कर्तुं शूरमिंद्रं। अति समर्थं। न केवलमेतावत्।
अपितु पुरुहूतमिंद्रं। एककाले बहुभिर्बहुषु यज्ञेषु नानारूपाणि ग्रहीतुं समर्थं। स स्वस्ति नो धातु॥४॥

इंद्रः सुत्रामा। इंद्रः अवोभिः रक्षणैरन्नैर्वा सुमृळीकः शोभनसुखकारी भवतु। अस्माकमिति शेषः। मृड
सुखने। कीदृश इंद्रः। सुष्ठु त्रायते सो सुत्रामा। आतो मनिन्निति मनिन्। स्ववान्। स्वं धनं अतिशयि यस्य स
तथा। विश्वं सर्वं वेदो धनं यस्यासौ विश्ववेदाः। वेद इति धननाम। यद्वा विश्वं संपूर्णं वेदो वेदनं यस्य स
तथा। सर्वज्ञ इत्यर्थः। सर्वे द्वेष्टारो द्विषः शत्रून् बाधतां। गुण आर्षः। यद्वा द्वेषो दौर्भाग्यं बाधतां। द्विष आ
त्रीध्या। तादिस्यस्माद्ध स्वार्थे सुन्। अभयं च कृणोतु। करोतु। किंच। तत्तस्य वयं सुवीर्यस्य शोभनवीर्य धिनि
योगस्य धनस्य पतयः स्वामिनः स्याम। भवेम। यद्वा। शोभनाश्च ते वीराश्च सुवीराः पुत्रभ्रात्रादय
स्तेभ्यो हितं सुवीर्यं विषयजातं तस्य पतयः स्याम॥५॥ तस्य वयं। वयं तस्य इंद्रस्य सुमतौ शोभनबुद्धौ
स्तुतौ स्याम। भूयास्म भवेम। तत्कीर्त्यर्थं सुकर्माणि भवेम इत्यर्थः। अपि। अपि च भद्रे कल्याणकरे तस्य सौम
नसे सुमनसो भावे शोभनमनस्कत्वे स्याम। इंद्रो स्मत्कल्याणविषयं स्वं मनः करोत्वित्यर्थः। देवान्भा
वयतानेन ते देवा भावयंतु वः। परस्परं भावयंतः श्रेयः परमवाप्स्यथेति भगवद्वचनात्। कीदृशस्यें ॥५४॥
॥५४॥ द्रस्य यज्ञियस्य यज्ञप्रियस्य। एवं मिथो भावनेन संतुष्टः सुत्रामा सुरक्षकः स्ववान् धनवान् स इंद्रः अस्मे
अस्मत्तः। आराच्चित् दूरादपि वर्तमानं कालांतरं भावि द्वेषो दौर्भाग्यं सनुतः अंतर्हितं कृत्वा युयोतु पृ
थक्करोतु। यु पृथग्भावे। विकरणव्यत्ययः। सनुतरिति निर्णीतान्तर्हितयोर्नाम॥६॥ आमंद्रैः। विश्वामित्र

दृष्टा बृहती। तृतीयः पादो द्वादशवर्णः। अन्ये त्रयः पादा अष्टवर्णाः। अस्या अग्निमाध्याश्वद्वयोर्विनियोगा
भावः। तथाप्यपनादोऽपि नियुक्तः वाध्याख्यायते। हे इंद्र त्वं हरिभिरश्वैरायाहि। कीदृशैः। मंद्रैः गंभीरैः।
मयूरस्यव रोमाणि येषां ते मयूररोमाणस्तैर्मयूररोमभिः मयूरसमवर्णैः। किंच केचिद्दुष्टाः आग
च्छंतं त्वां मा नियमन्। मा नियच्छंतु मा प्रतिबध्नंतु। यम उपरमे। माङ्योगे दटो लोपः। तत्र दृष्टांतः। पा
शिनः पाशावंतः व्याधाः विं पक्षिणमिव। न इवार्थे। यथा पाशिनः पक्षिणं बध्नंति तथा त्वां प्रतिबध्नंति
त्यर्थः। अथ येन्ये परिपंथिनो भवेयुः तान् अति अतिक्रम्य इहि आगच्छ। किमिव। धन्वेव। धन्वा निरु
दकदेशः। यथा पांथो मरुदेशमतिक्रम्याशु पंथं गच्छति। विभक्तिव्यत्ययः। यद्वा धन्वेव धनुष्मान् वीर
इव। तथा तानतिक्रम्य त्वं। यद्वा इमां प्रत्यागच्छेति भावः॥ ७॥ एवेदिंद्रं। वसिष्ठ ऋषिः। इंद्रो देवता। त्रिष्टुप्।
वसिष्ठा सः। आज्जसेरसुगिसस्तुगागमः। वसिष्ठाः वसिष्ठस्यापत्यानि मुनयः अर्कैर्मंत्रैः स
मिद्धिर्वा। एव इत्। एवमेव इंद्रं अभ्यर्चंति सम्यक् पूजयंति। अर्को मंत्रो भवति पदेनार्चंतरर्क मन्त्रं
भवत्यर्चतिर्न तान्यर्को देवो भवति सर्वतः कद्वु किमर्केनेति यास्कोक्तेः। कीदृशमिंद्रं। वृषणं वर्षितारं।
वज्रं बाहौ यस्य वज्रबाहुस्तं। वसिष्ठैरर्च्यमानः स इंद्रः स्तुतः सन्। वीरा विपंते यत्र तद्वीरवत्। पुत्र
युक्तं। गावो विपंते यत्र तद्गोमत्। स्वर्गपत्रुगास्त्रसहितं अर्थाद्धनं नोस्मभ्यं धातु दधातु ददातु

पोषयत्वुवा। पुष्यात्रप्यारणपोषणयो:। विकरणव्यत्ययः। एवंपादत्रयेणेंद्रं स्तुत्वात्रत्विजः प्रत्याह। हे त्रत्विजो
यूयं स्वस्तिभिरविनाशैः कल्याणैः सदा सर्वदा नो ऽस्मान्पातरक्षत। पारक्षणे। लोण्मध्यमे बहुवचने। स्वस्ति
नाबाद्यभिकारांत:॥ ८॥ ॥ इति पंचमोनुवाकः॥ ॥ क॰ ०॥ आश्विनयश्वसमिद्धो अग्निरश्विनेति। समि
द्धइत्याद्यादश आनुष्टुभः ऋचः चकारात्रिपश्वो: प्रयाजयाज्या इति सूत्रार्थः। समिद्धो अग्निरश्विना वि
दर्भिदृष्टा अश्विसरस्वतींद्रदेवत्या आप्रीसंज्ञा द्वादशानुष्टुभः। अश्विनाव घर्मदेवानामितिश्रुते
स्तोप्रति होता प्राह। हे अश्विना अश्विनो। सुपांसुलुगिति आदिनाद्विवचनस्याकारादेश:। अग्निः
समिद्धोदीप्तोस्ति। हविरास्वादिन इत्यर्थः। तथा। घर्मः प्रवर्ग्यः। तदु इति पपात तस्यातिस्वा
सावदिप्तो नवतघह इति स्यपतत्त स्माद्धर्मो घयत्प्रावइयत तस्मात्सर्वं वर्ग्य इति श्रुत्या निर्वचनाद्धर्म
शब्दः प्रवर्ग्यपरः। सः ततोस्ति। तथा। विराट् विशेषेण राजमानः अर्थात्सोमः सुतोऽभिषुतोस्ति।
किंच। धिनोतिप्रीणातीति धेनुः। धिविप्रीणने। अस्मादौणादिको नुप्रत्ययः। वलोपोगुणश्च। प्रीण ॥५५॥
मधुरं घृतं धिन्वीसरस्वती। इह यज्ञे सोमं दुहे। दुग्धे। दुह प्रपूरणे ऽस्मात्लटि त इति प्रथमैकवचने टित आत्मनेप
दानांटेरे इति टेरेत्वे लोपस्तआत्मनेपदेष्विति तलोपे च सति दुहे इति रूपं। कीदृशं सोमं। शुक्रं शु
॥५५॥ क्लं मधुं। इंद्रियं। इंद्राय हितं बलकरं। एवं यज्ञे सोमस्यास्तित्वे युवां नो ऽस्मानागच्छतमिति भावः॥ १॥ तन्न

पा भिषजा। उक्ता अश्विना उक्तौ अश्विनौ सरस्वती च। मध्वा मधुना। आगमस्यानित्यत्वान्नुमागमः। रसेन।
रजांसि लोकान्। रज इति लोकनाम। दुहंति। पूरयंति। पूर्वकृच्चिदुहेइत्यस्य वचनव्यत्ययेनेहानुषंगः।
लोका रजांस्युच्यंत इति यास्को निरुक्त। कीदृशावश्विनौ। तनूपा। तनूपौ। शरीराणां रक्षितारौ वैद्यत्वा
त्। तदेवाह। भिषजा। भिषजौ वैद्यौ। वसति। सुते। सोमेभिषुते सति। किंच। अश्विसरस्वत्यः स्वसः इंद्राय
इंद्रियं वीर्यकरं पथिभिर्यज्ञमार्गैर्वहान्। वहंति। इतश्च लोपः परस्मैपदेष्विति इकारलोपे आटि च कृते व
हानिति रूपं। २। इंद्रायेंदुं। सरस्वती नराशंसेन नग्नहुना। इंद्राय इंद्रार्थमिंदुं सोमं नग्नहुं पूर्वोक्तं सु
राकंदं च अधादिति वचनपरिणामेन योजना। धृतवती। किंच। भिषजा अश्विना। भिषजौ अश्वि
नौ सुते। सोमेभिषुते सति मधुमनोहरं भेषजमौषधं अधातां। धारितवंतौ। ३। आ इंद्रुः अश्विना सर
स्वती। आह्वयतइत्याह्वा ना। अर्थादिंद्रमाह्वयंती सरस्वती। अश्विनौ च एते इंद्राय इंद्रियाणि वसूनि
दीनि संदधुः। वीर्यसामर्थ्यं च संदधुः। किंच। इडाभिः पशुभिः। पश्वो वा इडेति श्रुतेः। यद्वा इडा
भिः स्तुत्याभिर्वाग्भिः सह इषमन्नं। ऊर्जं बलं। हे इंद्र रयिं द्रव्यादि रूपं। धनं च प्रत्येकं संदधुः। ४। अ
श्विना नमुचेः। अश्विना अश्विनौ। परिस्रुता सुरया सह सुतमभिषुतं शुक्रं शुद्धं सोमं नमुचेरसुरात्स
काशात्। आभरत्। आहरतां। वचनव्यत्ययः। हे [illegible]। तथा सरस्वती अपि तं सोमं

बर्हिषास्तरणार्थेन सह इंद्रायेंद्रस्य पातवे पानार्थं आजहरन् । आहरन् । तमर्थे तवे प्रत्ययः ।५। कुवष्योन ।
अस्यामृचि त्रयो नकाराश्चकारार्थाः । अश्विभ्यां सहिता सरस्वती च । इंद्रो न । इंद्रश्चैते उ रोदसी
द्यावापृथिव्यौ । कामो दुहे दुहंति । द्विकर्मकोयं । दुहियाच्चधिरुधिप्रछी इति वचनात् । यो दुदोह धरामन्त
मितिवत् । द्यावापृथिवीभ्यां सकाशात् कामां दुहंतीत्यर्थः । तथा । तएव द्वारो द्वारो देव्यश्च कामान्दुहे दुहं
ति । अकथितं चेति द्वारां देवीनां रोदस्योश्च कर्मत्वं । कीदृश्यो द्वारः । कवष्यः कवष्यः । कुष निष्कर्षे । कुषिताः
सच्छिद्राः । व्यचस्वतीः । व्यचनं व्यचः । अवकाशस्तद्वत्यस्ताः । यद्वा । अस्यामृचि त्रयः हुतो दिग्धा इंद्रश्च द्या
वापृथिवीभ्यां कामां दुहंतीति योजना ॥६॥ उषासानक्तमश्विना । हे अश्विनावश्विनौ । उषासान
क्तं । उषासा रविग्रहा । नक्तं रात्रिः । तयोः समाहारः । अव्ययं वा । दीर्घश्छांदसः । दिवा रात्र्योः सरस्व
त्यास्सह । दिवादिवसे । सायं सायंकाले च । इंद्रं । शुष्मिभिः वीर्यैः सह समंजाते । संयोजयतः । अंजूव्य
क्तिम्रक्षणकांतिगतिष्विति धातुः । कीदृश्यौ ते । संजानाने । सम्यक् जानाते इति संजानाने । समान ॥५६॥
॥५६॥ वर्चसा । शुक्लो भेनं पेन्ते रूपं ययोस्ते सुपेशसा । सुपेशसौ दिवारात्र्योः शुक्लकृष्णरूपत्वात् ॥७॥ पातं
नः । हे अश्विना अश्विनौ युवां । दिवा दिवसे नो स्मान्पातं रक्षतं । पारक्षणे । हे सरस्वति । त्वं तु नक्तं
रात्रौ नः पाहि । रक्ष । पुत्र विसे बो धनं । हे दैव्या होतारो आकारश्छांदसः । भिषजौ अश्विनौ सुते ।

सोमेभिषुतेसति सचासहरकीमूयपुवांइंद्रंपातंरक्षतं॥८॥तिस्रस्त्रेधा।सरस्वतीभारतीइळाचेतित्रेधा
त्रिप्रकारेणस्थितास्तिस्रः देव्यः।अश्विनाअश्विनौन्वएतेपरिस्रवतीतिपरिस्रुत्सुरा।तयासहसोमंइं
द्रायसुषुवुः।अभिषुतवंतः।सरस्वतीमध्यमलोकस्था।भारतीद्युलोकस्था।इळापृथिवीस्थेतिवि
शेषः।कीदृशंसोमंतीव्रंकटुत्वकरं।मदंमदजनकं॥९॥अश्विनाभेषजं।अश्विनाअश्विनौ।स
रस्वतीत्वष्टाप्रयाजदेवः।एतेसुतेसोमेभिषुतेसतिइंद्रेएतानिवक्ष्यमाणवस्तूनिअधुः।स्था
पितवंतः।दधातेर्लुङि।कानीत्यतआह।भेषजंभेषजं।मधुमधुरूपंत्वेषजं।यशः कीर्तिं।श्रियंश्री
रूपलक्ष्मीं।रूपंरूपं।नानाविधंरूपंच।नित्यवीप्सयोरितिरूपस्यद्वित्वं॥१०॥ऋतुथेंद्रः।व
नस्पतिःप्रयाजदेवः।शशमानः।अर्चतिकर्मसुपठितत्वादर्चयन्स्तुवन्सन्।केतुधा।ऋतौऋतौ
कालेकाले।ऋतुथेतिऋत्वर्थेथाल्प्रत्ययः।परिस्रुतासुरयासहकीलालंमन्नरसं।इंद्रः इं
द्राय।इंद्रार्थंदुहेदुग्धे।सुपांसुलुगित्यादिनाचतुर्थ्येकवचनस्यसुआदेशोइंद्रइति।लोपस्तआत्मनेप
देष्वितितलोपेदुहेइतिरूपं।किंच।सरस्वतीअश्विभ्यांसहितासतीधेनुर्भूत्वाइंद्रायमधुदुहेदुग्
धे॥११॥गोभिर्न।हेअश्विनाअश्विनौ।मासरेणपरिस्रुता।वसहगोभिर्न।नञ्पार्थः।गोप्रभृति

पन्नु अश्विभ्यां सह सुतमभिषुतं सोमं मधु च इंद्रे युवां समधातं आरोपयतं। सं पूर्वाद्धधातोर्लुङि मध्यम
द्विवचनं। तथा हे स्वाहा। नाम कदेशे नाम्नो ग्रहणमिति वा। च नो स्वाहा कृतयः प्रयाजदेवाः स्वयं सरस्व
त्या सह इंद्रे सुतं सोमं मधु च समधातेति वचनव्यत्ययः॥ ॥इति षष्ठोऽनुवाकः॥ ॥का०॥ अश्विना
हविरिति तिस्रो वपानां याज्यानुवाक्याः प्रथमामनूच्य द्वितीयया याज्या। द्वितीयामनूच्य तृतीयया या
ज्या। तृतीयामनूच्य प्रथमया याज्येति। अश्विने त्याद्यास्तिस्रः तिसृणां वपानां क्रमाद्ध्याज्या पुरोनु
वाक्याः। तत्प्रकारमाह। आश्विन वपायागे अश्विने त्यनुवाक्या। यमश्विनेति याज्या। सारस्वतयागे
यमश्विनेत्यनुवाक्या। तमिंद्रमिति याज्या। ऐंद्रवपायागे तमिंद्रमित्यनुवाक्या। अश्विनेति याज्येति
सूत्रार्थः। अश्विना हविः। अश्वि सरस्वती इंद्र देवत्या स्तिस्रोऽनुष्टुभः। अश्विना। अश्विनौ। असरस्वती
चेते। धिया बुध्या हत्वा नमुचेर्नमुचिसंज्ञादासुरादधि सात्। इंद्रायेत्यर्थे। एतावत्प्रमाणवसूनि आ
जभ्रिरे। आजह्रिरे आनीतवंतः। हृग्रहोर्भश्छंदसीति हस्य भत्वं। कानीत्यत आह। इंद्रियं हविः।
इंद्रियं वीर्यं मघं महनीयं वसु धनं चैतानि॥ यमश्विना। अश्विना अश्विनौ सरस्वती च एते पहविः
कृत्वाय मिंद्रमवर्द्धयन्। यदूत्नयो गौ दारव्या तमिदमाचुदात्तं। सइंद्रः। नमुचौ आसुरे सचा विनि
वृत्ति व्यत्ययः। नमुचिनाऽसुरेण सह मघं महनीयं बलं बवयोरभेदाद्दधातद्बलं। बलनाम कंदे सा

॥५७॥

॥५७॥

तरं वा मे घं वा बिभेद । विदारितवान् । सः ऽचे सव्ययं सह अर्थे । वृणो तेर्वलं इतिया स्कः ॥२॥ तमिंद्रं । पश्नावः
कर्मणि गाभूतांगो मेषा ऊनाः ऊना अश्विना ऽ उक्तो अश्विनो सरस्वती च एते सर्वे सचाः एकीभूय यज्ञे हविषा इंद्रि
यं वीर्यं च । इंद्रियं वै वीर्यमिति श्रुतेः । इंद्रं दधानाः पुष्णंतः संतः अभ्यनूषत । अवर्द्धयन् । अस्तुवन्वा । नू
स्तवने । अनूषत इति व्यत्ययेर्थ इसुक्ते ः । व्य । का० । इंद्रं इति पुरोऽ कान्ता नां पूर्ववत् । यइंद्र इति तिस्त्र स्त्रया
णां पत्रपुरो ऽ डान्ता नां याज्यानुवाक्याः । प्र (चे) पूर्ववत् । यइंद्रे । सविता वरुण इत्यैं इस्या नुवाक्या याज्ये ।
सविता वरुणः वरुणः क्षत्रमिति सावित्रस्यते । वरुणः क्षत्रं यइंद्र इति वारुणस्यते इति सूत्रार्थः । य
इंद्रे । प्रत्येकमिंद्र सवितृ वरुण देवस्यास्तिस्त्रोनुष्टुभः । सविता वरुणो नगस्य ये इंद्रे इंद्रियं वीर्यं दधुः
स्थापितवंतः । ते सवित्रादयः स इंद्रः स च यजमानाय । कर्मणि चतुर्थी । यजमानं । सश्चत सेवंतां । इष्टा
र्थदानेन यजमानं सुखयंत्विति स अर्थः । षश्च सेवने । स्मात् लोडर्थे लङ् । अडभाव आर्षः । यद्वा सवित्रादयो
येयस्मिन् इंद्रे इंद्रियं दधुः स इंद्र इति योजना । सुपांसुलुगिति विभक्ति वचन व्यत्ययः । कीदृशाइंद्रः । हवि
ष्पतिः । हविषां स्वामी । सुत्रामा । शोभनत्राणकरः । छत्रिन्यायेन सवित्रादिनामपि विशेषणत्वेन योज्यं ।
॥४॥ सविता वरुणः । सुत्रामा इंद्रः । नमुचेः सकाशात् । यत् वसु धनं । बलं इंद्रियं वीर्यं च आऽदन्त जगृहः ।
तत् स्वादिकं सविता वरुणो नागः सुत्रामा च प्रत्येकं यजमानाय दधत् । दधातु ददात्विति सअर्थः । आधु

दात्तत्वेनाख्यातत्वा संज्ञवा छंत्रं तोवा। दधद्गृह्यमाणोऽन्नवद्विविति नेगम ः। प्रथमपक्षे छांदसत्वात्साधुत्वं। की
दृत्नायैयजमानायदाश्रुषे। दाश्राति ददातीति दाश्वांस्तस्मै। हवींषि दत्तवते। दाश्रृदाने ऽस्य दाश्वान्सा
ह्वान्मी ढ्वांश्चेति क्वसंतोनिपातः ॥५॥ वरुणः क्षत्रे। वरुणः सविता सुत्रामाइंद्रश्चेते यु क्तं सौत्रामण्या
मानाय आवृणास्व च दद्हि। धातूनामनेकार्थत्वात्। दातुमिच्छेति वा। आगुरस्व च। अव भायो घुको
नव। किंच। हे होतः सर्वयज्ञेनो [illegible] हुदानादनयोरिति धातुः। त्वं मत्प्रार्थितविषये तद्वाच्याय अं
गीकारवचनाय ईषितः प्रार्थितोसि। न केवलमिषितः। किं तर्हि। प्रेषितः। अहो इदं हीति प्रकर्षेणा
र्थितोसि। न केवलं तद् [illegible]मि संगीकारमात्रं [illegible] विक्षेपादिना। किं तर्हि। सूक्तवाकाय। हे वेद पुरुष। यद्वा

योऽर्न्तं तत्सूक्तं स्थूक्तं इतिवाकाप्युत्तापनायसूक्तः। न्योऽनवचनानिचब्रूहि। कीदृशस्त्वं। मानुषः। मनु
ष्यहितकारी। यथानदीनांबहवोंबुवेगाः समुद्रमेवाभिमुखाद्रवंति। तद्वत्कामायंप्रविशंति। सर्वे
सर्वं प्राप्नोतिनकामकामी॥ अकामः सर्वकामोवाभ्यो दोकामो दारधीः। मायजेत विधानेनम
तः सर्वं प्रपत्स्यते इति न्यवद्वचनात्प्रमाणसिद्ध एषोर्थइत्यनुपरम्यते॥१४॥ ॥इतित्रयोविंशोषष्ठो
नुवाकः॥ इतिश्रीमल्लागदेवज्ञदैवज्ञात्मजश्रीमदनंताचार्यविरचितायांश्रीमद्वेदार्थदीपिकायां
त्रयोविंशाध्यायः समाप्तः॥ ॥अनेनवेददीपेन मयानीराजितोहरिः। मत्कृमंसफलंकृत्वामद्वं
शं सर्वदावतु॥ सर्ववेदैकसंवेद्यं विष्णुदेवशिखामणिं। दत्तातः कालतश्चैव गुणतोनंतमाश्रये।
॥२॥ ॥७॥ ॥ ॥७॥ ॐ ३ म॥ सर्ववेदैकसंवेद्यं विष्णुदेवशिखामणिं। दत्तातः कालतश्चैवगु
णतोऽनंतमाश्रये॥१॥ ब्रह्मादिकान्सुरान्नत्वाविघ्नराजंसुरद्रुमं। आश्वमेधिकमंत्राणांत्वा वा
र्थः समुदीर्यते॥२॥ सर्वान्कामान्कामयतोराज्ञन्यस्याश्वमेधोविहितः। तस्यफाल्गुनशुक्लाष्टम्यामारं
भः॥ कात्यायनः॥ निष्कं प्रतिमुंचन्वाचयति तेजोसीति। चतुःसुवर्णनिर्मितआभरणविशेषोनिष्कः।
तं यजमानकंठे प्रबध्नन्नध्वर्युस्तेजोसीतिमंत्रं पाहीत्यंतं यजमानंवाचयति। तंचनिष्कंप्रातर्होमांते
पूर्णाहुतिंहुत्वाध्वर्युर्वेदघाद्दितिसूत्रार्थः॥ ॐ तेजोसिशुक्रममृतमायुष्पा आयुर्मेपाहीति। इ

॥७७॥

नमुर्ध्वं चत्वारो ऽध्याया अश्वमेधमंत्राः। तेजोसि। हिरण्यमग्नौ। अश्वस्तूपरः। आदद्भिरिरयंता। तथायनुक्र
मण्यामुक्तं। अथाश्वमेधस्य तुरो ऽध्यायाः प्रजापतिरपश्यदिति। अतश्च तुर्णं प्रजापतिर्ऋषिः। तत्र तेजो
सीत्यस्य सौवर्णं निष्कं देवता। प्राजापत्या ऽनुष्टुप्। हेम निर्मितां तरणां। त्वं तेजोसि। अग्नेर्जातत्वात्।
तथानुक्तं अग्ने वीर्यं चासि। अग्निर्ह वा अपोभिदध्यौ मिथुन्येनाः स्यामिति ताः संबभूव तासु रेतः प्रासिंच
त् द्धिरण्यं तस्माद्धिरण्यमग्निसंकाशमिति स्याधानकांडोक्तेः। एनाः एताभिरद्भिः सह मिथुनी स्यामि
त्यग्नि र्विचार्य तासु रेतः प्रसिषेचेत्यर्थः। तृतीयार्थे द्वितीया। तथा अमृतं। अमृतं च त्वमसि। वह्नितापेप्यनु
च्छिद्यमानद्रवत्वाधिकरणत्वात्। दानेनामृतत्वप्रदाना च्च। हिरण्यदा अमृतत्वं भजंत इत्याम्नायत
श्रुतेः। तथा। आयुष्पा असि। असीत्यस्य सर्वत्रानुषंगः। आयुः पाती त्यायुष्पाः। ना व्युपधेत्वाद्विसु
द्धि सर्जनीयस्य ना व्युपधः षकारमिति प्राप्तिन्न। रव्यस्तेत्रेण षकारः। अतो हेतोः। मे मम आयुः पाहि।
रक्ष। बहुकालीनस्यास्य यज्ञस्य समाप्तिपर्यंतं ममायुः पालयेत्यर्थः। एषोर्थो ब्राह्मणे विहितः। प्र
जापतिरकामयत सर्वान्कामानाप्नुयां सर्वा व्यष्टीर्व्यश्नुवीयेति स एतमश्वमेधमपश्यदित्युपक्रम्य
था अस्मा अश्वे पर्युक्ते निष्कं प्रति मुंचन्वाचयति तेजोसि शुक्रमसि ते जो वै शुक्रममृतं हिरण्यं तेजएवा
स्मिं शुक्रममृतं दधात्यायुष्पा आयुर्मे पाहीत्यायुरेवास्मिन्दधातीति॥ कां०॥ देवस्य त्वेति रश

नामादाय ब्रह्मन्नश्वं भन्त्स्यामि स्वाहेति । देवस्य त्वेत्यादि सरमारपंती त्यंतेन मंत्रेण त्रयोदशारत्निं दर्भ
मयीं द्विगुणां अश्वबंधनार्थं रशनां रज्जुमादाय ब्रह्मन्नश्वमित्यादि तेन रशनां धास्यामि त्वं तं मे त्वं ब्रह्मणे प्र
स्वाहेति सूत्रार्थः । देवस्य त्वेति व्याख्यातं । आददे । अश्वबंधनार्थं रज्जुमहं गृह्णामीत्यर्थः ॥१॥ इमामगृ
भ्णन् । यज्ञे पुरुष इत्वा रशनामादेव सावित्रिष्टुप् । सवनं सुतं । यज्ञैः । तावेत्तः । नोऽस्माकमस्मिन्सुते यज्ञे सोऽर
शनां आबध्नन्त समृतस्यन्ता । कीदृशी । ऋतस्य यज्ञस्य सामन् सामनि सामार्थे सरंप्रसरयंतीं प्रसारं आ
कृष्यधरस्पत नस्यचिल्लोपः रपंती । रपशक्तौ । उच्चारयंती । यज्ञप्रसरेन्नवर्तितिवदंतीत्यर्थः । सा का । वि घतेलभ्यते स्वर्गो येस्ते विद
थाः प्रज्ञास्तेष्वविदथेषु ॥ विदरथेगिसथक्प्रत्ययः । कैर्ब्धा । कवयः । विन्नकेतुर्यादेशाः सुपांसुलुगित्याद
ति ना । यज्ञैकं [illegible]ता कुशलाः प्रजापसादयो या भिमां रशनां ऋतस्य यज्ञस्य पूर्वे प्रथमे आयुषि प्रा
रंभे इत्यर्थः । अगृभ्णन् । अगृह्णन् । याः पूर्वे गृहीतास्ता रशनाः गुणोऽहुते इत्यर्थः । एषोऽर्थो ब्राह्मणेऽभि
हितः ॥ ब्रह्मसुवा एतं यज्ञस्य यदभ्यंशुश्वेण क्रियत इमामगृभ्णन्नित्रशनामृतस्येत्यश्वाभिधा
नीमादत्ते यजुःकृत्यै यज्ञस्य समृद्ध्यै द्वादशारत्निर्भवति द्वादश मासाः संवत्सरस्य संवत्सरमेव ॥७२॥
॥७८॥ यज्ञमाप्नोति त्रयोदशारत्निर्भवति ॥२॥ का० ॥ तं बधानेति ब्रह्मानुज्ञातोऽभिधा असीति बध्नात्यश्व
मिति । तं बधान देवेभ्यः प्रजापतये तेन राध्नुहीति मंत्रेण ब्रह्मणानुज्ञातोऽध्वर्युरभिधा असीत्या
दि स्वगा त्वा देवेभ्यः प्रजापतय इत्यंतेन मंत्रेण रशनयाश्वं बध्नातीति सूत्रार्थः ॥ अभिधा असि ॥

लिंगोक्तदेवत्यानियजूंषि। अश्वदेवत्यानिवा। हे अश्व। यस्त्वं। अग्निधा असि। अग्निर्धीयतेस्तूयतेइत्स
ग्निधाः। दधातेः क्विप्। तथा। भुवनं सर्वेषामाश्रयोसि। भवनं भूरिति व्युत्पत्तिः। तथा। यंता। नियमन
कर्त्ता चासि। यमयतीति यंता। तथा। धर्त्ता। जगद्धारयिता वासीस लेषगः। अत्राश्वाभिमानी देव उच्यते।
गुणयोगात्। अग्निमानि व्यपदेशास्तु विशेषानुगतिभ्यामिति व्यासस्तत्रात्। सएवंविधस्त्वं स्वाहाधि
तः स्वाहाकारेण हुतः सन् वैश्वानर। विश्वेभ्यः सर्वेभ्यो नरेभ्यो हितं अग्निं गच्छ प्राप्नुहि। कीदृशं। सप्र
थसं। प्रथते रसुन् प्रत्ययः। प्रथनं प्रथो विस्तारस्तत्सहितं। यद्वा सह सर्वत स्तिर्यगूर्ध्वमपश्च प्रथते वर्द्ध
ते इति सप्रथाः तं। सहस्य बस्य सादेशः। तथा। हे अश्व। त्वां। त्वां। देवेभ्यः प्रजापतयेच। देवार्थं प्रजापत्य
र्थं च। स्वगा। स्वगां। करोमीति शेषः। स्वेनैवगच्छतीति स्वगा। डांतः। वित्तक्ते ऽर्दिद्रयो वा। स्वयंगामिनं मि
त्यर्थः। अग्निधा असीति तस्मादश्वमेधयाजी सर्वाद्धिं। जिजयति भुवनमसीति भुवनं तज्जयति यंता
सिधर्त्तेति यंतारमेवैनं धर्त्तारं करोति स स्वाहा मग्निं वैश्वानरमिति अग्निमेवैनं वैश्वानरं गमयति सप्रथसं
गच्छेति प्रजयैवैनं पशुभिः प्रथयति स्वाहाकृतः कृतिवषट्कारएवास्यैषः स्वगात्वा देवेभ्य इति देवेभ्य
एवैनं स्वगां करोति प्रजापतय इति प्राजापत्योश्वः स्वयैवैनं देवतया समर्द्धयतीति ब्राह्मणे एवार्थो
क्ति हितः॥ २॥ प्रजापतये ब्रह्मन्। यजूंषि लिंगोक्तदेवत्यानि। ब्रह्माणमामंत्रयते। हे ब्रह्मन्। अह
वाक्यादित्वात्रापि सर्वनिघातात्वः प्रजापतये ब्रह्मन्निति प्रातिशाख्यसत्राद्धि सवर्ग
तये। ९

मश्वं भन्त्स्यामि। बंधने करिष्यामि। बध्नातेर्लृटि स्यपि। एकाचो बशो भष् झषन्तस्य स्ध्वोरिति सूत्रेण बस्य भत्वं।
किमर्थं देवेभ्यः प्रजापतये च। आवत्निरादरार्थौ। तेनाश्वबंधनेनाहं राध्यासं। राध संसिद्धौ। सिद्धिं कर्मस
माप्तिरूपां प्राप्नुयामि सर्वः। आशीर्लिङ्। अथ ब्रह्मा प्रसौति। हे अध्वर्यो। त्वं। यं अश्वं बद्धुमिच्छसि। तं ब
धान। बद्धं कुरु। किमर्थं। देवेभ्यः प्रजापतये च। तेन चाश्वबंधनेन त्वं राध्नुहि। यज्ञसमाप्तिलक्षणां सि
द्धिं प्राप्नुहि। राध संसिद्धौ विसेतः स्वादेर्लोटि मध्यमैकवचनं। एषोर्थो ब्राह्मणे। प्रतिप्रोच्याश्वं प्रबध्नाति ब्र
ह्मन्नश्वं भन्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यासमिति ब्रह्माणमामन्त्रयते ब्रह्मण एवैनं प्रतिप्रोच्य ब
ध्नाति। नार्तिमार्छति। तं बधान देवेभ्यः प्रजापतये तेन राध्नुहीति ब्रह्मा प्रसौति स्वयैवैनं देवतया स
मर्दयतीति॥ का०॥ स्थावरा अपो गत्वा तानिरङ्गिः पंचभिर्मन्त्रैः प्रतिमन्त्रमश्वं प्रोक्षतीति सूत्रार्थः।
प्रजापतये त्वा॥ × प्रजापतये त्वेति प्रोक्षत्यश्वं प्रतिमन्त्रमिति। अथाध्वर्युः स्थावरास्तडागादिस्था
अपो गत्वा ×क लिङ्गोक्तदेवत्यानि पञ्च यजूंषि। हे अश्व। प्रजापतये देवतायै जुष्टं प्रियं त्वां प्र ॥७९॥
क्षामि सिंचामि। अनेन प्रोक्षणेन प्रजापतेरिवाश्ववीर्यं दधाति। वीर्यमेवास्मिन्दधातीति श्रुतेः।
॥७९॥ तथा इन्द्राग्निभ्यां त्वा जुष्टं प्रोक्षामि। वायवे त्वा जुष्टं प्रोक्षामि। विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि।
प्रोक्षामीति। अत्र विश्व सर्व शब्दयोः पर्यायत्वेपि शब्दान्तरत्वाद्भिन्नमन्त्र
सर्वेभ्यस्त्वा देवेभ्यो जुष्टं

र्वं । अत्रपंचसुप्रोक्षणोषुवीयो॰ जोवेग॰ यज्ञोदेवतासे निधानमश्वेक्रियते इ सवर्गंतव्यं । तथाहि ब्रा
ह्मणं । सप्रोक्षति प्रजापतये त्वाजुष्टंप्रोक्षामीति प्रजापतिर्वैदेवानांवीर्यवत्तमो वीर्यमेवास्मिन्दधा
ति तस्मादश्वः पशूनांवीर्यवत्तम इन्द्राग्निभ्यां त्वाजुष्टंप्रोक्षामीतीन्द्राग्नी वै देवानामोजस्वितमौ ओ
ज एवास्मिंदधाति तस्मादश्वः पशूनामोजस्वितमो वायवे त्वाजुष्टंप्रोक्षामीति वायुर्वै देवानामाशि
ष्ठो जवमेवास्मिन्दधाति तस्मादश्वः पशूनामाशिष्ठो विश्वेभ्यस्त्वा देवेभ्यो जुष्टंप्रोक्षामीति विश्वे वै
देवानां यशस्वितमाः यश एवास्मिन्दधाति तस्मादश्वः पशूनां यशस्वितमः सर्वेभ्यस्त्वा देवेभ्यो जुष्टंप्रो
क्षामीति सर्वा एवास्मिन्देवता अन्वायातयतीति ॥४॥ का॰॥ यो अर्वन्तमिति वाचयतीति । मृडा दे त्या
यां जातेन पुंसा अध्वर्युरितरेण च चतुर्नेत्रे ... रवादिरमुपसलेन हतस्यति । यो॰ अर्वन्तमिति वरुण
रुद्रसंतं मंत्रं यजमानं वाचयेदध्वर्युरित्यर्थः ॥ यो अर्वन्तं ॥ गायत्री । अत्र पूर्वार्द्धे स्वस्तुतिः परार्द्धे लिं
गोक्तदेवत्याः । यः अर्वन्तमश्वं जिघांसति हन्तुमिच्छति । अर्वणस्त्र सायन जरतिल दृशं तादृशः । त्रिघां
सती यत्र हंतेः सन्नंतात् लट् । तं पुरुषं वरुणो देवो ऽभ्यमीति । आ इति मुख्यनहिनस्ति । अमेतुरागे । एत
स्य लट् तु रूपस्तु ऽभ्यमः सार्वधातुकमतीति प्रत्ययः । यद्वा मी हिंसायामित्यस्य रूपं । अडागम आर्षः
॥ का॰॥ वैतकटे नाधोश्वफ्लावयति परामत्तइति । वेतसत रुहतेनकटेनमत्ले श्वानं अश्वाधो जलेतार

यतीति सूत्रार्थः। अग्ने व्रतपास्त्वमर्त्तो मर्त्येष्वमनुष्यः। इप धाय कारलोपश्छांदसः। परः दूरस्थः दूतः। अ
घस्य दंनीतः। तथा। स्वाच परः दूतः निराकृतः। स्वरूपेण स्महं तेव परादत्त इत्यर्थः। एषोर्थो ब्राह्मणे। पा
रोमन्तः परस्मै वेति स्मानेच तुरस्ते स्वं हत्वा अघस्य दमस्व स्योपहृत्यायपतिवज्रेण वेनमयक्रामतिनेनं पा
प्मा भ्रातृव्य आप्नोतीत्यर्थः॥५॥ ॥ इति प्रथमोनुवाकः॥ ॥का०॥ अग्निः समीपमानी याग्नये स्वाहेति
जुहोत्यनुवाकेन प्रतिमंत्रं सहस्त्रं वावर्त्तमिति। ततः स्थावरेभ्यो द्यः सकानू॥ दम्वमग्नि पार्श्वमानी
याग्नये स्वाहेत्येकके ड्विकात्मकेनानुवाकेन प्रतिमंत्रं सहस्रं जुहुहि तेनाभ्येन जुहोत्स्तोकीयसंज्ञा
दश आहुतीर्जुहोतीति। यद्वानुवाकमावर्त्या वर्त्य सहस्रमाज्याहुतीर्जुहोतीति सूत्रार्थः॥ अग्नये
स्वाहा। दक्षपक्षं बिलिंगोक्तदेवतानि। अंगति सग्निः। तस्मै स्वाहा॥ सुहुतमस्तु। एवमुत्तरत्र॥१॥ सु
नोतीति सोमस्तस्मै सोमाय॥२॥ अपां सलिलानां मोदाय। मोदयतीति मोदस्तस्मै। जलानां जले वा हर्षे
करोतीत्यर्थः॥३॥ सूते सोसविता। तस्मै सवित्रे॥४॥ वातीति वायुस्तस्मै वायवे॥५॥ वेवेष्टि व्याप्नोतीति
विष्णुस्तस्मै विष्णवे॥६॥ इंदतीतीन्द्रस्तस्मै इन्द्राय॥७॥ बृहतां वेदानां पतिर्बृहस्पतिस्तस्मै बृहस्पतये॥८॥
मिथ्यतीति त्रियलीति मित्रस्तस्मै मित्राय॥९॥ वृणोतीति नक्तं रक्षो वारयतीति वा वरुणस्तस्मै वरुणाय स्वाहा
॥१०॥ एषोर्थो ब्राह्मणे। यत्स्तोकीया जुहोति सर्वं हुतमेवैनं जुहोत्यस्कंदायेत्युपक्रम्याग्नये स्वाहेत्य

॥८०॥

न यएवैनं जुहोतिसोमाय स्वाहे त्यादिनोक्तः।१॥ ॥द्वितीयोनुवाकः॥ ॥का० ॥दक्षिणाग्नौ जुहोतिहिं
कारायस्वाहेति प्रक्रमानिति। एतदर्थमेवोद्धृते दक्षिणाग्नौ प्रतिमंत्रं हिंकारायेत्यादीन् प्रक्रमसंज्ञान्हो
मानेकोनत्रिंशत्क्रमान्जुहोति। नपंचाद्वनामसंख्यां जुहोतीतिसूत्रार्थः। हिंकारायस्वाहा॥ सर्वाणियजूंषि
लिंगोक्तदेवत्यानि। हिंकारादीनिभिन्नान्यश्वस्य चेष्टितानि तत्रे यानि केडकाषट्कं। हिंकरोतिहिंका
रस्तस्मै। अस्मैहिंकाराय स्वाहा।१। हिंकृताय। अश्वहृतेपहिं कृतंतस्मै। अनुकरणशब्दं सान्तेपुन पो
रुत्थं। एवमग्रेपि।२। क्रंदतीतिक्रंदन्तस्मै क्रंदते।३। अवनीचैः क्रंदती सवक्रंदस्तस्मै अवक्रंदाय ४
प्रोथतीतिप्रोथन्तस्मै प्रोथते। प्रोथपर्यापणे५ प्रोथकृथः प्रोथो घोणाप्यस्यास्तीति प्रप्रोथस्तस्मै प्र
प्रोथाय। घोणातु प्रोथमस्त्रियामितिकोशः ६ गंधोस्यास्तीतिगंधस्तस्मै गंधाय ७ घ्रातमाघ्राण
मस्यास्तीतिघ्रातस्तस्मै घ्राताय। ८।१। निविशतेति सोनिविष्टस्तस्मै निविष्टाय। ९ उपविशतीत्युपवि
ष्टस्तस्मै उपविष्टाय।१०। संम्यक्दितं भवखंडनं यस्यस संदितस्तस्मै संदिताय।११ वल्गतीतिवल्गन्
न्तस्मै वल्गते।१२ आस्तेऽसावासीनस्तस्मै आसीनाय।१३ शेतेसौशयानस्तस्मै शयानाय।१४ स्व
पितीतिस्वपन्। तस्मै स्वपते।१५ जाग्रतीतिजाग्रत्तस्मै जाग्रते।१६।२। कूजतीतिकूजन्तस्मै कूजते१७
प्रकर्षेणबुध्यतेसौ प्रबुद्धस्तस्मै १८। विजृंभमाणस्तस्मै विजृंभमाणस्तस्मै १९ चृतीदीप्तौ। विश्लेषेण
वर्ततीतिविचृत्तस्तस्मै विचृत्ताय।२० संहानायसंहतशरीरायसंहननयुक्तायवा।२१ उपतिष्ठ

दृति

ते सोऽउपस्थितस्तस्मैउपस्थिताय ।२२ आयते गच्छतीसायनस्तस्मै आयनाय ।२३ प्रकृष्टमयते सोप्रायणस्त
स्मै प्रायणाय ।२४ ३। यतेस्वाहा। एतीतियन्तस्मै यते । इणगतौ । यतो गता वितिन्नारव्येनां तो दात्तः ।२५ धा
वतीति धावन्तस्मै धावते २६ उद्धे ऊर्ध्वं द्रावो गतिर्यस्य स उद्रावस्तस्मैउद्रावाय २७ उद्धे अधिकं द्रुतं य
स्य स तस्मै उद्रुताय ।२८ शूं शब्दं करोतीति शूकारस्तस्मै शूकाराय २९ शूकृतमस्यास्तीति शूकृतस्तस्मै
शूकृताय ।३० निषीदतीति निषण्णस्तस्मै निषण्णाय ।३१ उत्तिष्ठतीस्थुत्थितस्तस्मैउत्थिताय ३२ ।४। जवा
य स्वाहा। जवोस्यास्तीति जवस्तस्मै जवाय ३३ बलमस्यास्ती तिबलस्तस्मै ३४ उत्तरत्राप्यनूर्ध्व आदि
म्यो लिङ्ग सर्थः चतुर्थ्यस्य ।३४ विवर्त्तते सो विवर्त्तमानस्तस्मै ३५ विवर्त्तते स विवृत्तस्तस्मै विवृत्ताय ३६
विधून्वतेकंपते स विधून्वानस्तस्मै विधून्वानाय ।३७ विधूयते स विधूतस्तस्मै विधूताय ३८ श्रोतु
मिच्छतीति शुश्रूषमाणस्तस्मै शु ।५। शुश्रूषमाणाय ३९ शृणोतीति शृण्वन्तस्मै शृण्वते ।४०।५। ईक्षमा
णाय स्वाहा। ईक्षते सो ईक्षमाणस्तस्मै ईक्षमाणाय ४१ ईक्ष्यते लोकैरीक्षितस्तस्मै ईक्षिताय ।४२
विलोपेण कृत्विग्भिरीक्षितो वीक्षितस्तस्मै वीक्षिताय ४३ निमेषते सो निमेषस्तस्मै निमेषाय ४४ यद
त्तिकिंचिदश्नितस्मै नद्यापि तस्वाहा ।४५ यज्जलादिकं पिबति तस्मै पानकर्त्रे ।४६ यन्मूत्रं करोतीति
स्मै मूत्रयते ।४७ करोतिपर्वोक्तकर्मा । न्यादितिकुर्वन्तस्मै कुर्वते ४८ कृतोदवेनेनिर्मितस्तस्मै
कृताय ४९ स्वाहेति सर्वत्रोषः । अवरं स्वाहाकारं करोति परां देवता मिति श्रुतेः ॥ इसेकोनपंचाश

॥८१॥

॥८१॥

स्वक्रमसंज्ञा होमाः। तथा च ब्राह्मणं। तं यदा हुर्यघज्ञमुरवे यज्ञमुरवे जुहुयात्सज्ञुष्मि र्वर्ध्येत पापीया
न्स्यात्सकृदेव होतव्याँ न पशुष्मि र्वर्ध्यते न पापीयान्भवत्यष्टा चत्वारिंशद्रातं जुहोत्यष्टा चत्वारिंशदक्ष
रा जगती जागताः पशवो जगत्यैवास्मै पशूनवरुंधे एकमति रिक्तं जुहोति तस्मादेकः प्रजास्वर्धुक इ
ति। यदि भूतिपज्ञं जुहुयात्त् हि पशुष्मि र्वर्ध्यते हीनो भवति पापीयांश्च तस्मात्सकृदेव होतव्या इति
ब्राह्मणार्थः।६।। ।।इति तृतीयोऽनुवाकः।। ।।अथ तत्सवितुरित्याद्याः षड्चः सवितृदेवत्या गायत्र्यः
सावित्रीणामिष्टीनां याज्यापुरोऽनुवाक्याः। तत्राद्या विश्वामित्रदृष्टा। तत्सवितुः। तत्। तस्य। सुपां
स्विति षष्ठीलोपः। सवितुः सर्वप्रेरकस्य देवस्य क्रीडादिगुणयुक्तस्य सूर्यमंडलस्थस्य परमात्म
नो वरेण्यं सर्वैर्वरणीयं भर्गस्तेजो धीमहि। वयं ध्यायेम। सकः। यः अस्माकं धियः ज्ञानेंद्रियाणि क
र्मेंद्रियाणि च प्रचोदयात् प्रकर्षेण प्रेरयति। उदात्तवता तिङा गतेः समासवचनमिति समा
सः। वृद्धेरणे ऽस्मास्यंतात्लेटि। लेटो डाटावित्याडागमे इतश्च लोपः परस्मैपदे ध्विति तिप इकारलो
पे प्रचोदयात् इति रूपसिद्धिः। महानस्यामिहिमा वरीवर्ति। ग्रंथगुरुत्व भयान्नोक्तः।।१।। हिरण्यपा
णिमूतये। मेधातिथिदृष्टा। अहं सवितारं उपह्वये आह्वयामि। किमर्थं ऊतये अवनाय। कीदृशं तं।
हिरण्यपाणिं। हिरण्मयौ पाणी यस्य तं। मतेः सः सविता। चेत्ता। चेतयिता। सर्वतः देवता। पदं स्थानं।
ज्ञानिनामभिनिर्मुषः। यद्वा। स सविता देवता। देवतानां। पदं स्थानं चेत्ता। चेतयिता। तां तां देवतां तत्र

तत्रस्थानेन्वेष्टव्यितेस्यर्थः। त्रीषास्माद्वातः पवते त्रीषोदेति सूर्य इत्यादि श्रुते ॥२॥ देवस्य चेततः। वयं सवितु
र्देवस्य। सुमतिं शोभनां बुद्धिं प्रहवामहे प्रकर्षेणाह्वयामहे प्रार्थयामहे। कीदृशस्य सवितुः। चेततो
तिचेतन् तस्य चेततः। सर्वज्ञस्य। चिती संज्ञाने। कीदृशीं सुमतिं महीं महतीं। सत्यराधसं। सत्यम
नश्वरं राधो धनं सर्वसिद्धि वयिस्यास्तां। यद्वा। सत्यं सत्यस्वरूपं ब्रह्म राध्यति साधयतीति सत्यरा
धास्तां ॥३॥ सुष्टुतिं सुमतीवृधः। प्रजापतिर्दृष्टा। देवायमती विदे इति चतुर्थ्यैविष्यर्थे। वयं सवितु
र्देवस्य सुष्टुतिं शोभनां स्तुतिं रातिं दानं च प्र ईमहे प्रकर्षेण याचामहे। ईङ्गतिर्याचनार्थः। छंदसि परे
पीति क्रियापदास्वरः प्रभूवः। कीदृशस्य सवितुः। सुमतीवृधः। दीर्घश्छांदसः। शोभनां मतिं वर्द्धय
तीति सुमतीवृत्तस्य। पुनः कीदृशस्य मतीविदः। सर्वेषां मतिं ज्ञानं कर्म च वेत्तीति मतिवित्तस्य।
॥४॥ रातिं सत्पतिं। अहं सवितारमुपह्वये। आह्वयामि। किमर्थं। महे पूजार्थं। मह पूजायां। क्विबंतोयं।
तदपि किमर्थमत आह। देववीतये। देवानां तर्पणाय। तं विना तेषां तृप्त्यभावात्। कीदृशं सवितारं। रातिं।
रातिं ददातीति रातिस्तं। कुतिसूतिरातीत्यादिना कर्तरि क्तिन् प्रत्ययांतो निपातः। सत्पतिं। सतां सद्वाचा
रवतां पालकं। आसवं। आभिमुख्येन सौति कर्माणि कर्तुमभ्यनुजानातीत्यासवस्तं ॥५॥ देवस्य
सवितुः। सवितुर्देवस्य मतिं बुद्धिं वयं धिया बुद्ध्या सह भगं भाग्यं मनामहे याचामहे। मन्यतिर्यति
कर्मा। सवितुर्देवस्य बुद्धिरस्मासु बुद्ध्यादिदानतत्परा भवत्वित्यर्थः। कीदृशं भगं। आसवं। आस

॥८२॥

म्य कुसो सन्नुज्ञा नातिसर्वान्येनेत्या सर्वस्त्वं। सर्वेषामाज्ञादाने समर्थो भिस्पर्धः॥ विश्वैदेव्यं। विश्वेभ्यो देवेभ्यो
हितं। यनेन मुख्यलो देवतर्पणादिति भावः॥६॥ अग्निमं स्तोमेन। तिस्रः स्विष्टकृतिपुरोनुवाक्या अग्निरग्नि
देवस्या गायत्र्यो यथाक्रमं सुतंभरविश्वामित्रो विरूपदृष्टाः। हे अध्वर्यो। त्वं स्तोमेन स्तुत्या अग्निं बोधय।
प्रवगतार्थं कुरु। किं कुर्वन्। समिधानः समिध्यते सोसमिधानः। संदीपयन्। कीदृशोग्निं। अमर्त्यं। मर
णधर्मरहितं। एवं त्वद्बोधितः सः वह्निर्नोऽस्माकं हव्या हवींषि देवेषु दधत्। धारयतु। यतोस्य सोधि
कारोस्ति। इतस्य लोपश्छलीकारलोपः॥७॥ स हव्यवाट्। स हव्यवाट् सोग्निर्धिया बुध्या समण्वतिसं
गच्छते देवैः सह। हविर्दातुं। कीदृशोग्निः। हव्यं देवान्प्रति वहतीति हव्यवाट्। अमर्त्यः। मनुष्यधर्मरहितः।
उशिक्। वष्टि कृपते वा सर्वैरिति उशिक्। कमनीयः। मेधावी वा। दूतः। देवानां दूतकर्त्ता। च नोहितः। व
न दूसन्न नाम। वनसेऽन्नायहितः। हविरूपान्नस्यादनाय स्थापितः॥८॥ तं त्वा॥ हे अग्ने भगव
न्चित्रभानो॥ चित्रा विचित्रा रमणीया भानवो दीप्तयो ज्वालारूपा यस्य सः चित्रभानुस्तत्सं बोधनं
हे घृतस्नो। घृतं स्नौति प्रस्नौतीति येन सघृतस्नुस्तत्सं बोधनं। तं प्रसिद्धं त्वा त्वां ईमहे याचामहे। कीदृ
शं त्वां। स्वर्विदं। स्वः स्वर्गस्य लोकस्य परमसुखस्य वा विदं वेत्तारं। कोयाचनाविषय इत्यत आह। देवा
न्। देवसंतर्पणाय हवींष्यावहेत्यर्थः॥९॥ अग्निं दूतं॥
हविर्जोवीतये। संतर्पणाय। वीतमो। आवह। देवसंतर्पणाय हवींष्यावहेत्यर्थः॥९॥ अग्निं दूतं॥

॥ ८३ ॥

मेधातिथिदृष्टाग्नेयी गायत्री ॥ यं अग्निं अहं पुरो दधे पुरतः स्थापयामि । तं प्रति उप ब्रुवे । कथयामि । किं तदा
ह । हे अग्ने इह यज्ञे स त्वं वान् देवान् हविर्भुजः आसादयात् । आसादय तु स्थापयतु । कीदृशमग्निं । ह
व्यवाहं हविषां वोढारं ण्यं तालसदेलेटि आगम इलोपे रूपसिद्धिः ॥१०॥ ॥ इति चतुर्थोनुवाकः ॥ ॥ अ
जीजनोषि । पवमानस्तुति रेषा । अरुण त्रसदस्युर्न्यां दृष्टा पवमानदेवसाविपीलिकमध्या हृति
रनुष्टुप् । जागता वष्टकस्वहतिर्मध्ये चे द्वादशकः पिपीलिकमध्येति वचनात् । हे पवमान वायो । त्वं
सूर्यं मजीजनः । उत्पादितवानसि । हिः प्रसिद्ध्यर्थः । यतस्माद् इति सूर्यो स्तेप त्रेचगच्छतीति श्रुतेः ।
जनेर्णिजंतात्लुङ् । तथा । त्वाक्मना । त्वा स्मनं त्वाक्मे । त्वा क्त्वाक्तौ । मनिन्प्रत्ययः । स्वसा मध्येन पयो
जलं विधारे । विदृश्येण धारयसि । वृष्टये । पादद्धित्वा त्न सर्व निपातः । केन हेतुना । गोजीरया । जी
वनं जीरः । वस्य रेफस्त्वादेशः । गवां जीरा गोजीरा । तया गोजीरया । गवां जीवनहेतुना । जलं वर्ष
सीत्यर्थः । तासां हि वीषाय ज्ञ निष्पत्तेः । प्राणिनां जीवनाच्च । जीवप्राण धारणे स्य रूपं । कीदृशस्त्वं । पु
रंध्यां रंहमाणः । पुरंधिरिति धारयतीति पुरंधिर्धारा । तया रंहते सो रंहमाणः । गच्छन् । द
त्वा पविन्त्रा त्रेणाक लन्नं प्रतिगच्छन्तीत्यर्थः । विधारे इत्यत्र विधारयसीति पुरुषव्यत्ययः । धार
यतेस्त्तङि लटि त्नमेकवचने धारये इति प्राप्ते छंदस्युत्तमस्येतोऽस्तिं तोप्याद्धि घालुक त्वे सति

॥ ८३ ॥

णे रनिटीति णिचो लोपे च कृते धारेइति रूपं ।१५ ॥ पंचमोऽनुवाकः ॥ ॥ का० स० ॥ अध्वर्युयजमानावुद्
ञ्चिणेऽश्वकर्णे जपतो विक्रमीत्रेति । तत्र या प्रथमां सावित्र्यामिष्टौ समाप्तायां सत्यामध्वर्युयजमानौ
दक्षिणेऽश्वकर्णे जपतः स्वरेणेत्यर्थः । विक्रमीत्रा ॥ अश्वदैवतं यजुः । अतिजगती छंदस्कं । मात्रा पित्रे
तितत्ती येषं च व्यधे । हे अश्व त्वं । मात्रा मातुः पृथिव्याः सकाशाद्भूरसि समर्थोसि । तथा पित्रा
पितुः द्युलोकादपि प्रभूः समर्थोसि । अथ नामानि रश्वं स्तोति । त्वं अश्वोसि । अश्नुते व्याप्नोतिमा
र्गमित्यश्वः । अश्रूप्रुषिलटि कणि कटिरवटि विशिभ्यः क्वन्निति सत्रेः क्वन्प्रत्ययः । निर्वोदाधुदात्तः । अ
श्नातीति वाऽश्वः । हयोसि । यैं हयति यातीति हयः । हयगतौ । पचाद्यच् । अत्योसि । अतसातत्यगा
मने । अतती सततः । संततगामी । औणादिको यप्रत्ययः । मयोसि । मयते गच्छतीति मयः । मयगतौ । प
चाद्यच् । यद्वा मय इति सुखनाम । सुखरूपोसि । अर्वासि । इयर्ति गच्छतीत्यर्वा । स्नामदिपद्यर्त्तिपृ
शकिभ्यो वनिन्निति वनिप्प्रत्ययः । यद्वा । अर्व वधे । अर्वतीति हिनस्ति रिपूनित्यर्वा । तदा कनिन्प्रत्ययः ।
सप्तिरसि । सपति सैन्येन समवैतीति सप्तिः । सप समवाये । स्मात्क्तिन्प्रत्ययः । वाज्यसि । वजनशी
लो वाजी । वज गतौ । अस्मात्ताच्छील्ये णिनिः । अनेकप्रकारगतिसूचनाय पुनः पुनर्गत्युक्तिः । यद्वा ।
वाजाः पक्षाः सं सन्त्यस्येति वाजी । पूर्वयुगेऽश्वस्य तत्सद्भावात् । वृषासि । वर्षति सिंचतीति वृषा ।

कनिस्यु वृषितक्षिराज्ञि घन्विघुप्रतिदिवइतिकनिन्प्रत्ययः। न्न नणा अह्नि। न्न मनोयस्य सन्नम्

ण्णाः। न्न वन्मनो यस्येति वा तथो॥ नाम। नाम्नाय पुरसि। अतिन्नायेन न ता तीतियम्। यपुरस्यो ऽस्वमे

धीय ऽस लि धानाद्धा यातेर्डि ह्ले सस्तु प्रत्ययः किद्ध। नामं नाम्ना त्रिन्नु रसि। नृपति वृन्नं करोतिस्त

न मितिन्नित्रुः। शः कित्सन्वच्चेत्तिप्रत्ययः। सन्वद्भावाद्द्वित्वम भ्यासस्येकारश्च। एवं विविधनामाद्ध। आ

दित्यानामदितेरपत्यानां देवानां। पत्व। नांतोपे। मार्गे अन्विहि। पतिं गच्छंति यत्रेति पत्व। स्नामदीया

द्विनावनिन्प्रत्ययः। आदित्यायेन पथा गच्छंति तमनु गच्छेत्यर्थः। एषो र्थो ब्राह्मणे ऽस्ति हि नः। दिन्ने मात्रा

प्रभृः पित्रतीयं वैमाता सो पिता ऽभ्यामि वैनं परिददास्यद्यो ऽसि हयो ऽसीतित्रा॥ स्येवेनं ततस्मा। धृष्टः

प्रजा ऽऽयते ऽ सो ऽसि मयो ऽसी स्येवेनं नयति तस्माद स्वः पन्नस्येति तस्माद स्वः पश्नना ऽ श्रे

सुंग ह्रस्व वो ऽसि सस्मिर ऽसि वा ऽ प्यसीतियथा पि जुरे वेदु षास्मिन्न मणा असीतिमि थुन त्वाय यथुनामा

सिद्धिवनुनामासी येतद्वा अश्वस्य प्रियं नामधेयं प्रियेणेवैनं नाम्ना ऽभि वदति तस्माद प्यामं त्रितोसंग ॥८५॥

स्य नाम्ना चेद भिवदतो न्योन्यं ऽसमेव जानाते आदित्यानां पत्वा न्विहि स्यादित्यानेवेन गमयतीति॥१॥

॥८४॥ का॰॥ देवा आत्राापालाऽत्तिरश्चिणो ऽस्या दित्रा सनुचरी सजातीयां स्ताव तस्तावतः कबचिनिषंगि

कलापिदंडिनोयधास्तरव्यमिति। चतुर्विंशतिवार्षिकाश्वान्गतमध्यस्यस्येन्राान्याम्लिसष्टस्यरद्दका

नरानादिशति। कीदृशान्। अनुचरी सती यांस्तावत: अनुचरी संरव्यान्। तेनक्षातं राजपुत्रान्। क्षातं क्षत्रिय
पुत्रान्। क्षातं सूतग्रामणी पुत्रान्। सूता अश्वपोषकास्तेषां मध्ये ग्रामण्यो मुख्यास्तेषां सुतानि सार्थः।
क्षातं क्षात्रसंगृहीतृणां पुत्रान्। क्षेनार आयव्ययाध्यक्षास्तत्संग्रहीतृ: क्षात्रे। तत्राधिकृता: क्षात्रसंग्र
हीतारस्तेषां सुतान्। क्रमात्केवच्चिनिषंगिकलापिदंडिन:। तेन। राजपुत्रा: सन्नाहवंत:। क्षत्रियपुत्रा निषं
गिण: सखड्गा:। सूतग्रामणी पुत्रा इषुधिमंत:। क्षात्रसंगृहीतृपुत्रा: वंशादिदंडधरा इत्यर्थ:। वडवा
भ्यो जलस्नानार्थं मग्नवारणमश्वरक्षणं। तावद्यजमानो वाचातो वी: [illegible] ते सावित्री: कारयति वीणागानं
पारिप्लवशास्त्रपाठं धृतिहोमं चेत्यादि ज्ञेयमिति सूत्रार्थ:। देवा आशापाला:। देवदेवसंयज्ञे:। रुगुष्णि
कृ। आ। दशा: दिश: पालयंतीत्याशापाला:। दिशास्तु कुकुभ: काष्ठा आशाश्च हरितश्चताइत्यभिधानं।
हे देवा:। यूयं। एतमश्वमध्वरं स्तत। कीदृशं। देवेभ्यो मेधाय प्रोक्षितं प्रोक्षणेन संस्कृतं। अत्र राजपुत्रा
दय: प्रोच्यंते देवा इति। देवा आशापाला एतं देवेभ्यो मेधाय प्रोक्षितं रक्षतेति शातं वै तल्प्या राजपुत्रा सिंहासनार्हा:।
आशापालास्तेभ्य एवैनं परिददातीति ब्राह्मणोक्ते:॥ का०॥ आहवनीयेऽस्तमिते चतस्रो धृतीर्जुहंतीति।
अस्तमितेऽर्के अग्निहोत्रहोमात्प्राग् अग्निहोमार्थमुद्धृते आहवनीयेऽग्नौ चतस्रो धृतिसंज्ञा आहुती: प्र
तिमंत्रं जुहोति वर्षपर्यंतं प्रत्यहं। एवं सति चत्वारिंशदधिका ऽहुतीनां चतुर्दशशतानि भवति। तथाहि त्रा

त्मणं। इह रंतिरिह रमतामिह धृतिरिह स्वधृतिः स्वाहेति संवत्सरमाहुतीर्जुहोति षोळशानवती रेतावा
अश्वस्य बंधनं तान्निरेवैनं बध्नाति तस्मादश्वः प्रमुक्तो बंधनमागच्छतीति॥ इह रंतिः। चत्वारि यजूंषि
अग्निदेवत्यानि। चतुर्थमंत्रांते स्वाहाकारश्रवणात्रिष्वपि स्वाहाकारः प्रयोज्यः। अथ प्रत्युच्यते। हे अ
श्व इह रंतिः। रमणं तवास्तु। सततं नित्यमिह रमतां। इह धृतिः तव संतोषोस्तु। इह स्वधृतिः। स्वनिजा
धृतिर्धारणं तवास्तु। स्वाहा सुहुतं चास्तु॥२॥ ॥षष्ठोनुवाकः॥ ॥का०॥ कायस्वाहेति चाश्वमेधिकानि
त्रीणि कृष्णाजिनदीक्षांतो ध्वरदीक्षणीयाश्चत्वारि। त्रीणि त्रीणि चाश्वमेधिकानि चत्वार्यौध्वरि
काण्यौद्ग्रहणानि हुत्वा कायस्वाहेत्याश्वमेधिकानि त्रीण्यौद्ग्रहणानि जुहुयात्। अत औद्ग्रहणहोमानं
तरं दीक्षणीयान्तोषं समाप्य कृष्णाजिनदीक्षा — — व वेदनांता कर्तव्या। सिद्धा हं प्रवरंती ति सूत्रेः सत्ता
हं दीक्षणीयाकार्या। तत्र प्रसंगेन कर्तव्यमाह। अध्वरदीक्षणीयाश्चत्वारि औद्ग्रहणानि आकूत्यै प्रयुजेइ यादि
त्यादीनि पूष्णेग्नये स्वाहेत्यंतानि। त्रीणि त्रीणि चाश्वमेधिकानि कायस्वाहेति कं डिकायां पठितानि प्रत्या
हमन्यान्यन्यानि पाठक्रमेण तन्मध्ये सतत्स्वहस्तु क्रमेणैकैकं त्रिकं हूयते। तत्र द्वितीये त्रिके स्वाहाकार ॥८४॥
॥८५॥ राद्यं मंत्रत्रयं स्वाहाधिमाध्यीतायेत्यादीति सूत्रार्थः। कायस्वाहा॥ औद्ग्रहणसंज्ञानि यजूंषि लिंगो
क्तदेवतानि। कायप्रजापतये स्वाहा सुहुतमस्तु।१ तथा। कस्मै प्रजापतये।२ कतमस्मै प्रजापतिश्रेष्ठा

या।३ आधिं आधानं आधीताय आध्याताय भासाय ४ मनः। मनसि वर्तमानाय प्रजापतये ५ चित्तं विज्ञा
नाय सर्वेषां चित्तसाक्षिणे। ६ एते प्रजापतिविशेषाः।१। अदित्यै अखण्डितायै।७ मह्यै पृथ्व्यै अदित्यै ८
सुमृळिकायै सुखयित्र्यै अदित्यै ९ सरस्वत्यै वागधिष्ठात्र्यै १० पावयतीति पावका। तस्यै पावकायै
प्रबोधयित्र्यै सरस्वत्यै ११ बृहत्यै सरस्वत्यै १२ एता देवपत्न्यः।२॥ पूष्णे स्वाहा।१३ प्रपथ्याय। प्रगतः प
पथ्यं ५ थाः प्रपथः। तत्र स्तवः प्रपथ्यः। तस्मै। प्रकृष्टं हितं यस्मादिति वा। तादृशाय पूष्णे।१४ नरंधिषाय।
धिषणा वेद। नरं धिषणया ध्यायति स्वोदयेन सः नरंधिषः। तस्मै पूष्णे। इगुपधेति कप्रत्ययः। किंवा
न्ने गुणः।१५ त्वष्ट्रे। त्वष्टेति तनूकरोतीति त्वष्टा। तस्मै १६ तुरीपाय। तुर वेगे। तुरी वेगः। तं पाति रक्ष
तीति तुरीपस्तस्मै त्वष्ट्रे।१७ पुरुरूपाय। पुरूणि बहूनि रूपाणि यस्य तस्मै त्वष्ट्रे।१८ विष्णवे। वि
ष्लृ व्याप्तौ। वेवेष्टि व्याप्नोति सर्वमिति विष्णुस्तस्मै १९ निभूयपाय। नितरां भूयो मत्स्याद्यवतारं कृत्वा य
जगत्पातीति निभूयपस्तस्मै विष्णवे।२० शिपिविष्टाय। शिपिषु पशुषु अज्ञानिषु विष्टः प्रविष्टं त
द्यशिपिरूपेणेति शिपिविष्टस्तस्मै विष्णवे।२१ एते ओङ्कारेण संज्ञका मंत्राः। ओङ्कारेणाभिजुहोतीति श्रुतेः।३।
॥का०॥ षडाग्निकानि चतुःस्थाने ब्रह्मार्मविष्वादवस्येति। सप्तम्यां दीक्षणीयामयं विशेषः। प्रत्यहं च
त्वार्येऽप्रणीतान्याध्वरिकाणि हूयन्ते। तेषां चतुर्णां स्थाने षडाग्निकान्योङ्कारेणान्याहुतिमग्निं प्र

युजं स्वाहेत्यादीनि हुत्वाश्वमेधिकानि च त्रीणि विष्णवे स्वाहेत्यादीनि च हुत्वा विश्वो देवस्येत्यनुष्टुभाद्या

मेमो ह्रल्पं जुहोतीति सूत्रार्थः ॥ विश्वो देवस्य । वैश्वदेव्यनुष्टुप् पूषा स्यात्र यदृष्टा । मर्त्त इति मनुष्यनाम ।

विश्वो मर्त्तः सर्वो मर्त्यः । नेतुः नयति सर्वं नियमयतीति नेता तस्य देवस्य परमेश्वरस्य सख्यं सखित्वं

वुरीत । वृणुते प्रार्थयते । वृङ् वरणे इति धातुः । सर्वजगन्नायकस्य परमेश्वरस्य प्रीतिं सर्वोपि करोतीत्यर्थः ।

तथा विश्वो मर्त्तः । विशेषणं विशेष्यस्य ग्राहकं । आकांक्षासद्भावात् । राये धनाय इषुध्यति । प्रार्थयते ।

इषुध्यतिर्याचनार्थः । ईश्वरादेव द्रव्यमिच्छतीत्यर्थः । तथा ईश्वरादेव द्युम्नं विश्वो मर्त्तो वृणीत । द्युम्नं यशो

ऽन्नं सुखं वा तत्र पागत् । हे अग्ने सत्वमीश्वरः [illegible] सिलं तत्सर्वं पुष्यसे । पोषयसि । पूर्णैः [illegible] सीत्य

र्थः । स्वाहा तुभ्यं सुहुतमस्तु । एषोर्थो ब्राह्मण आध्वरिके निहितः । तद्भवापामाज्यं [illegible] वति तत्सर्वमेव [illegible]

[illegible] नयेत्यर्थः । [illegible] वेण [illegible] त्यागं [illegible] वं यस्य [illegible] दानयाति [illegible] ॥ २६ ॥

ति विश्वो देवस्येति तदस्या वैश्वदेवं नेतुरिति सावित्रं मर्त्त इति [illegible] मैत्रं विश्वो द्युम्नमिति [illegible] द्यु

म्नं [illegible] बृहस्पतिः पुष्यस इति तस्यौष्णा मनुष्टुभो वै जुहोतीति । अत्र विश्वो देवस्य नेतुरिति पूर्णाहुति

॥ २६ ॥ मन्त्रं जुहोति यवै पूर्णाहुतिरस्यामेवां ततः प्रतितिष्ठती सश्वमेध उक्तं ॥ ४ ॥ ॥ सप्तमो नुवाकः ॥

॥ का० ॥ दूष्णा जिना धासं मिध दाधानात्दूसाब्रह्मन्निति जपस्युत्सर्गकालएरके इति । दूष्णा जिनदी

सांत आरभ्योखायां त्रयोदशसमिदाधानांतं कृत्वाऽध्वर्युरेवा ब्रह्मन्निति जपति। उत्सर्गे रूपतिष्ठत इत्यु
क्तगोपिस्थानकाले एके आब्रह्मन्निति जपमिच्छंति। यद्वाश्वस्योत्सर्गकाले विहर्मात्रेति जपानंतरमिति
सूत्रार्थः। आब्रह्मन्। लिंगोक्तदेवता उत्कृतिः। हे ब्रह्मन्। राष्ट्रे अस्मदीये ब्राह्मणो ब्रह्मवर्चसी अध्ययनय
ज्ञादिशीलसंपन्न आजायतां उत्पद्यतां नान्य इति प्रार्थना। यद्वा। ब्राह्मणे ब्रह्मजातिरुत्पन्नः। समस्या
लुक्। वेदपरब्राह्मणि च ब्रह्मवर्चसी अध्ययनज्ञानसंपन्न आजायतां। आमंत्रितत्वात्सर्वं निघाताप
त्तिः। तथा। राजन्यः क्षत्रियोऽस्मदीये राष्ट्रे आजायतां। कीदृशः। शूरः। पराक्रमी। शूर विक्रांतौ। शूर
यतीति शूरः। इषव्यः। इषुभिर्विध्यतीति इषव्यः। यद्वा। इषौ कुशलः इषव्यः। अतिव्याधी। अ संत
विध्यतीत्यतिव्याधी। व्यध ताडने। शत्रुछेदनशीलः। महारथः। एकः सहस्रं जेता। एषोर्थो ब्राह्मणे। ब्राह्म
ब्राह्मणो ब्रह्मवर्चसी जायतामिति ब्राह्मण एव ब्रह्मवर्चसं दधाति तस्मात्पुरा ब्राह्मणो ब्रह्मवर्चसी ज
ज्ञे आराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतामिति राजन्य एव शौर्यं महिमानं दधा
ति तस्मात्पुरा राजन्यः शूर इषव्योऽतिव्याधी महारथो जज्ञ इति ॥१॥ दोग्ध्री धेनुः। लिंगोक्तदेव
ता बृहती। दोग्ध्री दुग्धप्रपयित्री धेनुर्गौर्जायतामित्यनुषंगः। अनड्वान् वृषभो वोढा वोढा उ
स्य वहत्वं उक्षोकल्पे वैकेषामिति प्रातिशाख्यसूत्रेण काण्वमते इति ज्ञेयं। सप्तिरश्वः आशुः शीघ्र
गामी जायतां। योषा स्त्री। पुरंधिः पुरंध्री लादि सर्वगुणसंपन्नं शरीरं गृहं वा दधातीति पुरंधिः। दधा

ते: क्विप्प्रत्ययः। द्वितीयाया अलुक्। रथे तिष्ठतीति रथेष्ठाः। तिष्ठतेः क्विप्। सप्तम्या अलुक्। रथस्थितो
युयुत्सुर्नरो जिष्णुर्जयनशीलो जायतां। आ अस्येति पदच्छेदः। अस्य यजमानस्य युवा सर्वकार्यस
मर्थः। सभेयः सभायां योग्यो वीरः पुत्र आ जायतां। सभायां साधुः सभेयः। छन्दसीति सभाशब्दा
त्साधुरित्यर्थे ढप्रत्ययः। तस्य इयादेशः। ब्राह्मणम्। दोग्ध्री धेनुरिति धेन्वामेव पयो दधाति तस्मा
त्पुरा धेनुर्दोग्ध्री जज्ञे वोढानड्वानित्यनडुह्येव बलं दधाति। तस्मात्पुरानड्वान्वोढा जज्ञे। आशुः सप्ति
रित्यश्व एव जवं दधाति तस्मात्पुराश्वः सर्त्तो जज्ञे पुरंधिर्योषेति योषित्येव रूपं दधाति तस्माद्रूपिणी
युवतिः प्रिया भावुका। जिष्णू रथेष्ठा इति राजन्य एव जैत्रं महिमानं दधाति तस्मात्पुरा राजन्यो जिष्णुर्जज्ञे
सभेयो युवेत्येष वै सभेयो युवा यः प्रथमवयसी तस्मात्प्रथमवयसी स्त्रीणां प्रियो भावुक आस्य यजमा
नस्य वीरो जायतामिति यजमानस्यैव प्रजायां वीर्यं दधाति तस्मात्पुरेजानस्य वीरो जज्ञे इति। २। नि
कामे निकामे नः। लिंगोक्तदेवत्या संहृतिः। नोऽस्माकं राष्ट्रे इत्यनुवर्तते। पर्जन्यो निकामे निकामे। कामने
यां कामनायां। वीप्सायामभ्यासः। वर्षतु। नोऽस्माकं राष्ट्रे ओषधयो यवाद्याः फलवत्यः फलयुक्ताः पच्यं
तां। स्वयमेव पक्वा भवंतु। कर्मकर्तरि लोट्। नोऽस्माकं। योगक्षेमः कल्पतां। योगेन युक्तं क्षेमः। सहक्षेमो भ
वतु। अलब्धलाभो योगः। लब्धस्य परिपालनं क्षेम इति भेदः॥ एषोऽर्थो ब्राह्मणे। निकामे निकामे नः पर्ज
न्यो वर्षत्विति निकामे निकामे वै तत्र पर्जन्यो वर्षति यत्र वै तेन यज्ञेन यजन्ते फलवत्यो न ओषधयः पच्यन्तां

मितिफलेवैसोवैतत्रौषधयःपच्यंतेयत्रैतेनयज्ञेनयजंतेयोगक्षेमोनःकल्पतामितियोगक्षेमोवैतत्रकल्पतेय
त्रैतेनयज्ञेनयजंतेक्लृप्तःप्रजानांयोगक्षेमोभवतीति॥३॥ ॥अष्टमोनुवाकः॥ ॥का०॥आज्यस्तनुधानानांला
जानामेकैकंजुहोतिप्राणायस्वाहेतिप्रतिमंत्रंसर्वरात्रमावर्त्तमिति।आज्यादिचतुर्णांप्रतिप्रहरमेकैकंक्रमेण
सर्वरात्रमुत्तरवेदिस्थाग्नौजुहोतिप्राणायस्वाहेत्यादिस्वर्गायस्वाहेत्यंतानि स्वल्पदर्व्याकंडिकात्रिंशाद्विकंकृत्वा।आव
र्त्तनमुत्पत्त्यंतीयं।प्राणायस्वाहेत्यादिएकमेकस्मैस्वाहेत्यंतंमंत्रगणमावर्त्यावर्त्य।सर्वरात्रमितितद्वितीयाश्रव
णाद्धोमक्रियायारात्रेःकात्स्न्येनसंयोगःकार्यः।ततश्चप्रथमेयामेघृतहोमः।द्वितीयेसक्तुभिः।तृतीयेधानाभिःचि
तुर्थेलाजैः।एकस्मैस्वाहेत्येतस्मिन्ननुवाके।एकस्मैस्वाहाद्वाभ्यांस्वाहेत्यत्रत्रिभ्यःस्वाहा।चतुर्भ्यःस्वाहा।पंचभ्यःस्वाहा।
षड्भ्यःस्वाहा।सप्तभ्यःस्वाहा।अष्टभ्यःस्वाहा।नवभ्यःस्वाहेत्येवमादयोमंत्राअपठिताअपिएकैकोत्तरवृद्ध्येनशतपर्यंता
प्रयोक्तव्याः।एकोत्तराञ्जुहोतीतिब्राह्मणात्।प्राणादयोश्वमेधस्यावयविनोवयवाः।सर्वप्रजापतेरवयवाः।सआ
त्मनइत्यात्मैवस्तूयतइतिभावः।ततोव्युष्टायांसमाप्तायांरात्रौव्युष्ट्यैस्वाहेतिघृताहुतिमेकां।उदितेस्तत्स्वर्गा
यस्वाहेतिद्वितीयांजुहोतीतिसूत्रार्थः॥प्राणायस्वाहा॥लिंगोक्तदेवत्यानियजूंषि।प्राणादयइंद्रियदेवताः
सप्त।प्राणायापानायव्यानायचक्षुषेश्रोत्रायवाचेमनसेइतिप्रतिमंत्रंस्वाहाकारपाठः॥९॥ ॥नवमोनुवाकः॥
प्राच्यैदिशेस्वाहा॥लिंगोक्तदेवत्यानियजूंषि॥प्राच्याइत्यनुवाकेदिग्देवताप्रकाशकाद्वादशमंत्राः॥१॥ ॥
॥दशमोनुवाकः॥ ॥अद्भ्यःस्वाहा॥लिंगोक्तदेवत्यानियजूंषि।अत्रानुवाकेजलदेवताप्रकाशकामंत्राद्वाद
श॥१॥ ॥एकादशोनुवाकः॥ ॥वातायस्वाहा॥लिंगोक्तदेवत्यानियजूंषि।अस्मिन्ननुवाकेमेघोपयुक्तदेव

॥८८॥

०मप्रकाशकाः अष्टादशमंत्राः ॥१॥ ॥[illegible]द्वादशोनुवाकः॥ ॥[illegible]भ्यस्वाहा॥ लिंगोक्तदेवतानियज्ञेषि। इहानु-
वाके ऽग्न्यादिप्रकाशकाद्वादशमंत्राः॥ ॥त्रयोदशोनुवाकः॥ ॥नक्षत्रेभ्यः स्वाहा। लिंगोक्तदेवतानियज्ञेषि।
अत्रानुवाके कंडिकाद्वयात्मके नक्षत्रादिदेवताप्रकाशकाः षट्पंचमंत्राः॥१॥ ॥पंचदशोनुवाकः॥ ॥पृथिव्यैस्वा-
हा॥ लिंगोक्तदेवतानियज्ञेषि। ४ सप्तदशमंत्राः। एतेषु प्रथमकंडिकायां नव। द्वितीयायामष्टाविति विवेकः।
॥२॥ ॥चतुर्दशोनुवाकः॥ ॥मूलेभ्यः स्वाहा॥ लिंगोक्तदेवतानियज्ञेषि। अत्रानुवाके मूलादिदेवताप्र-
काशकाः ४३ अस्मिन्ननुवाके पृथिव्यादिदेवताप्रकाशकामंत्राद्वादश॥१॥ षोडशोनुवाकः॥ ॥अ-
सवे स्वाहा॥ लिंगोक्तदेवतानियज्ञेषि। अत्राप्यनुवाके कंडिकाद्वयात्मके असवादिदेवताप्रकाशकाश्चतु-
र्दशमंत्राः। तत्र प्रथमकंडिकायामष्टौ। द्वितीयायां षडिति विवेकः॥२॥ ॥सप्तदशोनुवाकः॥ ॥मधवे
स्वाहा। लिंगोक्तदेवतानियज्ञेषि। अत्रानुवाके चैत्रादिमासाभिमानिदेवताप्रकाशकामंत्रास्त्रयोद-
श॥१॥ ॥अष्टादशोनुवाकः॥ ॥वाजायस्वाहा। लिंगोक्तदेवतानियज्ञेषि। अत्रानुवाकेऽन्नाभि-
मानिदेवताप्रकाशकामंत्रास्त्रयोदश॥१॥ ॥एकोनविंशोनुवाकः॥ ॥आयुर्यज्ञेनकल्पतां स्वाहा॥ ॥८८॥
लिंगोक्तदेवतानियज्ञेषि। अत्रानुवाके आयुरादिदेवताप्रकाशकामंत्राः षोडश। यज्ञेनाश्वमेधे-
न आयुः कल्पतां संपद्यतां। स्वाहा। सुहुतमस्तु। एवमग्रेप्योज्यं। अत्र समान इति पदं सावग्रहं। य-
न्नः समान इत्याध्वरिके समान इति पदमनवग्रहं। समानोऽनश्वमेध इति प्रातिशाख्येन नाश्वमेधे

इति विशेषोक्तेरिति दिक् ॥१॥ ॥विंशोऽनुवाकः॥ ॥एकस्मै स्वाहा॥ सर्वाणि यजूंषि लिंगोक्तदेवतानि। अत्रा-
नुवाके एकादिशतांतसंख्या देवताप्रकाशका मंत्राः षट्। अन्येप्यपठिताः सूत्रकृता प्रदर्शिताः त्रिभ्यः स्वाहे-
त्यादिशताय स्वाहेत्यंता अष्टाधिकनवतिमंत्राः प्रक्षेप्तव्याः। ततः शताय स्वाहैकशताय स्वाहेति पठित-
मंत्राभ्यामाहुती हुत्वा व्युष्ट्यां रात्रौ सत्यां व्युष्ट्यै स्वाहेत्येतामाहुतिमेकां हुत्वाऽथोदिते सूर्ये स्वर्गाय स्वा-
हेति जुहुयात्। व्युष्ट्यै स्वाहेत्येषानुदित आदित्ये जुहोति स्वर्गाय स्वाहेत्युदितेऽहोरात्रयोरव्यतिमोहायेति
ब्राह्मणोक्तेः। सर्वोप्येषोऽर्थः शतपथब्राह्मणेऽभिहितः॥ तथाहि। अश्वमेधकांडे। प्रजापतिर्देवेभ्यो यज्ञान्व्या-
दिश्यात्मन्नश्वमेधमधत्त ते देवाः प्रजापतिमब्रुवन्नेष वै यज्ञो यदश्वमेधोऽपि नोऽत्रास्तु भाग इति ते-
भ्य एतानन्नहोमानकल्पयद्यदन्नहोमाञ्जुहोति देवानेव तत्प्रीणात्याज्येन जुहोति तेजो वा आज्यं रसं कु-
र्वन्ति जुहोति देवानां वा एतद्रूपं यद्धाना नाम्नि जुहोति नक्षत्राणां वा एतद्रूपं यल्लाजैर्जुहोत्यहोरात्राणां वा एतद्रूपं य-
ल्लाजान नक्षत्राण्येव तत्प्रीणाति प्राणाय स्वाहाऽपानाय स्वाहेति नामग्राहं जुहोति नामग्राहमेवैनां स्वर्ग-
ं लोकं गमयति पराचीर्जुहोति पराङिव वै स्वर्गो
लोक एको नरा जुहोत्येकवद्धि स्वर्गो लोक एकधैवैनं स्वर्गं लोकं गमयति पराचीर्जुहोति नैकशतमस्येति यदे-
लोकः स्वर्गस्य लोकस्याभिजित्यै ईश्वरो वा एष पराङ् प्रदघोऽर्थः पराचीर्जुहोति नैकशतमस्येति यदे-
कशतमतीयादायुषा यजमानं व्यर्द्धयेदेकशतं जुहोति शतायुर्वै पुरुष आत्मैकशत आयुष्येवात्मन्प्र-
तितिष्ठति व्युष्ट्यै स्वाहा स्वर्गाय स्वाहेत्युत्तमे आहुती जुहोति रात्रिर्वै व्युष्टिरहः स्वर्गोऽहोरात्रे एव तत्प्रीणा-

त्तितदाहुर्यदुत्तेदिवावानक्तंवाजुहुयादहोरात्रेमोहयेद्धुष्येस्वाहेत्यनुदितआदित्येजुहोतिस्वर्गायस्वा
हेत्युदितेऽहोरात्रयोरव्यतिमोहाय॥ प्रजापतिरन्योन्यहन्तान्देवेभ्यःप्रायच्छदात्मन्नासन्न्यश्वमेध
मध्यन्तस्थापयामासतेदेवाःप्रजापतिमब्रुवन्नोऽस्माकमपिअत्राश्वमेधेभागोस्त्विति। तद्भवनंस्रुवा
तेभ्यएतानन्नहोमानकल्पयदाज्यसक्तुधानालाजरूपानित्यर्थः॥ ॥अत्रश्रीमद्भगवतोम
हापुरुषस्ययज्ञात्मनोविष्णोरवयविनइवस्थितस्यप्राणादयःसर्वादेवताअवयवभूताः। देवदत्त
स्यावयविनःशिरःपाण्यादय इव। तस्माद्देवतायजमानाध्वर्य्वादिद्वारेणसर्वावयविभूतःश्रीभ
गवान्विष्णुरेवात्रेज्यतइतितात्पर्यमवगंतव्यं। यज्ञेश्वरोहव्यकव्यसमस्तभोक्ताऽव्ययात्माहरि
रीश्वरोत्र। तत्सन्निधानादपयांतिसद्योरक्षांस्यशेषाण्यसुराश्चसर्वे। तथा। खांयोऽजिनश्चितयं
तिखांयजंतिचयज्विनः। हव्यकव्यभुगेकस्त्वंपित्र्यदेवस्वरूपधृक्। कर्त्ताक्रियाणांसयज्ञस्पते
क्रतुःसएवतत्कर्मफलंचतत्स्यात्। स्रुगादियत्साधनमप्यशेषंहरेर्नकिंचिद्व्यतिरिक्तमस्ति। न
॥८९॥ तुर्भिश्चचतुर्भिश्चद्वाभ्यांपंचभिरेवच। हूयतेचपुनर्द्वाभ्यांसमेविष्णुःप्रसीदत्विति विष्णुपुराणोक्तेः।
अहंहिसर्वयज्ञानांप्रभुर्भोक्ताहमेवचेतिगीतोक्तेश्च॥ ॥एकत्रिंशोऽनुवाकः॥ ॥इतिश्री०तावार्थ ॥८९॥
दीपिकायांचतुर्विंशोऽध्यायःसमाप्तः॥ श्रीमते॥ कृष्णायार्पितोस्तु॥ अनेनवेददीपेनमयानीराजितो

हरिः॥ मन्त्रमं सार्थकीकुर्वे समं मन्त्रं परिस्फुटम्॥१॥ ऋषिगम्यो हि वेदार्थो मया कथं न दर्शितः। हरेरनुग्रहेणैव पा
णावामलकं यथा॥२॥ न पाण्डित्याभिमानेन न च वित्तस्य लिप्सया॥ ग्रंथोऽयं रचितः किंतु विदुषां परितुष्टये॥३॥
संति भाष्याण्यनेकानि प्रणीतानि हि सूरिभिः। कोऽप्यस्य महिमा वेदोऽस्ति ज्ञेर्जयति सर्वतः॥४॥ नमो महद्भ्य
श्च नमोऽर्भकेभ्यो नमो युवभ्यश्च नमो व्रतिभ्यः। यो मन्त्रमस्तं परिकालयंतु वेदार्थसंवित्तिपरंपरायै॥५॥
अधिकाधिकृतो ग्रंथो विश्वेशस्य प्रसादतः। अनंताचार्यविदुषाऽनंतदेवप्रसत्तये॥६॥ यत्किंचिन्मम वाचि
त्वं च त्वं म्यं तां क्षिवत्नणाः। गुणग्राहाः सदा संतो बालस्य पितराविव॥७॥ यावद्वेदस्य स्तर्यश्च यावद्वेदः प्र
वर्तते। तावत् [illegible] दूतेय नाकृ थो मल्लतो विष्णवनुग्रहात्॥८॥ ७॥ ॥ ॥ कृष्णायनमः॥ ॐ ॥
चतुर्विंशो होममंत्राउक्ताः। क्रिष्टं कर्मोत्रोच्यते॥ कात्यायनः॥ प्रातरुक्थ्ये म हिमानो गृह्यन्ते सौवर्णे
न पूर्वं हिरण्यगर्भ इति। प्रातर्द्वितीयेऽहनि उक्थ्यसंस्थमहर्भवति तत्र महिम संज्ञौ द्वौ ग्रहौ गृह्णाति। आग्रं
तुत्वा दाग्रयणोक्थ्ययोर्मध्ये तौ गृह्णाति। अंतराग्रयणोक्थ्यावाग्रं तु स्थानं ग्रहाणामिति वचनात्। द्वयो
र्मध्ये पूर्वं महिमानं ग्रहं सौवर्णेनोलूखलेन गृह्णातीति हिरण्यगर्भ इति मंत्रेणेति सूत्रार्थः॥ हिरण्यगर्भः
सं॥ त्रिष्टुप् प्राजापत्या हिरण्यगर्भदृष्टा। हिरण्मयब्रह्मांडगर्भरूपेणावस्थितः प्रजापतिर्हिरण्यगर्भः।
यद्वा हिरण्मयं ब्रह्मांडं गर्भो यस्य स हिरण्यगर्भः परमात्मा। स च भूतस्य सृज्यमानस्य प्राणिजा
तस्याग्रे ॥ पूर्वं समवर्तत। प्राण्युत्पत्तेः पूर्वं स्वयं शरीरधारी बभूव। स एव जातः उत्पन्नमात्रः सन्

एक एवाऽसत्स्यमानस्य सर्वस्य जगतः पतिरासीत्। अत एव सः पृथिवीं विस्तीर्णां द्यां दिवं दाधार दधार अन्त्या
सदीर्घः छांदसः। उत अपि च इमां प्रत्यक्षतः प्रतीयमानां भुवं च दाधार। उपलक्षणमेतत्। चतुर्दशभु
वनानि पृथक्कृत्य धारयामास धृतवान्। धाता यथा पूर्वमकल्पयदिति श्रुतेः। तादृशाय कस्मै प्रजापतये
अलेपदाय कस्मै निर्वक्तुमशक्याय देवाय हविषा विधेम वयं परिचरेम। दधेति दीर्घो नार्थः। हविर्ददध्मः स
र्थः।१। उपयामगृहीतोसि। प्राजापत्यं संपन्नः। उपयमनी स्रुपयामो ग्रहस्तेन गृहीतः। सत्वं हे महिमन् त्वम
त्वमसि। प्रजापतये देवताय त्वा जुष्टं रुचितं त्वा त्वां हे महिमन् त्वां गृह्णामि॥ कां०। एष ते योनिरिति ग्रहसाद
नं। हे ग्रह एषः प्रदेशः तेतव। योनिः स्थानं। द्वयोर्योनिरित्यभिधानात्। सूर्यस्ते तेतव महिमा महा त्वं मू
र्तिः सूर्यः। दीप्यस्व प्रजाः। यद्वा परिवर्तमानः सूर्यस्तव महिमा सुवर्णीस्म कस्य तव कीर्तिः॥ कां०। यस्ते
हन्निति जुहोति। एवं महिमानं जुहोति वषट्कृते सर्वहुतमित्यर्थः॥ यस्ते अहन्॥ देवदेवसंपन्नः। हे महिमन्।
यः तेतव महिमा अहन् समभ्यालुक्। अह्नि दिवसे। संवत्सरे वानिमित्ते संबभूव। उसन्नः। तथा वायो
अंतरिक्षे च यस्तव महिमा संबभूव। तथा दिवि सूर्ये च यस्ते महिमा संबभूव। तेतव तस्मै महिम्ने प्रजा
॥९०॥ पतये देवेभ्यश्च स्वाहा सुहुतमस्तु॥२॥ ॥प्रथमोनुवाकः॥ ॥कां०॥ द्वितीयं राजतेन यः प्राणत इति। नि
गदव्याख्यानेन॥ यः प्राणतः॥ हिरण्यगर्भदृष्टा प्राजापत्या त्रिष्टुप्। तस्मै कस्मै प्रजापतये देवाय वयं हवि ॥९०॥
षा विधेम। हविर्दद्मः तृतीया द्वितीयार्थे। एकः। यः प्रजापतिः प्राणतः। प्रकर्षेण अणिति चेष्टते इति प्राण
तः। तस्य जंगमस्य। निमिषति न चेष्टते इति निमिषतस्य। स्थावरस्य जगतः विश्वस्य एक इत् एक एव

राजा बभूव। केन। महित्वा। महित्वेन। महेर्महिम्नो भावो महित्वं तेन। विभक्तेः पूर्वसवर्णता। यश्चास्य
द्विपदः। द्वौ पादौ यस्य स द्विपात् तस्य। पादः पत् द्विद्वित्रिपदादेः। मनुष्यपश्वादेः। चतुष्पदः हस्तिगवादेः प्रा
णिजातस्य ईशे। ईष्टे। स्वामित्वं करोति। लोपस्त आत्मनेपदेष्विति तकारलोपः ईशे इति रूपं। अथ ईमर्थे चिये
त्रां कर्मणीति कर्मणि षष्ठी। अत्रापि हिरण्यगर्भः परमात्मा वस्तूयते ॥१॥ उपयामगृहीतोसि। हे महिमन्
ग्रहत्वं उपयामेन गृहीतोसि। प्रजापतये जुष्टं त्वां गृह्णामि। सादयति एष ते योनिरिति पूर्ववत्। हे राजत
ग्रह। चन्द्रस्ते तव महिमा दीप्तिः ॥ कां०॥ वपां तेद्धिती येन पूर्ववत् यस्ते रात्राविति जुहोति। वपायामां ते द्वितीये
न महिम्ना पूर्ववदिति सर्वहुतं महिमानं जुहोति सर्वः। यस्ते रात्रौ। अश्विः। हे महिमन् रात्रौ संवत्सरे च
यस्तव महिमा संबभूव। पृथिव्यामग्नौ च यस्ते महिमा संबभूवान्नत्रे षु वं इमसि च यस्ते महिमा सं
बभूव। तस्मै तव महिम्ने। प्रजापतये। देवेभ्यश्च स्वाहा सुहुतमस्तु ॥२॥ इति पंचविंशो द्वितीयोनुवाकः ॥
॥ कां०॥ युनक्त्येनं युंजंति युंजेत्र ध्नमिति। अश्वं रथे युनक्ति स्पर्धः ॥ युंजंति ब्रध्नं ॥ मधुछंदा दृष्टा
आदित्य देवता गायत्री। तस्थुषः। विभक्ति व्यत्ययः। तस्थिवांसः कर्मार्थमिति न्यायेनास्थिताः ऋत्विजः
ब्रध्नमादित्यं युंजंति। रथेषु योजयंति। अश्व आदित्यत्वेन स्तूयते। यद्वा ब्राह्मणमग्नीत्वात् ब्रध्नोश्वस्तं युं
जंति। कीदृशं। अरुषं। रोषति कुध्यतीति रुषः। इगुपधेति कप्रत्ययः। न रुषो ऽरुषस्तं। क्रोधरहितं।
परिचरंतं। वैदिककर्मसिध्यर्थं सर्वत्र गच्छंतं। यस्मात् भस्य रोचना विभक्ति लोपः। रोचनाः दीप्तयः दि

अकारः =

मा

वि आकाशे रोचंते प्रकाशंते । यद्वा रोचना निदीप्तानि चंद्रग्रहतारकादीनि यस्य ब्रध्नस्य भासा रोचंते । तेजः
सांगो लोकः सूर्यः । नक्षत्राण्यंबुगोलकादीति ज्योतिःशास्त्रोक्तेः । यद्वा ब्रध्नं परमात्मानं रथे शरीरे युंजंति ।
तदधिष्ठितत्वाच्छरीरं चेष्टत इति ज्ञानं लभंत इत्यर्थः । यो विज्ञाने तिष्ठन्विज्ञानादंतरो यं विज्ञानं वेद यस्य विज्ञानं
शरीरं यो विज्ञानमंतरो यमयतीति श्रुतेः । येन परमात्मना दिवि रोचना । आकाशे स्थितानि सूर्यचंद्रादि
तेजांसि सिद्दीप्या त्रिमातीनि रोचंते । तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुतेः । ब्रध्न
शब्दस्यादित्यपरत्वे ब्राह्मणं । युंजंति ब्रध्नमरुषं चरंतमिति असौ वा आदित्यो ब्रध्नोरुषोमुमेवास्मा आदि
त्यं युनक्ति स्वर्गस्य लोकस्य समष्ट्या इति ॥ का० ॥ इतरांश्च युंजंत्यस्येति । इतरांस्त्रीनश्वान्रथे युनक्ती
त्यर्थः ॥ युंजंत्यस्य । अश्वदेवत्या गायत्री । ऋत्विजः । हरी हरिता । वचनव्यत्ययः । अश्वान्रथे युंजंति । कीदृ
शौ हरी । अस्य आश्वमेधिकाश्वस्य काम्या । काम्यौ । काम्यते इति काम्यौ । कामसंपादिनौ । एकस्य रथवाह
नासामर्थ्यात् । विपक्षसा । पक्षपरिग्रहे इति धातोरसुन्प्रत्ययः पक्षयंति शरीरं परिगृह्णंतीति ते पक्षसः
पक्षाः विविधाः पक्षसौ ययोस्तौ विपक्षसौ । यद्वा विरिति पक्षिनाम वेतेर्गतिकर्मण इति यास्कोक्तेः । वेः ॥ ९१ ॥
॥ ९१ ॥ पक्षिण इव पक्षसौ ययोस्तौ । शोणा । शोणौ रक्तवर्णौ । धृष्णू प्रागल्भौ । ञिधृषा प्रागल्भ्ये अस्मात्क्नुप्र
त्ययः । नृवाहसा । नॄन्नरान्वहतस्तौ नृवाहसौ । वहेरसुन्प्रत्ययः सर्वत्र विभक्तेराकारः ॥ २ ॥ का० ॥ अंगपा
याताः वेष्टेषु वाचयतीति यद्वा तइति । चतुर्भिर्हिरण्मयैर्युक्तं रथमध्वर्युयजमानावारुह्य सन्नेपादिजल्लेगंवा

हूं प्रवि [illegible] घम्बेषु अध्वर्युर्यजमानं वा वपति॥ यद्वातः। बृहती अश्वस्तुतिः। सिंहो माणवक इतिवत्। वातः वा
तस्समानो वेगो यस्य॥ यत् यस्मात् अपः जलानि अगनीगन्। इंद्रस्य प्रियाणि त्वं वारी रेव अगनीगन्। अस्य अर्थ
मगच्छत्। दाधर्त्ति दर्धर्त्ती त्यादिना यङ्लुगंतो निपातः। अतः कारणात् हे स्तोतः। हे वायो। वायुर्वै स्तोतेति श्रुतेः।
एतं नोस्माकं मम अनेन पथा मार्गेण एनं गतः तस्तेन स्पर्थः। पुनः आवर्त्तयासि। आवर्त्तय। आनय। त्वे टो डुट
विसर्गः। अत्रेन्द्रशब्देन विष्णुरुच्यते। तस्य जलरूपाणि स्थितानि जलं वारीरस्तेषाम्। ३॥ का०॥ आयाय विमुक्तम
श्वं महिषी। वावाता परिवृक्ता ऽन्येनाभ्यंजंतीति पूर्वकाय मध्यापरकाया न्यथादेशं वसवस्त्वेति प्रतिमंत्रं।
आयायेन लप्रदेशेन [illegible] समाग सरथाद्विमुक्तमश्वं महिष्याद्यास्तिस्रः पत्न्यो यथाक्रमं अश्वस्य पूर्वा
दिकायान् घृतेनाभ्यंजंति। महिषी पूर्वकायं। वसवइति। वावाता देहमध्यं रुद्रास्त्वेति। परिवृक्ता पश्चाद्भागमा
दित्यास्त्वेति मंत्रेणेति सूत्रार्थः॥ वसवस्त्वा। त्रीणि यजूंषि लिंगोक्तदेवत्यानि। हे अश्व। वसवोष्टौ देवाः गा
यत्रेण छंदसा तद्रूपेणाज्येन। त्वा त्वां अंजंतु स्निग्धं कुर्वंतु। रुद्राः एकादश। त्रैष्टुभेन छंदसा त्वा त्वां अंजंतु।
आदित्याः द्वादश जागतेन छंदसा त्वां अंजंतु। एषोर्थो ब्राह्मणे विहितः॥ वसवस्त्वांजंतु गायत्रेण छंदसेति
महिष्यनक्ति तेजो वा आज्यं तेजो गायत्री। तेजसी एवास्मिन्समीचीदधाति रुद्रास्त्वांजंतु त्रैष्टुभेन छं
दसेति वावाता। दित्यास्त्वांजंतु जागतेन छंदसेति परिवृक्तेति। ४॥ का०॥ अश्वस्य माना [illegible] सौवर्णा
वयवेधने= नेकशतमेकशतं केसरपुच्छेष्वाबध्नंतीति न वर्वः स्वरिति प्रतिमहाव्याहृति। महिष्याद्यास्तिस्रः स्त्रियः एका
धिकशतमेकशतं सुवर्णमयमणीन् यथानिपतंति तथा केसरयोः शिरः स्कंधस्थयोः पुच्छे च बध्नंतीति क्रमेण

भूरिति प्रतिमहाव्याहृतीतिस्र आर्थाः। भूर्भुवः स्वर्लाजीन् । लिंगोक्तदेवतानियंत्रेति। भूरिति प्रथमा व्या
हृतिः। भुवइति द्वितीया। स्वरिति तृतीया। एतास्तिस्रो व्याहृतयः पृथिव्यादिलोकत्रयनामानि। एतदु
च्चारणपुरःसरं प्रजापतिनो लोकत्रयस्य सृष्टत्वात्। यद्वा। एता ऋग्वेदादिवेदत्रयनामानि। भूरित्यृ
ग्वेदो भुवइति यजुर्वेदः स्वरिति सामवेदः। भूरित्ययं लोको भुवइत्यंतरि[illegible]क्षं स्वरित्यसौ लोक इति
श्रुतेः। यद्वाऽऽहवनीयाद्यग्नित्रयनामानि। भूरित्याहवनीयो भुवइति गार्हपत्यः स्वरित्यन्वाहार्यपचन
इति श्रुतेः। यद्वा। अग्न्यादिदेवतानामानि। भूरित्यग्निर्भुव इति वायुः स्वरित्यादित्य इति श्रुतेः। तदाहु
र्यन्नर्चा न यजुषा न साम्नाग्निराधीयते केनत्वग्निराधीयत इति। धानकांडे व्याहृतीनां भूयात्मं
हिरण्मयमणः हिमावगम्यते। अत्र तु। एकहातमेकहालंकोवाना[illegible]वयंति। तायुर्वै पुरुष आत्मैकहात आयुष्येवू
त्मस्मिति तिष्ठति भूर्भुवः स्वरिति प्राजापत्याभिरावयति प्राजापत्यो भ्वः स्वयैवैनं देवतया समर्द्धय
तीति ब्राह्मणोक्तेः प्रजापतिपरत्वेनव्याख्यायते। व्याहृतीनां प्राजापत्यत्वे प्रजापतिदृष्टत्वेन हिअ
स्वत्वे भूरसि। प्रजापतिरसि। त्वां मणिभिरावयामि। हे भ्व। त्वं भुवोसि। प्रजापतिरसि। त्वां मणिभि
रावयामि। हे भ्व। त्वं स्वरसि। प्रजापतिरसि। त्वां मणिभिरावयामि। स्वष्टस्यपोरौत्रेदो यथारादृष्टे ॥९२॥
स्य प्रजापतित्वेमित्यवधेयं॥ का०॥ अश्वायपराभिहुतशेषं प्रयच्छति लाजीञ्छाचीनिति। सक्तुधानालो
॥९२॥ नादिसक्तुपंरात्रिहुतशेषमश्वायप्रददाति। नव्याख्या। अश्वानां निके चेत्ताले प्रक्षिपेत्। सर्षः। लाजीञ्छा
वीन्॥ अश्वदेव सैंयजुः। लाजीन्। लाजान्। शाचीनसक्तून्। वर्णवन्तस्य यच्छाद्दसः। यव्ययव्य। धाना

सम्महं। गव्ये गव्यं दध्यादि। विरक्तिव्यसनयः। एतत्सर्वमश्वायोपहरामीति निर्दोषः। उपहरणेनकेवलमश्वार्थी
कृतं हर्षान्याय्यमपीत्याह। एतदिस्यादिना। हे देवाः। एतदन्नं मयोपहृतं अनेन ते न्वयत। एवं सामान्येन देवेभ्यो
दत्वाऽथ पुनः प्राधान्यात्प्रजापतये प्रयच्छति एतदिति। हे प्रजापते अश्वमेधस्वामिन् त्वं एतदन्नं अद्धि नु त्वय
अदनं कृणे। ७ लाजीञ्छाचीनिस्य। आमन्त्रणे प्लुतश्छांदसः। एषोऽर्थो ब्राह्मणे। लाजी३ञ्छाची३न्यव्य
गव्य इत्यसतिरिक्तमन्नमश्वायोपावहरति प्रजामेवान्नादीं कुरुते एतदन्नमत्त देवाः एतदन्नमद्धि प्रजापत इ
ति प्रजामेवान्नाद्येन समर्धयतीति ॥५॥ का०॥ ब्रह्मा पृच्छति होतारं यूपमभितः कः स्विदेकाकी चरति।
यूपस्य दक्षिणत उदङ्मुखो ब्रह्मा यूपोत्तरतो दक्षिणामुखं होतारं पृच्छतीत्यर्थः। कः स्विदेकाकी च
रति। ब्रह्मोद्यं कर्म पि होतुर्ब्रह्मणश्च प्रश्नप्रतिप्रश्नरूपतया ख्यातत्वाऽनुष्टुभः॥ स्विदिति वितर्के प्रश्ने
वा। हे होतः। एकाकी। असहायः कश्चरति तिस्वित्। उ। तथा। कः स्वित्विनष्टः सन्पुनर्जायते। किंस्वि
द्धिमस्य नीहारस्य भेषजं तस्य वा भेषजं ओषधं। उ। तथा। किं स्वित्। महत्। आवपनं। आसमंताद्वप्यतेय
स्मिंस्तत्। ६॥ का०॥ सूर्य इत्याचष्टे। होतैवं पृष्टो ब्रह्माणं प्रत्याहेत्यर्थः। सूर्य एकाकी चरति। सूर्यो वरेऽ
सयोगच्छति। चंद्रमाः कृष्णपक्षे क्षीणः पुनः शुक्लपक्षे जायते कलाभिरुपचीयते॥ हिमस्याग्निर्भेषजम्॥
कृभिरयं लोको महदावपनं। आवापस्थानं। एषोऽर्थो ब्राह्मणे॥ अपवा एतस्मात्तेजो ब्रह्मवर्चसं क्रा
मति योऽश्वमेधेन यजते होता च ब्रह्मा च ब्रह्मोद्यं वदत आग्नेयो वै होता बार्हस्पत्यो ब्रह्मा ब्रह्मव

हस्पतिस्तेजस्येवास्मिन्ब्रह्मवर्चसं च समीचीधत्तो यूपमभितो वदतो यजमानो वै यूपो यजमानमेवैतत्तेजसा
च ब्रह्मवर्चसेन चोभयतः परिधत्तः कः स्विदेकाकी चरतीत्यसौ वा आदित्य एकाकी चरत्येष ब्रह्मवर्चसं ब्रह्म
वर्चसमेवास्मिंस्तद्धत्तः कउ स्विज्जायते पुनरिति चन्द्रमा वै जायते पुनरायुरेवास्मिंस्तद्धत्तः किंउ स्विद्धिमस्य
भेषजमित्यग्निर्वै हिमस्य भेषजं तेज एवास्मिंस्तद्धत्तः किमावपनं महदित्ययं वै लोको आवपनं महदस्मि
न्नेव लोके प्रतितिष्ठतीति ॥ ७ ॥ का० ॥ होता ब्रह्माणं का स्विदासीदिति । पृच्छतीति शेषः ॥ का स्विदासीत्पू
र्वचित्तिः । पूर्वं चित्यते इति पूर्वचित्तिः । सर्वेषां प्रथमं स्मृतिविषया । का स्विदासीत् । बृहद्वयः । महान्पक्षी । किं
स्विदासीत् । पिलिप्पिला । का स्विदासीत् । पिशंगिला च का स्विदासीत् । ८ ॥ का० ॥ अथ होतारं प्रत्याह । ब्रह्मा
होतारं प्रतिवक्तीत्यर्थः । द्यौरासीत् । पूर्वचित्तिः । सर्वेषां प्रथमं स्मृतिविषया द्यौः वृष्टिरासीत् । द्योना
बेन वृष्टिर्लक्ष्यते । सर्वप्राणिनामभिष्टत्वात् । अश्वो बृहद्वय आसीत् । अश्वशब्देनाश्वमेधो लक्ष्यते । अश्व
मेधेन वयस्येव स्वर्गमारोहतीत्यश्वमेधो वयः । अवतीत्यविः पृथिवी अवीर्वा पिलिप्पिलासीत् । वृष्ट्या
हि पिलिप्पिला स्निग्धरूपा भवति । श्रीश्च संपदा पिलिप्पिला भवति । रात्रिः पिशंगिला । पिशं शितरूपना
म । [illegible] पिशंरूपं गिलतीति पिशंगिला । रात्रौ हि सर्वाणि रूपाण्येतर्हि लानि भवन्ति । एषोऽर्थो ब्राह्मणे ॥ का

॥ ९३ ॥

स्विदासीत्पूर्वचित्तिरिति द्यौर्वै वृष्टिः पूर्वचित्तिर्दिवमेव वृष्टिमवरुन्धे किं स्विदासीद्बृहद्वय इत्यश्वो
वै बृहद्वय आयुरेवावरुन्धे का स्विदासीत्पिलिप्पिलेति श्रीर्वै पिलिप्पिला श्रियमेवावरुन्धे का स्विदासीत्पि

गंगिले सहोरात्रे वै पिशंगिले अहोरात्रयोरेव प्रतितिष्ठतीति ॥१॥ ॥इति पंचानुवाकः॥ ॥का० ॥ अश्वप्रोक्षणम
ह्य स्त्वा वायुष्ट्वेति । अध्वर्युरश्वं ध्यीन्यः प्रोक्षामीति सोमिकेन मंत्रेण वायुष्ट्वेत्यस्य देवः सविता दध्याविति
पंचकं ऽ कात्मके नाश्वमेधिकेन चाश्वप्रोक्षणं करोतीति सूत्रार्थः ॥ वायुष्ट्वा पचतैरवतु । पंचापि मंत्रा अश्वदे
वत्याः अनुष्टुभः । हे अश्व वायुः पचतैः पाकैः । पचते मृदं भूयज्ञिप पिन्व व्यधिनामिहा व्यातं ऽऽदिसतत्वत्र
स्यः भूतेपि छत्रं यं तइतितत्तार्थः । त्वां त्वां अवतु । वायुसंयोगाद्ध्यग्निः शीघ्रं पचति । तथा असितग्रीवः । धूमेना
सिता ग्रीवा यस्यस्ते सत्तथा ऽग्निः छागैः त्वामवतु । अग्निर्वा असितग्रीव इति श्रुतेः । कृष्णग्रीव आग्नेयो ररा
टे इति वक्ष्यमाणत्वादश्वमेधांगेषु कृष्णग्रीवादयः पंचदशपर्यग्न्याः पशवः संति । तैः पशुभिरग्निस्त्वामव
त्वित्यर्थः । तथा । न्यग्रोधो वृक्षः चमसैः सोमपात्रैः त्वामवतु । तथा । शाल्मलिवृक्षविशेषः । वृध्या वर्द्धनेन त्वा
मवतु । शाल्मलिर्वीहि बहुलं वर्द्धते । एषोर्थो ब्राह्मणे ॥ नियुक्तेषु पशुषु प्रोक्षणीरध्वर्युरादत्ते श्वं प्रोक्षितुं यन्नत्वा
रब्धे यजमानत्वाध्वर्यवि कं यजुरन्तरु सा श्वमेधिकं यजुः प्रतिपद्यते । वायुष्ट्वा पचतैरवत्विति वायुरेवैनं पच
ति असितग्रीवश्छागैरित्यग्निर्वा असितग्रीवो ऽग्निरेवैनं छागैः पचति न्यग्रोधश्चमसैरिति यत्र वै देवा यज्ञेना
यजंत । त एतान् चमसान्न्यौब्जन् ते न्यंचो ऽरोहन् तस्मान्न्यंचो न्यग्रोधा रोहंतीति शाल्मलिर्वृध्येति शाल्म
लेर्वृद्धिं दधाति तस्माच्छाल्मलिर्वनस्पतीनां वर्षिष्ठं वर्द्धत इति ॥१॥ एष स्य राथ्यो वृषा । स्यः सः एषः वृषा
सेक्ताऽश्वः राथ्यः रथे साधुः सन् चतुर्भिः पद्भिः पद्भिः पादैः । दंससस्य मर्द्धन्या ज्ञाक छांदसः । एदगन् । आ

रन् अगन् इति वेदः । आजगाम । अश्वो हि त्रिभिः पादैस्तिष्ठति । चतुर्भिरागच्छतीति चतुर्ग्रहणं । किंच । अकृष्णः ।
नास्ति कृष्णं ऽलांछनं यस्मिन्स तथा । ब्रह्मा चंद्रमाः परमात्मा वा वो देवानोस्मानवतु । अग्नये नमो नमस्का
रोस्तु । एषोर्थो ब्राह्मणे । एषस्यराध्यो वृषेत्यश्वेनैव रथं संपादयति तस्मादश्वो नान्यथा वहति । पद्भिश्च
तुर्भिरेदगन्निति तस्मादश्वस्त्रिभिस्तिष्ठंस्तिष्ठत्युत्तस्थयुक्तः सर्वैः पद्भिः सममायुते ब्रह्मा कृष्णश्च नोवत्वि
ति चंद्रमा वै ब्रह्माऽकृष्णश्चंद्रमसमेवैनं परिददाति नमोग्नय इत्यग्नय एव नमस्करोतीति । २ ॥ संशि
तो रश्मिना रथः ॥ अश्वदेवत्यानुष्टुप् । संपूर्वः श्यतिधातुः श्रोत्तनार्थः । रथः रश्मिना रज्ज्वा कृत्वा संशि
तः । दर्शनीयो भवति । तथा । हयः रश्मिना संशितः । तीक्ष्णितो भवति । अप्सुजाः अप्सु जायते ऽप्सुजाः । जातिवि
वक्षायोश्वोपि अप्सु अद्भिः संशितः क्षालनेन तीक्ष्णितो भवति । तथा । ब्रह्मा वेदो ब्राह्मणो वा सोमपुरोगवः ।
सोमः पुरोगवः पुरोगामी यस्य स तथा । वकार आर्षः । सोमसंबद्धः सन् संशितो भवतीति पूर्वेणान्वयः ॥
एषोर्थो ब्राह्मणे । संशितो रश्मिना रथ इति । रश्मिनैव रथं संपादयति तस्माद्रथः पर्युतो दर्शनीयत
मो भवति संशितो रश्मिना हय इति रश्मिनैवाश्वं संपादयति तस्मादश्वो रश्मिना प्रतिहितो भूयिष्ठं

रोचते संशितो अप्स्वप्सुजा इत्यप्सुयोनिर्वा अश्वः स्वयैवैनं योन्या समर्धयति ब्रह्मा सोमपुरोगव
इति सोमपुरोगवमेवैनं स्वर्गं लोकं गमयतीति ॥ ३ ॥ स्वयं वाजिन् । अश्वदेवत्या विराट् । हे वाजिन्
तन्वं शरीरं स्वयं कल्पयस्व । स्वच्छां पीनं कुरुष्व । यारत्नामि [illegible] ताद्यत्राभिरर्थः । अतः स्वयं यजस्व । न

॥ ९४ ॥

तवान्योयष्टास्ति। स्वयं जुषस्व। इष्टं स्थानं सेवस्व। यतस्ते तव महिमा अन्येन अन्यदीयमहिम्ना न संनन्नो। न
संनन्नयते। नातिक्रम्यते। सर्वोत्कृष्टस्तव महिमेत्यर्थः। तलोपेयलोपेवनत्रोइतिरूपं। एषोर्थो ब्राह्मणे। स्व
यं वाजिंस्तन्वं कल्पयस्वेति स्वयं रूपं कुरुष्व यादृशमिच्छसीत्येवैनं तदाह स्वयं यजस्वेति स्वाराज्यमे
वास्मिन्दधाति स्वयं जुषस्वेति स्वयं लोकं रोचयस्व यावंतमिच्छसीत्येवैनं तदाह महिमा तेऽन्येन
संनन्नश इत्यस्यैवमेव महिम्ना समर्धयतीति। परमात्मपरत्वे तु। वाजोन्नं विद्यते यस्य स वाजी तत्संबोधने हे
वाजिन् हे सर्वयज्ञभोक्तः। त्वं तन्वं शरीरमवताररूपं स्वयं स्वस्वरूपभूतं कल्पयस्व। तवावताररूपाणि न क
र्मानुबंधीनीत्यर्थः। शिष्टं मुख्यार्थे॥४॥ नवाउएतन्। अश्वदेवत्या त्रिष्टुप्। हेऽश्व। अस्माभिर्यत्त्वं संज्ञ
प्यसे। एतत्त्वं न म्रियसे। मरणं प्रथगजनवन्नाप्नोषि। न रिष्यसि च। विनाश्यमानो न हिंस्यसे। वैउ। निपातो
सत्यार्थको। यतः यतः सुगेभिः सुगैः। भिसऐसत्वाभावश्छांदसः। सुखेन गम्यन्ते येषु ते सुगाः तैः। सुदुरोर
धिकरण इति गमेर्डप्रत्ययः। साधुगमनैः पथिभिः देवयानमार्गैः देवानित् इत्। देवान्प्रति एषि गच्छसि। इ
णगतौ। किंच। सुकृतः साधुकारिणो नरा अतिधर्मपराः यत्र लोके आसते तिष्ठंति। यत्र ततोपि श्रेष्ठे
लोके ते सुकृतः ययुर्गताः। तत्र लोके सविता सर्वप्रेरको देवः त्वा त्वां दधातु। स्थापयतु। एषोर्थो ब्राह्मणे॥
न वाउ एतन्म्रियसे न रिष्यसीति प्राणा वा सम्यस्यैवैनं तद्देवां इदेषि पथिभिः सुगेभिरिति देवयानानेवैनं

पथोदर्शयतियत्रास्ते सुकृतो यत्र ते ययुरितिसुकृद्भिरेवैनं तं लोकं करोति तत्र त्वा देवः सविता दधात्विति स
वितैवैनं स्वर्गे लोके दधातीति ॥ ५ ॥ का० ॥ उपगच्छन्त्यपां पेरुः अग्निः पशुरिति । अपां पेरुरिति प्राकृतेन
मंत्रेण अग्निः पशुरिति वैकृतेनच प्रोक्षणीरध्वर्युरुपगच्छतीति सूत्रार्थः ॥ अग्निः पशुरासीत् । अग्न्य
देवत्यानि त्रीणि यजूंषि । पुरा किल साध्यानां देवानामग्निः पशुरासीत् । तेनाग्निना पशुनाते ऽयजंत ई
ज्ञिरे । सः पशुभावमुपगतोऽग्निः एतं लोकं पृथिवीलोकं अग्निर्लोकं वा अजयत् । यस्मिंल्लोकेऽग्निः । हे ऽध्व
र्यो लोकस्तेतव भविष्यति । तं लोकं त्वं जेष्यसि । एताः प्रोक्षणीरपः पिब । एवमेव वायुः पशुरासीत् सूर्यः पशु
रासीदितिच । व्याख्येयं । वायुलोकोऽन्तरिक्षलोकः सूर्यलोकः स्वर्गः इति विशेषः । एषोऽर्थो ब्राह्मणे । अग्निः प
शुरासीदिति मंत्रं पठित्वा यावानग्नेर्विजयो यावांल्लोको यावदैश्वर्यं तावांस्ते विजयस्तावांल्लोकस्ताव
दैश्वर्यं भविष्यतीत्येवैनं तदाहे सादिना ॥ ६ ॥ ॥ चतुर्थोनुवाकः ॥ ॥ का० ॥ परिपशव्ये हुत्वा प्राणाय स्वाहेति
तिस्रो ऽपराः । परिपशव्ये स्वाहा देवेभ्यो देवेभ्यः स्वाहेति द्वे आहुती हुत्वा प्राणायेत्याद्यास्तिस्र आहुती
र्जुहोति । एकाम्नसंकल्पनादेः । चतस्रो त्वइति सूत्रार्थः ॥ प्राणाय स्वाहा ॥ त्रीणि यजूंषि । प्रकर्षे ॥ ९५ ॥
णानिति चेष्टते चेष्यते वा प्राणो वायुस्तस्मै स्वाहा सुहुतमस्तु । एवमपानितीत्यपानस्तस्मै स्वाहा ॥ विवि
॥ ९५ ॥ धं अनितीति व्यानस्तस्मै स्वाहा । आभिराहुतिभिरश्वं प्राणवंतं करोति । प्राणाय स्वाहा ऽपानाय स्वा
हा व्यानाय स्वाहेति संजप्यमान आहुतीर्जुहोति प्राणानेवास्मिंस्ते दधाति तथा हास्यैतेन जीवते

वयम्कन्नेष्ये भवतीति बालत्वात् ॥ का० ॥ वाचयति पत्नीर्नयन्नमन्तं बहूति । सर्वाः पत्नीः पत्नीशालातो धनायप्रांने
जनीहस्ताः पश्चात्प्रदक्षिणं नयन्तं नमस्ते आतानेति प्राग्वृत्तं मंत्रं अंबे बइस्या स्वमेधिकं च वाचयस्व युरिति
सूत्रार्थः ॥ अंबे अंबिके ॥ अम्बू देवस्यानुष्टुप् । पत्न्यः परस्परं वदंति हे अंबे हे अंबिके हे अंबालिके । ना
मान्ये तानि तासां । कश्चन । कश्चिदपि नरो मां न नयति अश्वं प्रति न प्रापयति । तर्हि किमर्थं गम्यते तत्राह ।
अम्बकः । कुत्सितोऽश्वोऽश्वकः । अकुत्सितोऽपीर्ष्यया कुत्स्यते । सुभद्रिकां । कुत्सिता सुभद्रा सुभद्रिका । ईर्ष्यया
कुत्स्यते । कुत्सिते कप्रत्ययः । प्रत्ययस्थात्कात्सर्वं स्यात इदाप्यसुप इतिकारः । तां नारी मादाय ससस्ति शेते ।
न्यधिष्यते । ससस्ति स्वप्ने इति धातुः कौदि । मम नागमने अश्वोऽन्यामादाय शयिष्यते इति हेतोर्मया गम्य
ते । न तु बलान्मां कश्चिन्नयतीति भावः । किंभूतां सुभद्रिकां । कांपीलवासिनीं । कांपीले नगरे वसतीति
कांपीलवासिनी तां । तत्र हि विदग्धाः सुरूपाः कामिन्यो भवंति । अतः परमेव गच्छामीत्यर्थः । यद्वाऽश्वकः
तरुणः कांपीलवासिनीं सुभद्रिकां कल्याणरूपां स्त्रियं परिगृह्य शेते । अतोऽहमेव गच्छामीति । औपोऽनु
बाणो वृष्णावश्विबिंबे बालेः । कविकल्पर्वइति भावः । समस्तायेमंत्रः स्यां विनियुक्तोऽतस्तत्परत्वे
न व्याख्यायते । अंबादिशब्दा जननीवाचकाः । हे अंबे जननि । हे अंबिके । हे अंबालिके । मातः । आभ्यास
आदरार्थः । कश्चन कोऽपि नरो मां न नयति । न वशी करोति स्वप्रसादात् । यतः । कांपीलवासिनी । सुरभि
देशवासिनी सुभद्रिकां परमं मंगलरूपां त्वां प्रति सन्शेते अश्वकः पशुः । यथा पशुः स्वहितं न वेद तथा

त्वस्तज्जादिकं न जानातीत्यर्थः। अत एव सस्मस्ति। सर्वकार्येष्वोते।७॥का०॥ अश्वं त्रिस्त्रिः परियंतिपित्नवनमध्येगणा
नां प्रियाणां निधीनामिति। सर्वाः पत्न्यः पान्नेजनी हस्ताः एव प्राणन्नोपनात्त्राक् अश्वं त्रिस्त्रिः परियंति मध्येपि
त्वदप्रदक्षिणं परियंति त्रिः। त्रिस्त्रिर्मंत्रैः। वसो ममेति त्रिष्वप्यनुषज्यते। ततश्चैवं। प्रथमं गणानामिति त्रिः
प्रदक्षिणं परियंति। तत्र सकृन्मंत्रेण। द्विस्तूष्णीं। ततः प्रियाणामिति सप्रदक्षिणं त्रिः। निधीनामिति प्रदक्षिणं त्रिः।
एवं नव कृत्व इति सूत्रार्थः। गणानां त्वा। त्रीणि यजूंषि लिंगोक्तानि। हे अश्व। वयं त्वा त्वां हवामहे। आह्वयामः।
कीदृशं त्वां। गणपतिं गणानां। गणानां मध्ये गणपतिं गणरूपेण पालकं। प्रियाणां वल्लभानां मध्ये। प्रियपतिं। प्रि
यस्य पालकं। निधीनां सुखनिधीनां मध्ये निधिपतिं सुखनिधेः पालकं। हे वसो। वसुरूप। वसेति यस्मिन्न
रा इति वसुः। ततः स्मबोधनं वसो। अश्व। मम पतिस्त्वं भूया इति शेषः। अयं स्कस्य। गणपति प्रजायां विषु
कृत्वान्नसंरोयोज्यः॥ का०॥ प्रक्षालितेषु महिष्यश्वमुपसंविशति आहमजानीति। प्रक्षालितेषु निष्प्रितेषु
पश्रूतां प्राणेषु पत्नीभिरध्वर्युणा यजमानेन प्राणन्नोपनेकृते सति महिषी अश्वसमीपे शेते इत्यर्थः। आह
मजानि॥ अश्वदेवसंयजुः। हे अश्व गर्भधं गर्भधारकं रेतः अहं आ अजानि। आकृष्य क्षिपामि। अजगतिक्षेप

णयोः। लोट्। त्वं च गर्भधं रेतः आ अजासि। आकृष्य क्षिपसि। तौ त्वं च अहं च वै स्युतो। चतुरः पदः पादान्॥ ॥१६॥
आवां संप्रसारयाव। प्रसारणं कुर्वः। तव द्वौ पादौ मम द्वौ इति चत्वारः। एवं संवेशन प्रकारः॥ का०॥ अधीवा
सेन प्रच्छादयति स्वर्गे लोके इति। अधीवासेनाश्वमहिष्यौ छादयति। अध्वर्यु परिशिष्टाच्छ। छादनं द्वमं वासो
धीवासः महद्वस्त्रं॥ स्वर्गे लोके। अश्वदेवत्ये। अध्वर्युर्वदति। हे अश्व महिष्यौ युवां स्वर्गे लोके। समन्य इदेह

प्रोर्णाघं। वासस्त्राच्छादयत। ऊर्णुञ् आच्छादने। एषवैस्वर्गोलोकोयत्रपशुंसंज्ञपयंतीतिश्रुत्यायज्ञभूमेःस्वर्गसाध
नत्वात्स्वर्गत्वमुच्यते। का०॥ अश्वशिश्नमुपस्थेकुरुतेवृषावाजीति। महिषीतिशेषः॥ वृषावाजी। अश्वेदेवसंयन्तुं।
वृषासिक्ता। रेतोदधातीतिरेतोधाःवाजी अश्वोमेधिरेतोदधातु स्थापयतु॥२०॥ ॥पंचमोनुवाकः॥ ॥उत्सक्थ्याइत्य का०॥२
श्वंयजमानोभिमंत्रयते॥ उत्सक्थ्याअव। अश्वदेवत्यागायत्री। हेवृषन्। सेक्तः अश्व। महिष्याःगुदंअव। अवगु
पर्यर्धः। गुदोपरिरेतोवीर्यंधेहि। रेतहूसनुषज्यते। कीदृश्याः। उत्सक्थ्याः। ऊर्ध्वेसक्थिनीऊरूयस्याःसाउ
त्सक्थी तस्याः। कथमिस्यत आह। अंजिं लिंगं संचारय। अनक्तिव्यनक्तिपुंस्त्वमितिअंजिःस्तं। लिंगंयोनौप्रवे
शय। योंजिः स्त्रीणांजीवभोजनः। जीवयतीतिजीवः। भोजयतीतिभोजनः। जीवश्चासौभोजनश्चेतितथा। य
स्मिंल्लिंगेयोनौप्रविष्टेस्त्रियोजीवंतिभोगांश्चभुंजते। अश्वाजरायमन्नेष्वाणामन्नश्वावाजिनोजरः। अमेधु
न्यं जरास्त्रीणांवस्त्राणामतपोजरा। अंतर्णीतण्यंतोजीवभोजनन्नाब्दः॥२१॥ का०॥ अध्वर्युब्रह्मोद्गातृहोतृ
दोत्तारः कुमारीपत्नीभिःसंवदंतेयकासकाविति दशर्चस्य द्वाभ्यां द्वाभ्यां हयेहये साविति सामंत्र्या।
अध्वर्यादयः पंचहयेहये सावितिसंबुध्यंतनौमोच्चारणपूर्वकंसंमुखीकृत्ययकासकाविति दशर्चसंबं
धिनीभ्यां द्वाभ्यांद्वाभ्यामृग्भ्यांकुमारीपत्नीभिःसहसोपहासंवदंते। तत्रप्रथममध्वर्युःकुमारींप्रत्याहकु
मारि हयेहये। कुमारीं प्रियकासकोशकुंतिकेतीत्यर्थः॥ यकासकोशकुंतिका॥ दशकुमार्यादिदेवत्याः॥
तन्मध्येद्वितीयोपरिष्टाद्बृहती। अन्यानवानुष्टुभः। अव्ययसर्वनाम्नामकच्प्राक्टेरित्यकच्॥ कुत्सायां।
अल्पाश्चकुंतिःशकुंतिका। अल्पत्वेष्टीतिकन्। अंगुल्यायोनिंप्रवेशयन्नाह। यका। या। असकौ। असौ।

तवयोनिः शाकुंतिका। अल्पायक्षिणीव। आहलक्। शब्दानुकरणमेतत्। हले हहलेइति शब्दयंती सती वंच
ति गच्छति। स्त्री णां हि प्रगमने सति योनौ हलहलो शब्दो भवती त्यर्थः। वंचिर्गत्यर्थः। आहलगिति क्रिया
विशेषणं। तथा गत्वेऽग। वर्ण विपर्ययः। पसो लिंगं यदा आहंति योनौ गच्छति। हन हिंसा गत्योः। पसः
तिपसते ः स्पृश ति कर्मणि इति यास्को क्तः पुंप्रजननस्य नाम। यदा शाकुनिसदृशो योनौ लिंगं प्रविशति त
दा। धारका। धारतीति धारका लिंगं धारयंतीयोनिः निगल्गलीति निंतरो गलति। वीर्य स्तरति। अनुकर
णशब्दोयं॥२॥ अथ कुमारी अध्वर्युं प्रत्याह॥ यकोसकौशकुंतकः॥ इत्यंगुल्या निर्दिश्य प्रदर्शयंत्याह। हे अ
ध्वर्यो। यकः यः असकौ असौ शकुंतकः पक्षीवस्थितः लिंगः॥ विवक्षतीव कुंभिकतैले तव मुखमिव आहल
गिति यथा स्यात्तथा वंचतिप्रविशति। इवशब्दो आर्षो भिन्नक्रमः अतो मुखे लिंगप्रवेशनं न्याय्यं नो इत्या
प्रतिमाः भिमाषथाः। मावद। एवमावयोस्तुल्यत्वमिति भावः॥३॥ माता च ते। अथ ब्रह्मा महिषी माह। महि
षि हये हये महिषि। ते तव माता च पुनस्त्वेतव पिता च यदा वृक्षस्य संबंधिनि लक्षणा। वृक्षे जन्यकाष्ठमय
मंचकस्य अग्रमुपलिंगं रोहतः। आरोहतेः। तत्रे कदेशे शक्ल वृक्षत्वन्निगमा भवंतीति यास्को क्तेः। त
दा ते पिता गत्ते मगे मुष्टिं मुष्टिलल्यं निश्मं अतं सयते। तं सयति। तेकारव्यत्ययः। प्रक्षिपति। ए[illegible]वंतवे। ॥९७॥
त्वन्निरिस्यस्लीलं। त[illegible]सि असिलं वृतो कुरादिः। लिंगस्यालं करणं। योनि प्रवेशनमेव। किं कुर्वन्। प्राति
लामीति। वदन्निति शेषः। तिलस्नेहने। तव भोगेन प्रवृत्तं स्थिल्यामि॥४॥ सा ब्रह्माणं प्रत्याह॥ माता च ते।
माता च ते पिता च ते ग्रे वृक्षस्य क्रीकृतः क्रीतः। इत्युक्तार्थं। एवं तवाप्युसमिरस्लीला। यत्रोतयोः समो दोषोऽप

॥९७॥

रिहतोपि वासमः। नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणादिति न्यायान्नत्वयेदं वक्तव्यमिति भावः। एवं सख्यपि वि
वदंती वक्ति भिक्षोरिव। स्थितस्यपते तव मुखं लभ्यत इति त्रोषः। हे ब्रह्मन् त्वं बहु मा वद। बहुलं मा ब्रूहि। एषोर्थो
ब्राह्मणे। यकासकौशकुंतिकेति विड्वै शकुंतिका। आहलगिति वंचतीति विड्वै राष्ट्राय वंचति। आहंति गभे पसो नि
गल्गलीति धारकेति विड्वै गभो राष्ट्रं पसो राष्ट्रमेव विश्याहंति तस्माद्राष्ट्री विशं घातुक इति माताचते पिता च
तद्वतीयैवमाता। सोपि ताभ्यामेवेनं स्वर्गं लोकं गमयतीत्यादिना। अत्र विन्डरराष्ट्रशब्दौ स्त्रीपुरुषपरो ज्ञेयो।
॥५॥ अथोद्गाता वावातामाह ॥ ऊर्ध्वामेनामुच्छ्रापय। अत्र कश्चित्तत्सं बोध्यते। हे नर एनां वावातां ऊर्ध्वां उच्छ्रापय।
उच्छ्रितां कुरु। कथमिव। गिरौ भारं हरन्निव। यथा कश्चिद्गिरौ पर्वते भारं हरन्नूर्ध्वं तोपरि भारमारोपयन्
यथा तमुच्छ्रयति तथैनां ऊर्ध्वां कुरु। अथ यतिर्णिजंतः। कथमित्यत आह। अथेति। अथेति निपातो यार्थः।
यथास्यै अस्याः वावातायाः मध्यं एधतां। मध्यप्रदेशो वृद्धिं यायात्। यथा योनिर्विस्तारा भवति तथैनां मध्ये
गृहीत्वोच्छ्रापयेत्यर्थः। तत्र दृष्टांतमाह। शीते वाते पुनन्निव। यथा कृषीवलो वाते वाति सति पुनन् धान्यपवनं कुर्वा
णः कृषीवलः ऊर्ध्वीकरणेन बाहू विन्यालोकरोति। तथैतामुच्छ्रापयेत्यर्थः॥६॥ अथ वावाता उद्गातारं प्रत्या
ह॥ ऊर्ध्वमेनमुच्छ्रयतात्। हवतोप्येतत्समानमित्याह। हे नर एतमुद्गातारमूर्ध्वमुच्छ्रयतात्। ऊर्ध्वं प्रकुरु।
तुह्योस्तातङ्ङाशिष्यन्यतरस्यामिति तातङादेशः। गिरौ भारमिति पूर्ववत्। अथ। यथाऽस्योद्गातुर्मध्यं तत्र
सलिंगं एजतु कंपतां। एजृ कंपने लोट्। शीते वात इत्युक्तार्थं॥७॥ अथ होता परिवृक्तामाह॥ यदस्या
अंहुभेद्याः। यत्। यदा अस्याः परिवृक्तायाः कृधु ह्रस्वं स्थूलं च शिश्नं उपातसत्। उपगच्छेत्। योनिं प्र

विन्द्रोत् । दस्तु तस्कुडपञ्च्याये । द्वे ध्वितिरुस्वनाम । तदामुष्को हर्षणोद्गत एवं अस्याः योनेः उपरि । एतत्तः कंपते । स्थू
लं लिंगं न योने व्याप्त्वा हर्षणेन बहिरवतिष्ठते इत्यर्थः । तत्र दृष्टांतः । गोमूत्रिकेति गोलान्तिर्गतें गोखुरेणाकुलाद्रवं
मत्स्यं इविव । यद्वा गोमूत्रिकेति गोखुरनिर्मितगर्तजले न्याकुलो लाइव मत्स्या विव । कीदृश्या अस्याः अंहुन्नेघाः
अङ्घ्रिति नागनाम । अंहु । नेघं विदार्यं यस्याः अंहुन्निघेतयस्या वा सा अंहुनेघीदीतस्या अंहुन्ने घाः ॥ ८ ॥ अ
धपरिवक्त्रो होतारमाह । यदेवासो ललामगुं ॥ यत्तैयदा । देवासो देवाः ओ इन्द्रसरस्तुशिरसस्तुबन्धुः । क्रीडासमर्था
न्त्विगतैः ललामगुं शिश्नं प्रओविक्षुः योनौ प्रवेशयंति । अवरन्त्रेगतौकां तौलक्ष्मौ प्रीतौ धुतौ भुतौ । प्रापौ स्ले
षेऽर्थे नवेश्यागे वह्नौ यहेव धेचेत्युक्ते रेवधातुः प्रवेशनार्थः । लङ् । छंदसि लुङ् लङ् लिट इति वर्तमाने ।
व्यवहिताश्चेति प्रोपसर्गेण व्यवधानं । ल (ख्रख) लामेति सुखनाम ललाम सुखं गच्छति प्राप्नोतीति ललाम
गुः शिश्नः । यद्वा ललामशब्देन पुंड्रमुच्यते । ललाम पुंड्रं गच्छतीति ललामगुः । शिश्नस्तायो[illegible]नि प्रविशन्त्यु
तः पुंड्राकारोऽन्वती सत्यर्थः । कीदृशं ललामगुं । विष्टमिनं । ष्टीम क्लेदे । विशेषेण स्तीमनं क्लेदनं विष्टीमः । विष्टी
मो विद्यते यस्य स विष्टीमी तं विष्टीमिनं । अत इनिठना विति मत्वर्थे इनि प्रत्ययः । शिश्नस्य योनि प्रवेशे द्रवीभा
वोऽन्वती सत्यर्थः । तथा । यदा देवाः शिश्नक्रीडिनो नवं तौललामगुं योनौ प्रवेशयंति तदा नारी । सक्थ्नोरुरु ॥ १८ ॥

॥ १८ ॥ णा । व चनव्यत्ययः । ऊरुभ्यां प्रदिश्यते निर्दिश्यते अत्यंतं लक्ष्यते । दिष्टा तेर्य ङ्तस्य रूपं । भोगसमये सर्वस्य
नार्यंगस्य नरेण छादितत्वात् ऊरुमात्रं लक्ष्यत इत्यर्थः । तत्र दृष्टांतः । सत्यानृते अध्वौ यथेति । स सत्यं द्विविधं ।
वाक्रूपं श्रावणं चेति । ष्टात्कृतीयार्थे । यथा कश्चिद्दक्षिणाः प्रसङ्गेण सत्येन निर्दिश्यते चक्षुर्विषयः श्रोत्र

विषयो वा क्रियते तथा दृष्टाभ्याम् ऊरुभ्यां नारीति निष्कृष्टी यतः स्पर्शः । श्योऽत्र ग्रामे सस्ये लुब्धस्तु रागात्त्वमपेक्षितं ॥९॥
क्षेत्रपालगोपालीमाह । यवद्धरिणो यवमत्ति । यत्र । यदा । हरिणो यवमत्ति । मृगो यदा क्षेत्रस्य धान्यं भक्षयति । तदा क्षे-
त्री पत्युः हरिणं पुष्टं न मन्यते । मम धान्यभक्षणेन मृगः पुष्टः इदं साधितिति न मन्यते । किंतु मदीयं क्षेत्रमनेन न-
ष्टमिति दुःखी भवतीत्यर्थः । पत्युः कथा च तत्र पांसु स्वि समोऽपि गाथार्थः । एवमेव मृगः । मृगो जारः स्त्री । यत्र यदा । अ-
न्यनारीरतो वेति । अर्थः स्वामिवेश्यापयोः स्थितिनिपातनादर्थी वेश्यायो जारः उपपतिर्यस्याः सा अर्थजारा । मृग्याचा-
महसू कीजाति इति मृगो ब्बा ज्ञात्वा सर्वे टाप्प्रत्ययः । तथा च । वेश्यायोषा मृगं गच्छति तदा मृगः पोषाय ध-
नायति । पुष्टिं न दृष्ट्वा । मद्भार्यावेश्येन भुक्ता सती पुष्टा जातेति सुखं न मन्यते किंतु व्यभिचारिणी जातेति
दुःखितो भवतीत्यर्थः । अज्ञानायो दत्य धनेत्याया बहु द्वाधिपापात् गर्धैः क्षितिविध्वस्य विधे तायय तीति छाद्यते ध्वनि-
पातेः ॥१०॥ पालगोपालीहस्तारमाह । यद्धरिणो यवमत्ति । यत्र यदा हरिणो यवमत्ति तदा क्षेत्री बहु यथा तथा
पुष्टं पत्युर्न मन्यते । इदं भवतीत्यपि कुल्यां । इयां स्तु विनोदिः । यत्र यदा मृगः अर्थायेजापीया वेश्यायाः जारो मेव
तितदा वेश्यः पोषपुष्टिं नानुमन्यते न संतुष्यति । किंतु मद्भार्या मृगेणानीचेन भुक्तेति क्लिश्यते वेत्यर्थः ॥ एषो-
र्थो ब्राह्मणे ॥ यद्धरिणो यवमत्तीति विद्वेषवोराष्ट्रपदे हरिणो विज्ञामेव राष्ट्रायाद्यां करोति तस्माद्राष्ट्री विज्ञाम
ति न पुष्टं पत्युर्मन्यते इति । तस्माद्राजापि मृगान्न पुष्यति । अर्थाद्यदर्थं नारान्तपोषाय धनायतीति तस्माद्वै ज्ञो पुत्र
नाभिषिंचतीति । अभ्ररीलक्षणं समाप्तं ॥११॥ का० ॥ महिषीमुत्थाप्य पुरुषाः दधिक्राव्णोऽस्याहुः ॥ महिषी
यजमानस्य प्रथमपरिणीता पत्नी मम्व समीपसुप्ता मुत्थाप्य पुरुषा अध्वर्यु ब्रह्मोद्गातृहोतारो दधिक्राव्णा

इति मंत्रं पठेयुरिति सूत्रार्थः ॥ दधिक्राव्णो अकारिषं । वामदेवात्मजदधिक्रावदृष्टा ऽश्वदेवत्यानुष्टुप् । वयमध्व
र्य्वादयः अकार्ष्म । वचनव्यत्ययः । न इति लिंगात् । अकार्ष्म । प्रकरणादश्लीलभाषणमित्यनुवर्त्तते । किमर्थं । अश्व
स्य । संस्कारार्थमिति शेषः । कीदृशस्य । दधिक्राव्णः । दधाति नरमिति दधिः । आदृगमहनजन इति किप्रत्ययः । दधिः सन्
क्रामतीति दधिक्रावा तस्य । अन्येभ्योपि दृश्यन्त इति वनिप्रत्ययः । विड्वनोरनुनासिकस्यादिति धातोराकारः । जि
ष्णोः जयनशीलस्य । वाजिनः अन्नवतः । यद्वा वजति गच्छतीति वाजी तस्येति । किं च । नोऽस्माकं मुखवा मुखानि ।
नो मुखदसीति शिलोपेन नलोपे च रूपं । सुरभि । सुरभीणि सुवासितानि करत् । करोतु । यज्ञ इति शेषः । अश्ली
लभाषणेन दुर्गंधीनि मुखानि सुरभीणि सुवास्यवन्ति करोत्वित्यर्थः । निशब्दो बहुलमिति निलोपः ।
किं च । नोऽस्माकं मायूंषि जीवनानि बाल्ययौवनवार्द्धकानि प्रतारिषत् । प्रतारयतु । प्रवर्द्धयतु । प्रतरतिर्वर्द्धना
र्थः । करोतितरस्योर्लिङर्थे लेडिति लेटि लेटोडाटावित्यडागमे कृते । इतश्च लोपः परस्मैपदेष्विति इकारलोपे च
सति रूपसिद्धिः । एषोऽर्थो ब्राह्मणेऽभिहितः । अप वा एतेभ्यः प्राणाः क्रामंति ये यज्ञे ऽपूतां वाचं वदंति दधिक्राव्णो
अकारिषमिति सुरभिमतीमृचमंततो ऽन्वाहुर्वाचमेव पुनते नैभ्यः प्राणा अपक्रामंतीति ॥ ३२ ॥ ॥ इति षष्ठो
नुवाकः ॥ ॥ कां० ॥ तिस्रः पत्न्यो ऽसिपथान्कल्पयंत्वश्वस्य सूचीभिर्लोहरजतसौवर्णीभिर्मणिसंख्या ॥९९॥
भिर्गायत्री त्रिष्टुब्भिरिति द्वाभ्यां द्वाभ्यां ॥ गायत्री त्रिष्टुबिति षड्भिर्द्वाभ्यां द्वाभ्यां मृग्भ्यां महिष्याद्या घ्नंति स्त्रः
॥९९॥ पत्न्यस्ता स्वर्णमयीभिः प्रत्येकमेकाधिकशतसंख्याभिः सूचीभिरश्वांगे ऽसिं शासस्य मार्गान्कुर्वं
ति । भूताश्वस्य स्कंधप्रदेशाय सूचीभिर्विलिखंति घ्नंत्याश्वस्य चर्मणि कुर्वंतीति सूत्रार्थः ॥ गायत्री त्रिष्टुप् ।
अश्वदेवत्याः षडृचः । तत्राद्यो ष्णिक् । वर्त्तस्रो नुष्टुभः । अंत्या त्रिष्टुप् । हे अश्व । गायत्री । त्रिष्टुप् । जगती

अनुष्टुप्पंक्त्या सह बृहती। उष्णिहा ककुप्। एतान्यष्टौ छंदांसि सूचीभिरेताभिः त्वा। त्वां शम्यंतु संस्कुर्वंतु विहर
णाव्यथयः। एष ब्राह्मणो। यदसिपथान्कल्पयति सेतुमेव तत्संक्रमणं यजमानः कुरुते स्वर्गस्य लोकस्य समष्ट्यै
सूचीभिः कल्पयंति विशो वै सूच्यो राष्ट्रमश्वमेधो विशं चैवास्मिन्राष्ट्रं च समीचीं दधातीति त्रय्यः सूच्यो भवंति
लोहमय्यो रजता हरिण्यो दिशो वै लोहमय्योऽवांतरदिशो रजता ऊर्ध्वा हरिण्यस्ताभिरेवैनं कल्पयंतीति तिसृभी
भिस्त्रेधोर्ध्वाभिश्चेति ॥१॥ द्विपदा याः। द्विपदे यासां ता द्विपदाः। याश्चतुष्पदाः। याः त्रिपदाः। याश्च षट्पदाः। याः
विछंदाः। छंदोलक्षणहीनाः। याश्च सछंदाः छंदोलक्षणसहिताः। ताः सर्वा ऋग्जातयः हेऽश्व सूचीभिस्त्वां श
म्यंतु ॥२॥ महानाम्न्यो रेवत्यः ॥ महानाम्न्यः शाक्वर्य ऋचः। रेवत्यः। यासु रेवतं साम गीयते ता रेवत्यः। विश्वा
आशाः सर्वा दिशः। कीदृश्य आशाः। प्रभूवरीः। प्रभवंति सर्वभूतानि आश्रित्य तं समर्था भवंतीति प्रभूर्यः। अ
न्येभ्योपि दृश्यंत इति वनिप्। वनो र चेति ङीप् रेफः। पूर्वसवर्णदीर्घः। तथा। मेघे भवा
मेघ्यः। पूर्वसवर्णः। मैघीः। मेघे भवा विद्युतः। वाचो वेदलक्षणा अन्या अपि। एताः सर्वाः सूचीभिः हेऽश्व त्वां शम्य
तु ॥३॥ नार्यस्ते। हेऽश्व पत्न्यः यज्ञे सहायाः नार्यो यजमानस्त्रियस्ते तव लोम रोमाणि मनीषया विचार्य विचि
न्वंतु पृथक्कुर्वंतु। किंच। देवानामिंद्रादीनां पत्न्यः पत्नीरूपाः दिशः प्राच्याद्याः सूचीभिस्त्वां शम्यंतु ॥४॥ रजता
हरिणीः ॥ रजता रजतमय्यः हरिणीति सुवर्णनाम। हरिणीः हरि एयः सुवर्णमय्यः। सीसाः ताम्रमय्यः। सी
समिति ताम्रनाम। एताः सर्वाः सूच्यः कर्मभिः अश्वदेहसीमाकरणलक्षणैः युज्यंते। योगं प्राप्नुवंति। कीदृश्यस्ताः
युजः। युज्यंते संयुज्यंते इति युजः एकीभूताः। ताः सूच्यः वाजिनो वेगवतोऽश्वस्य त्वचि सिमाः सीमा रेखाः शम्यंतु

कुर्वंतु । शिमन्नाब्दः सीमापर्यायः । कीदृशा्यस्ताः शम्यंती शम्यंत्यः । अश्वं संस्कुर्वंतः ॥ ५ ॥ कुविदंगयवमंतः । व्याख्या
ता ॥ ६ ॥ ॥ सप्तमोनुवाकः ॥ ॥ का० ॥ अश्वं विशस्त्रास्य तु वाके नेकस्त्वाछ्यतीति । षड्ऋचेनानुवाकेनाश्वं विशा
स्ति । अश्वोदरस्याच्छ्यतिमेदस उद्धरणाय । वपाया अभावात् । उदरमध्यस्थस्थानप्रतानं प्रनश्चेतं मांसमे
दइति सत्रार्थः ॥ कस्त्वाछ्यति । अश्वदेवत्याः षड्ऋचः । आद्या गायत्री । पंचानुष्टुभः प्रजापतिर्दृष्टाः । हे अश्व ।
कः प्रजापतिः । त्वा त्वां आछ्यति । छिनत्ति । छो छेदने ॥ ॥ ओतः श्यनी स्योकारलोपः । कः एव त्वां विशास्ति ।
त्वचाधियोजति । कः एव ते तव गात्राणि शम्यति शमनेन हविः करोति । कः प्रजापतिरेव कः ईविर्मधावी । ते तव
शमिता शमयिता । केशब्दः प्रजापतिवाची । प्रजापतिर्वै क इति श्रुतेः । यद्वा कः प्राणी त्वा छ्यति सा त्वेपरू
पेण व्याख्याने सर्वमीश्वरः करोति नाहमिति योजना ॥ १ ॥ ऋतवस्ते । हे अश्व । ऋतवः शमितारः ऋतुथा ऋ
तौ ऋतौ । सप्तम्यर्थे थाल् । काले काले । ते तव पर्व पर्वाणि अस्थिग्रंथीन् शमीभिः कर्मभिः विशासतु ।
छिन्नानि कुर्वंतु । तथा । संवत्सरस्य । संवत्सरात्मकदेवस्य तेजसा सामर्थ्येन शमीभिः कर्मभिश्च शमीति
कर्मनाम । हे अश्व । त्वा त्वां शम्यंतु । शमं प्रापयंतु ॥ २ ॥ अर्द्धमासाः परूंषि । अर्द्धमासाः पक्षाः मासाश्च
इति मानि नो देवाः शम्यंतः संस्कुर्वंतः संतस्ते तव परूंषि पर्वाणि आ छ्यतु समंतात् छिंदंतु । परूंस्
शब्दः पर्ववचनः । ग्रंथितो पर्वपरूंषी इति कोशात् । किंच । अहोरात्राणि । अहोरात्राभिमानिदेवाः मरुतः ॥ १०० ॥
श्च देवाः ते तव विलिष्टं । लिश अल्पीभावे । विश्लेषेणाल्पमंगं सूदयंतु संदधतु । सूद निरासे । अन्यसंधा
नार्थः । व्यर्थं मास्तु ॥ ३ ॥ दैव्या अध्वर्यवः । देवानामिमे दैव्याः अध्वर्यवः अश्विप्रभृतयः । अश्विनौ देवानाम

॥ १०० ॥

ध्वर्यु इति श्रुतेः। हे ऽश्व। त्वा मा छिद्रं तु। अच्छिद्रं सन्तु। विन्नाः सन्तु च तथा। तव गात्राणि गात्रेषु पर्वन्ताः पर्वाणि पर्व
णि सिमाः मर्यादाः कृण्वन्तु। कुर्वन्तु। कृ करणे। स्वादिः। गात्राणीति प्रथमा सप्तम्यर्थे। कीदृश्यः सीमाः। शम्यन्तीः।
संवस्कुर्वाणा॥४॥ द्यौस्ते॥ द्यौः स्वर्गः। पृथिवी अयं लोकः। अन्तरिक्षं अन्तरिक्षलोकश्च। लोकत्रयाभिमानी दे
वः सर्वः। वायुश्च शरीरस्थः प्राणः। हे ऽश्व ते तव छिद्रं पृणातु। प्रत्येकं पूरयतु॥ किंच। नक्षत्रैः सहितः सूर्यः। तेत
व। साधुया। साधु समीचीनं लोकं कृणोतु करोतु। सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजाल इति साधुयाश
ब्दात्स्वरस्य स्थितस्यैकवचनस्य याडादेशः॥ सूर्यस्तवोत्तमं लोकं ददातु। स्पर्धः॥५॥ शं ते परेभ्यः॥ हे ऽश्व ते तव परेभ्यो गा
त्रेभ्यो ऽवयवेभ्यः। परत्र बहु उत्तमार्थः। परः प्रधान इति प्राप्तिन्त्राख्यान आद्युदात्तो ते॥ शिर आदि मुख्यावयवेभ्य
इति यावत्। शं सुखमस्तु। तथावरेभ्यो गात्रेभ्यः पादाद्यवयवेभ्यः शं अस्तु। अस्थभ्यः तवास्थिभ्यः शमस्तु। अ
नुषंगः। अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः इत्यस्य स्थाने तु [illegible]। छन्दस्यपि दृश्यत इति सूत्रेण हलादावपि
अस्थि शब्दस्यानङादेशः। मज्जभ्यः षष्ठ्यर्थे धातुभ्यः शं सुखमस्तु। किं बहुना। तव तन्वै सर्वशरीराय शं
सुखमस्तु॥ किं बहुना। तव तन्वै सर्वशरीरायकामु सुखमेवास्तु। अत्र सर्वत्र लिङर्थे लोट्॥६॥ ॥अष्टमोनुवा
कः॥८ ॥का० ॥ प्राग्वपाहोमाद्धोताध्वर्यू ब्रह्मसदसि संवदेते च तस्यर्चा। कः स्विदेकाकीति पूर्ववत्। वपाहोमा
त्प्राक् चतुर्भिर्मंत्रैः पूर्ववदुक्तिप्रत्युक्तिरूपया सदसि ध्यगात्वा होताऽध्वर्युश्च संवादं वाकोवाक्यं कुरुतः। इति सूत्रा
र्थः॥ कः स्विदेकाकी चरति॥ इत आरभ्याष्टादशकण्डिका ब्रह्मोद्यसंज्ञाः। ब्रह्मोद्यं वाकोवाक्यं प्रश्नप्रतिवचनरू
पं। तत्राद्यास्तस्रोनुष्टुभः। कास्विदासीत्पाद्यानुष्टुभः। पंचमाद्यादशा त्रिष्टुभः। होताध्वर्युं पृच्छति कः स्वि

दिति। अध्वर्युः प्रत्याह सूर्य एकाकी चरतीति॥ अध्वर्युर्होतारं पृच्छति किंस्वित्सूर्यमिति॥ तत्रैव व्याख्याते। हे होतः किंस्वि

तुल्यं दिति वितर्के। सूर्यसमं। सूर्यमंडलतुल्यं ज्योतिः तेजः किं। तत् ब्रूहि। तथा। समुद्रसमं। समुद्रतुल्यं सरः। किंस्वि

त्। तथा पृथिव्यै पृथिव्याः सकाशात्। वर्षीयः महत्तरं किंस्वित्। प्रियस्थिरेत्यादिना वृद्धशब्दस्य वर्षा

देशः ईयसि प्रत्यये। तथा कस्य मात्रा परिमाणं न विद्यते॥ ३॥ होताध्वर्युं प्रत्याह। ब्रह्म सूर्यसमं ज्योतिः।

सूर्यसमं ज्योतिर्ब्रह्म। त्रयीलक्षणपरं च। सूर्यसमत्वकथनं प्राकृतलोकाभिप्रायं। ब्रह्मणोऽनंतसूर्यवत्प्र

काशत्वात्। तमेव भांतमनुभाति सर्वं। यस्य भासा सर्वमिदं विभातीत्यादिश्रुतेः। तथा समुद्रसमं सरः।

द्यौः अंतरिक्षलोकः। यतो वृष्टिर्भवति। वृक्षाग्निमस्य जीवनादिवः सरस्त्वमिति ध्वनिः। पृथिव्यै पृथिव्याः

सकाशात्। इंद्रो वर्षीयान् वृद्धतरः। वृष्ट्यादिना भूमिरक्षणेनातिमहानिंद्रः। यद्वा परमेश्वर एवेंद्रः। सर्वा

धारभूतायाः पृथिव्या धारकत्वात्। यदंतरा पृथिवी भृतद्यामेको दाधार भुवनानि विश्वेत्यादिश्रुतेः। तु पु

नः। गोः धेनोः मात्रासाम्यं। न विद्यते। यज्ञादिधारकत्वात्॥ ४॥ का० ॥ ब्रह्मा उद्गातारं पृच्छति पृच्छामीति।

चतुर्भिर्मंत्रैः सदसि ब्रह्मोद्गातारौ संवदेते इति सूत्रार्थः। ब्रह्मोद्गातारं पृच्छति। पृच्छामि त्वा चितये।

॥१०१॥ देवा त्वांस सखा देव सखः। राज्ञाहः सखिभ्यश्च। तत्संबोधनं हे देवसखः उद्गातः। त्वा त्वां। चितये ज्ञानाय।

चिती संज्ञाने इक्कुप्रत्ययः। अहं पृच्छामि। अत्र मत्कृते प्रश्ने यदि त्वं मनसांतरिंद्रियेण जगंथ ज्ञातोसि। ग ॥१०१॥

मेर्लिटि मध्यमैकवचने। येषु स्पर्धा स्तेष्टा नार्थीः। किं पृच्छसीत्यत आह। विष्णुर्यज्ञः परमात्मा वा येषु त्रि

षु पदेषु गार्हपत्याहवनीयदक्षिणाग्निषु त्रिविक्रमपदेषु वा एष्टः। आइष्टः यागेन तर्पितः। द्वितीयपदे

रुष्टः प्रविष्टः। ब्रह्मैव तिरोधेः। यज्ञेः कर्मणिकः। तेषु त्रिषु पदेष्वहं विश्वं सर्वं भुवनं आविवेश। प्रविष्टं उत तन्नेति प्रश्न
युतः॥५१॥ उद्गाता ब्रह्माणं प्रत्याह। अपि तेषु। हे ब्रह्मन्। येषु त्रिषु पदेषु विश्वं भुवनमाविवेशेति त्वया पृष्टं।
तेषु त्रिषु पदेषु पूर्वाग्नेषु गार्हपत्यादिषु अहमस्मि। अहमपि तत्रैवावस्थितोऽस्मि। अपि शब्दात् त्वं च तत्रैवासि। न
केवलमेतावज्जानामि। किंतु पृथिवी। उत अपि च द्यौः स्वर्गः। अस्या दिवः स्वर्गस्य पृष्ठमुपरितनभागमपि। सद्य
स्तत्क्षणमेवैकेनांगेन अन्यस्यासह। येन मनसा पर्यभि परिगच्छामि सर्वं जानामि। किं पुनर्भूतानि प्रवि
ष्टानीति भावः॥५२॥ उद्गाता ब्रह्माणं पृच्छति। केष्वंतः पुरुष आविवेश। हे ब्रह्मन् पुरुषः। केषु पदार्थेषु अंतः
मध्ये आविवेश। प्रविवेश। तथा। पुरुषे अंतर्मध्ये। कानि वस्तूनि अर्पितानि स्थापितानि। एतदिमं प्रश्नं। त्वा
त्वां प्रति। वयं उपवल्हामसि। उपवल्हामः। स्पर्द्धया पृच्छामः। वल्ह प्राधान्यपरिभाषणहिंसादानेषु। अस्मा
कं घुत्तमं। इदं तां मनसीतिमसदकारः। अत्र प्रश्ने। किंस्वित्। त्वं प्रतिवोचासि प्रतिवदसि। वचउमितिलेटि छां
दसं उभूल्लेटो इटाविस्याऽऽगमः॥५३॥ ब्रह्मा उद्गातारं प्रत्याह। पंचस्वंतः पुरुष आविवेश। हे उद्गातः। पुरुषः नि
यंता परमात्मा पंचसु प्राणेषु अंतर्मध्ये आविवेश। आविष्टः। तथा तानि प्राणादि वस्तूनि पुरुषे पूर्णे परमेश्व
रे अंतर्मध्ये अर्पितानि। तेषामन्योन्यापेक्षत्वात्। नेश्वरज्ञानमंतरेण प्राणाः स्थाप्यंते नेच प्राणानंतरेणात्मेति
बह्वृचश्रुतेः। यद्वा पंचसु भूम्यादिपंचमहाभूतेषु अंतः पुरुषः हरिराविवेश। तानि च पुरुषेऽन्तः समर्पिता
नीति प्रतिप्रश्नः। तत्सृष्ट्वा तदेवानुप्राविशदिति तैत्तिरीयश्रुतेः। किंच अत्र त्वेत्वन्म प्रतिप्रश्नेवास्त्वां प्रति।

॥१०२॥

एतदुत्तरं प्रतिमन्वानः प्रतिजानानः अस्मि॥ किं च मायया वंचनया बुध्याव॥ मत्तः मत्तः उत्तरः अधिकस्त्वं न त्वं वसि। म
त्तो बुद्धिमान्नासीत्यर्थः। एतद्ब्रह्मवाक्यं ब्राह्मणे निरूहितः। का स्विदासीत् इत्यादि स्विदित्याप्रसेकः प्रतिप
रेसस्दक्षिणब्रह्मोद्यं वदंति पूर्वया द्वारा प्रतिपद्यय थादिष्ण्यं व्युपविश्येति होता ध्वर्युं पृच्छति कः स्विदेकाकी
चरतीति तं प्रत्याह सूर्य एकाकी चरतीत्यादिना॥२॥ ॥नवमोनुवाकः॥ ॥का०॥ पुनः पूर्वविपरेणोत्तरवेदिं का स्वि
दासीदिति। सदसोतिक्रम्य ह विद्वानस्य पुरः उत्तरवेदेः पश्चादुपविश्य पृच्छन्वौ सर्वे ते होता ध्वर्युं च तु इति मन्त्रैः सं
वदेते इति सूत्रार्थः। तत्र होता ध्वर्युं पृच्छति का स्विदासीदिति॥१॥ तं प्रत्यध्वर्युराह द्यौरासीदिति॥२॥ रूं न्द्रूपं व्या
ते। अध्वर्युं होता पृच्छति। का ईम् अरे पिशंगिला॥ ईम् इति निपातः पादपूरणार्थः। अरे इति संबोधनार्थं अ
रे होतः। का च पिशंगिला। का च कुरुपिशंगिला। कश्च आस्कंदं। यामुलेतः। आस्कंदेन शल्लकस आर्षति गच्छ
ति। कः पंथां विसर्पति धातुः। तुदादिः। व्यत्ययेन गृण्। कश्च पंथां पंथानं मार्गं प्रतिविसर्पति विविधं गच्छति॥ अ
होतारं प्रत्याह। अरे होतः अजा रे पिशंगिला। अरे अध्वर्यो। अजा पिशंगिला। अजा निसा माया रात्रिर्वा पिशंगुवौ॥ पि
शंगं रूपं गिलति इति रूपं गिलतीति पिशंगिला। माया हि विश्वं ग्रसते। रात्रिः पि रूपाणि तमसा छादयति। पिशं
गुः सर्वोपि चं ग्रसतीति भावः। श्वाविच्छल्यका। कुरुपिशंगिला। कुरुरिति शब्दानुकरणे। पिशंगं अवयवं इति धा
तोरिगुपधेति कप्रत्ययः। कुरु कुरु इति शब्दं कुर्वाणा पिशंगान्फलानि यवानि गिलतीति पिशंगि
ला। फलानि यानि तानि कुरुरोस्याः प्रतिशब्दं च नदयतीति। सेधा या शल्यकाख्यावः। शशः। वल्मीको जीवविशेषः।

॥१०२॥

आस्कंदं। आस्कन्दास्कन्द घञर्थे क्तिन इति। सततस्य स्वरूपाव॥ अहिः सर्पः पंथां पंथानं विसर्पति। पंथामि
यत्र सुपां सुलुक् इति सूत्रेणाऽमोऽकारस्य डादेशः॥४॥ का०॥ उत्तरोत्तर कल्पस्येति। उत्तरो पश्चाद्भूतो ब्रह्मो इत्ता
रोच चतुर्भिर्ऋग्भिः संवदते। इति सूत्रार्थः। तत्र ब्रह्मा होतारं पृच्छति। कस्य स्वित् विद्धाः। अस्य यज्ञस्य कति वि
ष्ठाः। कियं सन्त्यानि। स्थानानि कति। कासंख्यायां सोता कति। उत्सेतः। विनुष्पणति इति यज्ञो यासुताः विष्ठाः।
क्रियंतः। यज्ञस्य कियंत सन्त्यानि स्थानानि वेसर्थः। तथा यज्ञस्य अक्षराणि कति। होमासः होमाः कति। समि
द्धः समिधः कति था। कति प्रकाराः। धकारस्य माषीम् अभिधो हि इति सत्रस्य उत्तरवाक्यादेवमेव। तथा। यज्ञस्य
विद्धा। वेत्तीति विदः विदस्य त्वावो विदधा यज्ञवेदित्वेन हेतुना अत्र स्पृले। त्वा त्वां अहं पृच्छे अ पृच्छे प
च्छामि। पृच्छ ते लङ्। अडभाव आर्षः। ते धातूकृत्वाः कृतोः कृतो कति होतारो यज्ञेयजन्तेति॥५॥ उद्गाता तं प्रत्याह।
षळस्य विद्धाः। क्रमेणोत्तरं। अस्य यज्ञस्य विद्धा अन्त्यानि षट्। अन्त्यानां षड्भाव सात्मकत्वात्। स्थानपदे आ
हवनीयगार्हपत्यदक्षिणाग्निसभ्यावसथ्यपचनाग्निलक्षणानि षड्ग्नेः स्थानानि। अस्य यज्ञस्य शत
मक्षराणि। छंदोभिर्यज्ञो निष्पाद्यते। तानि च छंदांसि गायत्र्यादीन्यति धृत्यंतानि चतुर्दश। चतुर्विंशत्यक्ष
राणि चतुर्वर्णोत्तराणि। तेषां क्रमो क्रमगसाद्वाभ्यां द्वाभ्यां शतमक्षराणि भवंति। तथाहि। गायत्री
चतुर्विंशति वर्णा। अति धृतिः षट्सप्तत्यक्षरा। एवं हि मिलित्वा शतमक्षराणि। उष्णिक्। २८॥ धृतिः ७२
एवं शतं। अनुष्टुप्। ३२॥ अत्यष्टिः। ६८। एवं शतं। अष्टिः। ६४। बृहती ३६ एवं शतं। अतिशक्वरी। ६०। पंक्तिः ४०।
एवं शतं। शक्वरी। ५६। त्रिष्टुप्। ४४। एवं शतं। अतिजगती ५२। जगती ४८ एवं शतमक्षराणि। अनेनाभि

प्रायेण कृतमन्त्राणि स्तुतौ। होमाः। होम्यंत इति होमाः पशवः अशीतिः। अश्वमेधे एकविंशतियूपाः सं
ति। तत्राग्निष्टोमयूपे अश्वतूपरगोमृगानित्युनक्ति। इतरेषु षोडशसु षोडशपशून्। तत्र विंशतियूपेषु
वर्तमानाः स्तोत्रादीनयः पशवो वर्तते यानि प्रायेणो कृममन्त्रैः तेहीमाइति। हे स्फुटं। तिस्रः समिधः। अ
श्वतूपरगोमृगाः प्राजापत्याः पशवस्तद्रूपाभिः समिद्भिर्यज्ञो दीप्यते इति तिस्रः समिधः उक्ताः। यत्तस्य
८ विधा। वेदनेन हेतुना ते तुभ्यं प्रब्रवीमि प्रवेदामि। किंच। स महोतारः कवषट्कर्तारः ऋतुरः ऋतुयाजाः
पुर्यजंति। ६। उद्गाता ब्रह्माणं पृच्छति। को अस्य वेद। हे ब्रह्मन् अस्य भुवनस्य भूतजातस्य नाभिं न
ह्यते न स्तते यत्र सा नाभिर्बंधनस्थानं। कारणमित्यर्थः। नाभोर्हिंसबंधनाद्यो बध्यते। नेत् हिंसायामि
ति धातुः। अत्र बंधनार्थः। औणादिक इत्प्रत्ययः। भूतजातस्य कारणं। को वेद जानाति। तथा। द्यावा
पृथिवी। द्यावापृथिव्यौ अंतरिक्षं च को वेद। बृहतो महतो महत्तत्वस्य वा जनित्रं जन्म को वेद। अत्र पदे
सर्वस्यासन्निः कस्मादित्यर्थः। जनेस्त्रल् प्रत्ययः। यतो जायते उत्पद्यते इति यतो जाः। यत इत्युपपदे ज
नसनखनक्रमगमो विडिति विट् प्रत्यये कृते विडुनोरनुनासिकस्यादिति नकारस्याकारः। अथवा द्वि
तीयार्थः। यतो जां। यदुत्पन्नं चंद्रमसं चंद्रं को वेद। यद्वा यतो जा अश्वं इमास्तादृशं कारणकं चंद्रमसं को वे
॥१०३॥ द जानाति। विदाल्लटो वेति सत्त्रेण णलाद्यादेशो वेदेति रूपं। यतः श्चंद्रस्योत्पत्तिस्तं को वेदेत्यर्थः। ॥७॥ ब्रह्मा ॥१०३॥
तो उद्गातारमाह। वेदाहमस्य भुवनस्य नाभिं। अस्य भुवनस्य नाभिं कारणमहं वेद जानामि। विदोल्लटो वा।
= अंतिमं छंदो नितं। तत्र नत्रातान्तरं। यथा। संवत्सरो परिवत्सरो सीत्यादि भुवः सीदे इत्यंतं नातान्तरं। तदुपरि छंदो नास्तीत्यर्थः। =

परं अंतेन जगत्कारणं जानामीत्यर्थः। द्यावापृथिवी अंतरिक्षं चाहं वेद। बृहतः सूर्यस्य जनित्रमुत्पत्तिकारणं ब्र
ह्म वेद। अथो अपि च। यतो जातं चंद्रमसं महं वेद। परमात्मनो जातं चंद्रमसमहं वेद जानामीत्यर्थः॥ ६०॥ का०॥ यजमा
नोऽध्वर्युं पृच्छामि त्वेति। पृच्छतीति शेषः। पृच्छामि त्वा परं। हे अध्वर्यो पृथिव्याः परं अंतं अवधिभूतं त्वां अहं
पृच्छामि। पृच्छतिर्द्विकर्मकः। यत्र यस्मिन्स्थले भुवनस्य भूतजातस्य नाभिः कारणं तदपि त्वां पृच्छामि। वृष्णः
सेक्तुः अश्वस्य रेतो वीर्यं त्वां पृच्छामि। वाचो वाण्याः त्रयीलक्षणायाः परममुत्कृष्टं व्योम स्थानं त्वां पृच्छामि।
॥६१॥ का०॥ इयं वेदिरित्यध्वर्युः। अध्वर्युर्यजमानं प्रत्याह॥ इयं वेदिः परो अंतः। इयं वेदिरुत्तरवेदिः पृथि
व्याः परो अंतः उत्कृष्टावधिः। उत्तरवेदिः सर्वपृथिव्याः सारत्वादित्यर्थः। भुवनस्य नाभिः कारणं अयं यज्ञोऽश्वमेधः प
रमात्मा वा भुवनस्य प्राणिजातस्य नाभिः कारणं। यज्ञाद्धि प्रजाः प्रजायंते इति श्रुतेः। वृष्णो अश्वस्य रेतः। अयं
सोमः। सोमलतारसोऽश्वस्य वीर्यं ज्ञातेत्यर्थः। अयं ब्रह्मा ऋत्विक् वाचः त्रयीरूपायाः परमं व्योम स्थानं। ब्रह्म
र्त्विजस्त्रिवेदपरिज्ञानादिति भावः। यद्वा इयं वेदिः प्रकृतिः विद्यते लभ्यते सर्वैरिति वेदिरिति विग्रहः। पृथि
व्याः उपलक्षणात् लोकत्रयस्य परो अंतः परमावधिः। प्रकृतेरेव तस्य स्थूलसूक्ष्मरूपेण जन्मलयात्।
अयं यज्ञः परमात्मा भुवनस्य नाभिः आदिकारणं। अयं सोमः उपलक्षणात् चंद्रसूर्यादिः। वृष्णः सर्व
कामवर्षकस्य अश्वस्य संसारधर्मरहितस्य परमात्मनः रेतः सामर्थ्यं तेज इत्यर्थः। यदादित्यगतं तेजो
जगद्भासयतेऽखिलं। यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति भगवद्वचनात्। अश्वस्येत्यत्र न वि
द्यते श्वः कालादिपरिमाणं यस्येति व्युत्पत्तिः। अयं ब्रह्मा चतुर्मुखः वाचो वेदरूपायाः परमं व्योम स्थानं।

अदिस्तद्यौ तस्यैव हरिणा सर्ववेदोपदेष्टृत्वात्। यो ब्रह्माणं विदधाति पूर्वं। तस्मै वेदांश्च प्रहिणोति सर्वानिति श्रु
तेः ॥ इति अश्वोधंस मासं ॥१०॥ सुभूरिति पूर्वस्य महिम्नः पुरोनुवाक्या। उत्तरस्य च याज्या। उदिते ब्रह्मौ
घं संप्रपद्य ध्वर्युर्हिरण्मयेन पात्रेण प्राजापत्यं महिमानं ग्रहं गृह्णाति तस्य पुरोरुग्घिरण्यगर्भः स
मवर्त्तताग्र इत्या। अथास्य पुरोनुवाक्या सुभूः स्वयंभूः प्रथम इति श्रुतेः। सुभूः स्वयंभूः। प्रजापतिदेवत्याऽ
नुष्टुप्। हर्षि प्रसिद्धो। प्रथमः सर्वस्य आदिः अनादिनिधनः पुरुषः। महति अर्णवे कल्पांतकालीने
समुद्रे अंतर्मध्ये स्थितो पः पीत्वा सृष्टिकाले गर्भं दधे। स्थापितवान्। कीदृग्ः सः। सुभूः। सुष्ठु भूरु
त्पत्तिर्यस्मात् यस्येति वा सुभूः। विश्वोत्पादको मत्स्याद्यवतारवांश्च। स्वयमेव भवतीति स्वयंभूः। स्वेच्छाविग्रहः।
अनेन विश्वे वेलत्वेण्यं तस्योक्तं कीदृशं गर्भं ऋत्वियं। ऋतुः प्राप्तोऽयस्य ऋतौ भवं ऋत्वियः। यज्ञप्रसवः। त
स्य यादृशः। प्राप्तः कालं। यतो गर्भात् प्रजापतिर्ब्रह्मा जातः उत्पन्नः ॥११॥ होता पत्नीर्दिलि महिम्नोः प्रैषः। हो
ता यक्षत्प्रजापतिमिति महिम्नः प्रैषाविति श्रुतेः। ऋषिदेवसागायत्री। महिम्नः सोमस्य। महिम्नसेत
स्य सोमग्रहस्य संबंधिनं प्रजापतिं होता देवाय जतु यजतु। इज्यमानः स प्रजापतिर्जुषतां प्रीयतां। सो
मं महिमग्रहं पिबतु च। हे मनुष्य होतः सम्यक् यज ॥१२॥ प्रजापते नेति पूर्वस्य महिम्नो याज्या। प्रजाप
ते न त्वदेतान्यन्य इति होता यजतीति श्रुतेः। प्रजापतेन। प्रजापतेर्हिरण्यगर्भ दृष्टा प्राजापत्या त्रिष्टु
प्। हे प्रजापते। प्रमानोर्ब्रह्मादीनां पालक परमात्मन्। त्वत् त्वत्तः अन्यः कोपि पुरुषः एतानि प्रत्यक्षा

॥१७४॥

दिप्रमाणसिद्धानि। विश्वा। विश्वानि सर्वाणि। रूपाणि नामरूपात्मकानि जगति यानि संति। तानि। न प
रिभूव। परिभवितुं समर्थो नाभूत्। परिच्छिन्नवंतं नियमनं। यः पृथिव्यां तिष्ठन् पृथिव्या अंतरो यं पृथि
वी न वेद यस्य पृथिवी शरीरं यः पृथिवीमंतरो यमयतीति। एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्र
मसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृतौ तिष्ठत इत्यादि श्रुतेः।
परिच्छिन्नवंतं स्यादुपलक्षणं। एतत्सृष्टिसंहारादेस्त्वदन्यो न त्राक्तेः। किं त्वमेवेत्यर्थः। यतो वाइ
मानि भूतानि जायंते। येन जातानि जीवंति। यत्प्रयंत्यभिसंविशंतीत्यादि श्रुतेः। अतो हेतोः। एवं ज्ञानं तावयं यत्का
माः यदिष्टं कामयंत इति यत्कामाः संतः ते तुभ्यं जुहुमः सर्पिः। ते इति युष्मदादेशः। न सर्वनाम। न धात्वेतेनोवं हवि
षादिवदायुदाजतं स्यात्। अस्माकं तुभ्यं जुहुमः हे मादिकं कुर्मः। नोऽस्माकं तदिष्टमस्तु। किंच। वयं रयीणां
धनादिसाधनीभूतधनानां पतयः स्वामिनः स्याम भवेम॥१३॥ ॥दशमोनुवाकः॥ ॥इति श्रीम० पंचविं
शोध्यायः समाप्तः॥ ॥अनेन वेददीपेन मयानीराजितो हरिः। मधुमंसार्धके... सर्ववेदावतु॥१॥ सर्ववेद
कसंवेद्यं विष्णुं देवशिखामणिं। दयातः कालतः सर्वगुणतानेतमाश्रये॥२॥ संति भाष्याणि सर्वत्र प्रणीतानि ह
सूरिभिः। कोप्यस्य महिमा वेद्यो ऽभिज्ञैर्ज्ञेयपदैः सर्वतः॥३॥ न पांडित्याभिमानेन नवं विनस्यापि स्मया। ग्रंथोयं रचि
तः किं तु विद्वत्प्रीतये मया॥४॥ यत्किंचिन्मममंदबुद्धेलपं वै स्यंम्यताधिच्युतेनः। गुणग्राह्याः सदा संतो बालस्यापि तद
इव॥५॥ तादृश्यैर्वेदवाक्यस्य को न रोवेद सर्वतः। अतो यथामति मया ऽभिषितोऽर्थो निरूप्यतां॥६॥ ॥७॥ ॥ ॥

॥ॐ॥ अथ चतुर्विंशोऽध्याये आश्वमेधिकानां पशूनां देवतासंबंधविधायिनो ब्राह्मणास्म कामं त्र्याश्रिधीयं
ते। तत्राश्वमेधे एकविंशतिर्यूपाः संति। तत्राग्निष्ठो यूपोऽग्निष्ठसंज्ञः। तत्र सप्तदश पशवो नियो
ज्यंते। तान् देवतासंबंधकथनपूर्वकमाह॥ अश्वस्तूपरो गोमृगस्ते प्राजापत्याः॥ कात्यायनेनाश्वस्था
दि नोक्तं। कर्मणि विनियोगाभावात्। तथापि इषे त्वेत्यादीति सामान्येनोक्तमध्यादिकमध्ययनादौ स्म
र्तव्यं। अश्वः। तूपरः शृंगोत्पत्तिकालेपि शृंगहीनस्तूपरः। गोमृगो गवयः। एते त्रयः पशवः प्राजापत्याः
प्रजापतिदेवत्याः। ~~अत्र देवताद्वंद्वे चेति पूर्वोत्तरपदयोराद्यचोर्वृद्धिः~~ दिसंदिस्यादिक्षपसु उत्तरपदे
तयद् इति ण्यः। ततः प्राजापत्ये त्वा जुष्टं नियुनज्मीति मंत्रेण यूपे बंधनीयाः। एवमग्रेपि योग्य देवत्यः
पशुः स अमुष्मै त्वा जुष्टं नियुनज्मीत्यादि तत्तद्देवतानामूहेन बंधनीयाः। आग्नेयो ग्निदेवत्यः कृ
ष्णग्रीवः। श्यामवर्णगलः अजः अश्वस्य पुरस्तात् ललाटे ललाटउपायेन बंधनीयः। हन्वोरधस्ता
दश्वस्य हन्वोरधस्तात् सारस्वती मेषी बंधनीया॥१॥ आश्विनावधोरामौ॥ अश्विनौ आश्विदेवत्यौ
अधोरामौ। अधोभागे शुक्लवर्णौ अजौ। रामशब्दः शुक्लवर्णपरः। बाह्वोः अश्वस्य पूर्वपादयोः समी
पे बंधनीयौ। सौमापौष्णः सोमपूषदेवत्यः श्यामः शुक्ले कृष्णरोमा अजः अश्वस्य नाभ्यां बंधनीयः।
॥१०५॥ अत्र देवताद्वंद्वे चेति पूर्वोत्तरपदयोराद्यचोर्वृद्धिः। एवमुत्तरत्रापि ज्ञेयः। श्वेतः कृष्णश्च सौर्ययामौ ॥१०५॥
श्वेतः पशुः सूर्यदेवत्यः दक्षिणपार्श्वे बंधनीयः। कृष्णो यमदेवत्यः वामपार्श्वे बंधनीयः॥२॥ त्वा
ष्ट्रौ लोमशसक्थौ। त्वाष्ट्रौ अत्र सास्य देवतेत्यण्। त्वष्टृदेवत्यौ। लोमशसक्थौ। रोमयुक्तसक्थिकौ अजौ

अप इति सांतः कर्मवाची =

=वाश्वस्त्यिति सूत्रे अश्वस्य सस्थ्याः कुर्वोः बंधनीयो। वायव्यः। श्वेतवर्णः पशुः पुच्छे ऽश्वस्य बंधनीयः। स्वं वपस्याय्यनो नैकर्म
णे इंद्राय वैहत। गर्तघातिनी। वैष्णवः। विष्णुदेवसः वामनः पशुरश्वस्य पुच्छे एव। अंगांतरानुपदेशात् ए
वमश्वादिभिः सह पंचदश त्रवेति। एते पर्यग्न्याळभ्यंते। अंगानां पतितो विद्यमानत्वात्। अत्राश्वस्य शरीरं
पा तरंगयतुं बीफलं वडे ... बध्वा गुंफनीयं। ततः कृष्णग्रीव आग्नेयो रराटे इत्यादयो ऽश्वस्य शरीरे यथोक्तस्था
नेसंबद्धाप्यांरज्वो बंधनीयाः। ततो रोहितो धूम्ररोहित इत्यादयो द्वादशपशवः। त्रिशितिबाहुरन्यतः शितिबा
हुः समंतशितिबाहुस्ते बार्हस्पत्यास्ते ताः मध्यमे एव यूपे नियोज्याः। सप्तदशो वपशून्मध्यमे यूपआल
भंत इति श्रुतेः। तत्र त्रयाणां तूपरगोमृगाः। ह्रोचाग्नेयोऽएकादशिनो। द्वादशरोहितादयः। एवं सप्तदशानाम
ध्यमे यूपे नियोज्याः। ततः पृषती क्षुद्रपृषती इत्यादीनां श्वेताः सौर्या इत्यंतानां त्रयस्त्रिंशतां पश
नां मध्ये पंचदशपंचदश पशून् एकैकस्मिन्यूपे नियुनक्ति। एवमितरेषु यूपेषु पंचपंचदशपंचदशेति पशू
न्नियोज्याः। एकैकस्मिन्नेकादशिनान्। एवं मध्यमयूपव्यतिरिक्तेषु विंशतियूपेषु षोडश षोडशपशवो नि
यंति। षोडश षोडशेतरेष्विति वचनात्। एवं पशुनियोजनप्रकारोऽत्रानुसंधेय इत्यलं। रोहितः सर्व
रक्तः। धूम्ररोहितः धूम्रवर्णमिश्रो रक्तः। कर्कंधुरोहितः। बदरसदृशो रक्तः। ते रोहितादयस्त्रयः सो
सोमापौष्ण = म्याः सोमदेवत्याः। सोमापौष्णं नियुनज्मीत्यादिमंत्रेण प्रत्येकं मध्यमे यूप एव नियोज्याः। बभ्रुः केपि
लवर्णः। अरुणबभ्रुः। अरुणवर्णमिश्रबभ्रुः। शुकबभ्रुः शुकवर्णसदृशो बभ्रुः। ते त्रयो वारुणाः व
रुणदेवत्याः। मध्यमे यूपे नियोज्याः॥३॥ शितिरंध्रोऽन्यतः शितिरंध्रः॥ शितिपृष्ठांरं ध्रं छिद्रं बिलं दुरूपं

सर्वतः

यस्य स शितिरंध्रः । अन्यतरस्मिन्नेकपार्श्वे शितिरंध्रोऽन्यतः शितिरंध्रः । समंतं शितिरंध्रः समंतशितिरंध्रः । तेत्र
यः सावित्राः सवितृदेवत्याः मध्यमेयूपे एव । शितिबाहुः श्वेतपूर्वपादः । अन्यतः शितिबाहुः एकस्मिन्ने
व पार्श्वे शितिपादः । समंतशितिबाहुः सर्वश्वेतबाहुः । शिती धवलमेचकौ विस्पष्टौ यस्य शितिरंध्रः श्वेतप
रः । ते बार्हस्पत्याः बृहस्पतिदेवत्याः मध्यमे यूपे एव ॥ अथ द्वितीययूपे । पृषती विचित्रवर्णबिंदुयुक्ता ना
री । क्षुद्रपृषती सूक्ष्मविचित्रबिंदुयुक्ता । स्थूलपृषती । स्थूलविचित्रबिंदुयुक्ता । ताः स्त्रीपशवो मैत्रा
वरुण्यः मित्रावरुणदेवत्याः द्वितीये यूपे नियोज्याः पूर्ववत् ॥४॥ शुद्धवालः । शुद्धरोमा । सर्वशुद्धवा
लः मणिवालो मणिवर्णकेशः । ते त्रय आश्विनाः अश्विदेवत्याः श्येतः श्वेतवर्णः । श्येताक्षः श्वेतनेत्रः ।
अरुणो रक्तः ते त्रयः पशुपतये पशुपतिस्वगुणविशिष्टाय रुद्राय नियोज्याः । तथा कर्णास्त्रयः बहु
वचनात् । कर्णाः छिद्रेव्वद्धे विति क्षिप्तो केः कर्णाः छिद्रसहिताः पशवः इति विशेषाः याम्याः यमदेवताः
एते सर्वे द्वितीययूपे नियोज्याः ॥५॥ अवलिप्तो रौद्रः । अवलिप्ताः सगर्वाः त्रयः रौद्राः रुद्रदेवताः । एतेपि
द्वितीये यूपे नियोज्याः । अथ तृतीये । नभोरूपाः । आकाशसदृशवर्णाः पार्जन्याः पर्जन्यदेवताः त्रयः
बहुवचनस्य त्रित्वे पर्यवसानात् । पृश्निः विचित्रवर्णः । तिरश्चीनानि पृश्नीनि बिंदवो यस्य सः तिर
श्चीनपृश्निः । ऊर्ध्वानि पृश्नीनि यस्य सः ऊर्ध्वपृश्निः । ते त्रयो मारुताः । मरुद्देवताकाः तृतीये नियोज्याः ।
॥६॥ फल्गूर्लोहितोर्णी । फल्गुः अपुष्टा नारी । लोहितोर्णी ... करोमवती । पलक्षी श्वेता । पलक्षा
बलक्षो धवलो अर्जुन इति कोशः । ताः सारस्वत्यः सरस्वतीदेवताः । प्लीहाकर्णः ।

॥१०६॥

॥१०६॥

ह्ली हौरोग विशेषः। तद्युक्तौ कर्णौ यस्य स ह्लीहाकर्णः। दीर्घस्कंदः सः। वृंठाकर्णः। गुठन्ना बोइ ह्रस्ववाची। ह्रस्व
कर्णः। अत्रापि दीर्घस्कंदः सः। सच काण्वमतप्रवृत्ति दीर्घः। तेन पदपाठेनो हुराव नत्वो अभ्याः ६ लो ६ हकर्णः अ
धिकरक्तवर्णकर्णः। तेत्रय स्त्वाष्ट्राः। त्वष्टृदेवत्याः। एते पितली पेनियोज्याः। ७। कृष्णग्रीवः शितिकक्षः। कृ
ष्णग्रीवः नील वर्णकंठः। शितिकक्षः श्वेतकक्षः। अंजिसक्थः। अंजिपुंड्रसक्थ्योरूर्वोर्यस्य सः। तेत्रय
ऐंद्राग्नाइंद्राग्निदेवताः। एते पितली येपोज्याः। अथ चतुर्थे। कृष्णांजिः। कृष्णपुंड्रः। अल्पांजिः। अल्पबिंदुः।
महांजिः महाबिंदुः। तेत्रय उषस्याः। उषादेवताः। चतुर्थे नियोज्याः। ८। शिल्पावैश्वदेव्यः। शिल्पाः वि
चित्रवर्णाः स्त्रियः। वैश्वदेव्यः विश्वदेवदेवत्याः। रोहिण्यो रक्तवर्णाः। त्र्यवयः सार्द्ध संवत्सरास्त्रियो ऽज्ञाः
वाचे वाग्देवतायै। अविज्ञाताः कृष्णग्रीवादि सर्वोक्त चिन्ह ज्ञानशून्याः त्रयः पत्नीवः अदित्यै देवतायै। स
रूपाः समानरूपाः स्त्रयः पत्नीवो धात्रे। धातृदेवतायै। चतुर्थे यूपे नियोज्याः। एवं पंचदश सपर्णाः। अथ
पंचमे। वत्सतर्यः बालछाग्यः। ते ... देवानां पत्नीभ्यो देवताभ्यो नियोज्याः पंचमे यूपे। ९। प्रथमोनुवा
कः। कृष्णग्रीवा आग्नेयाः। कृष्णग्रीवाः पशवः आग्नेयाः। अग्निदेवत्याः। शितिभ्रवः। श्वेतभ्रुकु
टास्त्रयः पशवो वसूनां। ... वसुभ्यः। रोहिता रक्तवर्णास्त्रयो रुद्राणां रुद्रेभ्यः। श्वेताः अवरोकि
णः अवलोकिनः। रत्ल यो रत्ने ... यद्वा ऽवाधस्तात् रोकच्छिद्रं येषां ते तथा। छिद्रमिव धनं रोकः स्यमि
धानात्। तेत्रय आदित्यानां आदित्येभ्यः। एतेपि पंचमे नियोज्याः। १। उन्नतऋषभः। उन्नतः उच्चः। ऋषभः
पुष्टः। ४ अथ षष्ठे। नभोरूपाः आकाश सदृशाः त्रयः पार्जन्याः पर्जन्यदेवताः नियोज्याः। २४ वामनः बहुन्य

न्यपि वयसि गते वृद्धिरहितः ॥ तेत्रयः ऐंद्रावैष्णवाः इंद्रविष्णुदेवता ॥ उन्नतः त्रितिबाहुः श्वेतबाहुः त्रितिपृष्ठः श्वेतपृष्ठः ॥ तेत्रयः ऐंद्राबार्हस्पत्यसाः ॥ इंद्रबृहस्पतिदेवता ॥ शुकरूपाः शुकपक्षिसमवर्णाः ॥ त्रयः पत्वः वाजिनाः ॥ वाजीदेवतायेषां ते तथा ॥ वाजिदेवताः ॥ कल्माषाः कर्बुरवर्णास्त्रय आग्निमारुताः अग्निमरुद्देवताः एते पंचदशा षष्ठे नियोज्याः ॥ अथ सप्तमे ॥ सौम्याः रुरुकृष्णवर्णास्त्रयः पौष्णाः पूषदेवताः ॥ २ ॥ एता ऐंद्राः ॥ एताः कर्बुरवर्णास्त्रयः पत्वा ऐंद्राग्नाः इंद्राग्निदेवताः ॥ एतशब्दोऽयं वर्णवचनः ॥ शबले ताम्रे कर्बुरे इत्यभिधानात् ॥ अत एव एता वर्ण इति प्राति शाख्येनानुदात्तः ॥ द्विरूपाः वर्णद्वयोपेतास्त्रयः अग्नीषोमीयाः अग्निसोमदेवताः वामनाः अनड्वाहः अनसो वहने समर्था अड्डास्त्रय आग्नावैष्णवाः अग्निविष्णुदेवताः ॥ वशाः वंध्याः स्त्रियस्त्रोऽमामैत्रावरुण्याः मित्रावरुणदेवता ॥ एते पंचदश सप्तमे योज्याः ॥ अथाष्टमे ॥ अन्यतएन्यः एकपार्श्वे कर्बुरवर्णाः तिस्रोऽस्ताः वर्णा दन्तुदात्तात्तोपधात्तोन इति ङीषि स्त्रियां कृते सति तकारस्य नकारः स्यादित्येवं रूपसिद्धिः ॥ मैत्र्यः मित्रदेवता ॥ ३ ॥ कृष्णग्रीवा आग्नेयाः ॥ नीलकंठास्त्रय आग्नेयाः बभ्रवः कपिलवर्णास्त्रयः सौम्याः श्वेतास्त्रयो वायव्याः अविज्ञातारूपेण ॥ त्रयः अदित्यै देवतायै ॥ अथ नवमे ॥ सरूपास्त्रयो धात्रे ॥ वत्सतर्यस्तिस्रो देवानां पत्नीभ्यः नियोज्याः ॥ ४ ॥ कृष्णा भौमाः ॥ कृष्णवर्णाः वर्णार्थ स्यादेतादात्तः ॥ भूमिदेवतास्त्रयः ॥ धूम्रास्त्रयः आंतरिक्षाः अंतरिक्षदेवताः बृहंतो महांतस्त्रयो दिव्याः द्युदेवताः ॥ एते पंचदश नवमे नियोज्याः ॥ अथ दशमे ॥ शबलाः कर्बुरास्त्रयो वैद्युताः विद्युद्देवताः ॥ सिध्माः सिध्मारव्यरोगवंतः त्रयस्तारकाः नक्षत्रदेवताः ॥ ५ ॥ ॥ इति पंचमोऽनुवाकः ॥ ॥ धूम्रान्व

॥१०७॥

सेनाय। धूम्रांस्त्रीन्नानाय संसृतायदेवतायै आलभेतेत्यनु[illegible]शमे। श्वेतांस्त्रीन्ग्रीष्माय। कृष्णांस्त्रीन्वर्षा
भ्यः। एवं पंचदशदश्मानि नियोज्याः॥ अथैकादशो। अरुणान्रक्तांस्त्रीन्शरदे। पृषतो नानावर्णबिंदुयुक्तान्
त्रीन्हेमंताय। पिशंगान्रक्तो हितमिश्रकपिलवर्णान्त्रीन्शिशिराय॥ त्र्यवयो गायत्र्यै॥ षण्मा
सात्मकः कालोऽविरित्युच्यते। त्रयोऽवयो येषां ते त्र्यवयः। सार्द्धसंवत्सराः। त्र्यवयः पञ्चावो गायत्र्यै देव
तायै नियोज्याः। पंचावयः सार्द्धद्विसंवत्सरास्त्रिष्टुभे। एवमेकादशो पंचदशैव नियोज्याः॥ अथ द्वादशो॥ दि
त्यवाहः। दित्यं पुंगवं वहंतीति दित्यवाहः [illegible] जोणिर्विरित्यनुवर्त्तमाने। वहश्चेति सूत्रेण ण्वो [illegible] दित्यवाडिति
वाडिति रूपसिद्धिः। द्विसंवत्सरास्त्रयः पञ्चावि जगत्यै। त्रिवत्साः त्रिवत्सरास्त्रयोऽनुष्टुभे। तुर्यवाहः सा
र्द्धत्रिवत्सरास्त्रय उष्णिहे॥ १२॥ पष्ठवाहो विराजे॥ पष्ठवाहः चतुः संवत्सरास्त्रयो विराजे। उक्षाणः सेचनसम
र्था ऋषभास्सेचनसमर्था नेयुवानस्त्रयो [illegible] पंचदशैव नियोज्याः। अथ त्रयोदशो। ऋषभाः उक्षाणोऽप्य
धिकवयस्कास्त्रयः ककुभे। अनड्वाहः [illegible] नसो [illegible] समर्थास्त्रयोऽजाः पंक्त्यै। धेनवः नवप्रसूतास्तिस्रोऽज्ञाअ
तिछंदसे॥ १३॥ कृष्णग्रीवा आग्नेयाः। [illegible] सत्या देवता रूपश्चावः श्वेताः सौर्यादिसंताः कथ्यंते। तत्र प्रथमं दे
वदेवपर्वे देवतापशवोऽच्यंते। कृष्णग्रीवास्त्रय आग्नेयाः। बभ्रवः कपिलास्त्रयः सौम्याः। एवं पंचदशात्रयो
दशो। अथ चतुर्दशो। उपध्वस्ताः उपध्वंसनमधःपतनं तद्गुणविशिष्टाः वर्णांतरमिश्रितावा त्रयः सावित्राः।
सविता देवताः। वत्सतर्यस्तिस्रः सारस्वत्यः सरस्वती देवताः। श्यामाः [illegible] कृष्णवर्णाः पौष्णाः पूषदेवताः।
पृश्नयस्तनुकाया विचित्रवर्णा वात्रयो मारुता मरुद्देवताः। बहुरूपास्त्रयो वैश्वदेवाः एते पंचदशात्चतुर्द

द्रौ नियोज्या : । अथ पंचदश्यो । वंध्या स्तिस्रो द्यावापृथिवीया : द्यावापृथिवी देवता : । ४ । उक्ता : संवत्सरा : । अथ कृष्णग्रीवा [illegible] उच्यंते । संवत्सराख्येन कृष्णग्रीवा आग्नेयाइत्यादय : पंचदश [illegible] कोक्ता : । इद्वत्सरादयपंचपर्वतोद्यंते पंच संवत्सराणि हवींषि भवंतीति वत् । यथा चातुर्मास्येषु चतुर्षु पर्वसु आग्नेयादीनि पंच हवींषि समानानि । एवम त्रापि वत्सराणां पर्वणां संबंधि नामा धानां पंचानां देवा नामा धाए ते पंचदशपशव : समाना एव भवंति । तेन संव त्सराख्या : । तथा चाग्नेयादय : पंचदश पशव उक्ता इत्यर्थ : । तत्र । आग्नेया : कृष्णग्रीवास्त्रय : । सौम्याबभ्रवस्त्र य : सावित्राउपध्वस्तास्त्रय : सारस्वता : । वत्सतर्य स्तिस्र : पंचदश्यो यूपे नियोज्या : । अथ षोडश्यो । पौष्णा : श्यामा स्त्रय : एते संवत्सरा : । एता : कर्बुरास्त्रय : ऐन्द्राग्ना : [illegible] वारुणास्त्रय : । पृश्नय : स्वयमरुता : सास्त्रयो मारुता : । तूपरा : अश्वेंगा : काया : के देवतास्त्रयो नियोज्या : । । ५ । तृतीयोनुवाक : । । । अग्नयेनीकवते । अथ सप्तदश्यो लोकमे धपशव : । प्रथमं गोन मात्रा प्रथमगर्भ आता न्त्रीन् ज्ञानन् अनीकवते अनीक तद्गुण विशिष्टायाग्नये आल भते निपुनक्ति । वात सम्यक् हेवातया । तयासह वर्त्तं तद्गुति सवा या स्तान्वातमंडली मध्यस्थान् त्रीन् ज्ञान्सां तप नेभ्य मरुद्भ्य : । बध्वि हाबू । धिरप्रसूतान् त्रीन् ज्ञातान् गृहमेधिभ्यो मरुद्भ्य : । संसृष्टान् सह ब्रह्मणा सृष्टान् त्रीन् क्रीडिभ्यो मरुद्भ्य : । अनुसृष्टान् अनुक्रमेण जातान् त्रीन् स्वतवद्भ्यो मरुद्भ्य : आलभते इति शेष : । १ । । अथे उक्ता : संवत्सरा : । अथाष्टादश्यो यूपे महाहविर्देवता पशवो नियोज्या : कृष्णग्रीवादय : पंचदश पूर्ववत् । अथे कोनविंशो । एताऐन्द्राग्नास्त्रय : । प्राश्निंगा : प्रश्निंगा : । संहितायां दीर्घ आर्ष : । प्रवृष्टश्निंगा : माहेंद्रा : महेन्द्रदेव तास्त्रय : । बहुरूपा नानारूपास्त्रयो वैश्वकर्मणा : विश्वकर्मदेवता : । । २ । । धूम्राबभ्लुनीकाशा : । अथ पित्र्याद्वि देवतापशव : । धूम्रा : कृष्णवर्णमिश्रलोहितवर्णा : बभ्लुनीकाशा : । कपिलवर्णसदृशा : । त्रय : पशव : सोम

।। १० ।।

।। १० ।।

वतां पितॄणां। समनीकाश्च संकाशा सदृशा प्रतिमादय इस निधानं। तत्र वः कपिलाः धूम्रनीकाशाः धूम्रसदृशास्त्र
योऽब र्हिषदां पितॄणां। एवं पंचदशैकोनविंशो नियोज्याः। अथ विंशो यूपे। कृष्णाः बभ्रुनीकाशाः। त्रयो ऽग्निष्वात्ता
नां पितॄणां। वनीकाशाः इति दीर्घसूत्रांदसः। कृष्णाः पृषंतो बिंदुयुक्तास्त्रयस्त्रैयंबकाः। त्र्यंबकदेवताः॥ ३॥ उक्ताः से
वराः। अथ शुनासीरीयपशवः। तत्र संवरा आग्नेयादयः पंचदशोक्ताः तेन। कृष्णग्रीवा आग्नेया स्त्रयः। बभ्रवः
सौम्यास्त्रयः। उपध्वस्तास्सावित्रास्त्रयो विंशो नियोज्याः॥ अथैकविंशो। वत्सतर्यः सारस्वत्यस्तिस्रः। श्यामाः पौ
ष्णास्त्रयः एताः कर्बुरास्त्रयः शुनासीरीयाः शुनासीरदेवताः। श्वेतास्त्रयो वायव्याः। श्वेतास्त्रयः सौर्याः सूर्यदे
वताः। एवं पंचदशैकविंशो नियोज्याः। एवं समाप्ता यूपाः॥ इ सम्बाधाः सौर्यांताः सप्तविंशत्यधिकं शतं तत्र यं ग्रा
म्याः पशवः उक्ताः॥ ४॥ वसंताय कपिंजलान् अथारण्याः पशव उच्यंते। अत्रैकविंशतिर्यूपाः। तेषां यूपानां विं
शतिरंतरालानि संति। तेष्वंतरालेषु मंत्र पाठ समनिक्रमेण कपिंजलादयस्त्रयो दशात्र यो दशापशवः आल
भ्यंते। अत्र यूपांतरालेषु आरण्यपशुनियम ज्ञोपायं उक्तो मानव सूत्रे। नाडीषु शुषिमत्सु कानन करंडेषु
सर्पान्। पंजरेषु मृगव्याघ्रसिंहान् अन्तेषु मकरमत्स्यमंडूकान्। जालेषु पक्षिणः। कारासु हस्तिनः। नौषु
उदकानि। यथार्थमितरानिति। येषु येन येनोपायेन यूपांतरालेषु तिष्ठंति ते तेनोपायेन स्थापनीया इति
तात्पर्यं॥ अत्र येषामारण्यपशूनां वाचिका नामधेयानि श्रूयंते। ते निगम निरुक्त निघंटु व्याख्या व्याकरणादि
वस्त्रविधानग्रंथेभ्यो विलोक्यावगंतव्याः। आटविकेभ्यश्च लक्षणीयाः। तत्र प्रथमो ऽश्यन्ते यूपांतराले त्रीन्
कपिंजलान् वसंताय आलभते नियुनक्ति। त्रीन् कलविंकान् शुष्टकान् ग्रीष्माय। तित्तिरीन् वर्षाभ्यः। वर्तिकाः शर

दे। ततस्त्रयाणां संपादितानां कृकवाकूणां मध्ये एकं ककरं हेमंताय॥ अथ द्वितीयेऽवकाशे॥ शिष्टौ द्वौ ककरौ पक्षि
विशेषौ हेमंताय। त्रीन् विककरान् शिशिराय।५॥ ॥चतुर्थोऽनुवाकः॥ ॥समुद्राय शिशुमारान्॥ त्रीन् शि
शुमारान् जलचरजंतून् समुद्राय आलभते। त्रीन् मंडूकान् मंडूकान् पर्जन्याय। तथात्रयाणां मत्स्यानां मध्ये
द्वौ अद्भ्यः। अथ तृतीयेऽवकाशे। एकं शिष्टं मत्स्यमद्भ्यः। त्रीन् कुलीपयान् जलजलचरान् मित्राय। त्रीन् ना
क्रान् नक्राख्यवन्नाक्रास्तान् वरुणाय॥१॥ सोमाय हंसान्। त्रीन् हंसान् सोमायालभते। तिस्रो बलाकाः ब
लाकस्त्रियो वायवे। अथ चतुर्थेऽवकाशे। इंद्राग्निभ्यां क्रुंचान् पक्षिणं ... त्रीन् मद्गून् जलकाकान् मित्राय। त्री
श्चक्रवाकान् वरुणाय॥२॥ अग्नये कुटरून् ... कुटरून् कुक्कुटान् अग्नये आलभते। तत्र तस्त्रयाणामुलूका
नां मध्ये एकमुलूकं वनस्पतिभ्यः॥ अथ पंचमेऽवकाशे॥ द्वौ उलूकौ काककौ वेरिणौ वनस्पतिभ्यः। त्रीन् श्वावा
न् अग्नीषोमाभ्यां। त्रीन् मयूरान् अश्विभ्यां। त्रीन् कपोतान् मित्रावरुणाभ्यां॥३॥ सोमाय लबान्। त्रयाणां ल
बानां लावकानां मध्ये द्वौ सोमाय। अथ षष्ठेऽवकाशे। एकं लबं सोमाय। कोलीकाः स्त्रीत्वष्ट्रे। तिस्रो गोषा
दीः गवांसादयित्रीः सहाः संज्ञाः पक्षिणीः देवानां पत्नीभ्यः। तिस्रः कुलीकाः पक्षिणीः। देवजामिभ्यः
देवस्त्रीभ्यः। जामिः स्वसृकुलस्त्रियोऽस्मिन्निति धातात्। त्रीन् पार्ष्णीन्। गृहपतयेऽग्नये॥४॥ अह्ने पारावतान्।
अथ सप्तमेऽवकाशे। त्रीन् पारावतान् कुलरवान् अह्ने आलभते। तिस्रः सीचापूः पक्षिणीः रात्र्यै। जतूः प
क्षाख्याः पक्षिणीः। अहोरात्रयोः संधिभ्यः॥ त्रीन् दात्यौहान् कालकंठान् मासेभ्यः। त्रयाणां महतां सुपर्णा
नां मध्ये एकं संवत्सराय॥ अथाष्टमेऽवकाशे। द्वौ महांतौ सुपर्णौ संवत्सराय॥५॥ ॥पंचमोऽनुवाकः॥ ॥भू
म्या आखून्। आखून् त्रीन् मूषकान् भूम्यै आलभते। पांक्त्रान् मूषकजातिविशेषान्। अंतरिक्षाय। कशा॥

॥१०९॥

॥१०९॥

नृमषकत्नेदान्दिवे।त्रीन्नकुलान्दिग्भ्यः।तत्रद्वे अष्टमे।अथनवमे।एकंनवमे।त्रीन्बभ्रुकान् अलूपनकुलान् ।अ
वांतरदिग्भ्यः॥१॥वसुभ्यन्त्रूपान्।रूत्वादयोमृगविशेषाः।त्रीन्रुरून्रुद्रेभ्यआलभते।त्रीन्रुरून्
द्रेभ्यः।त्रीन्पृषतान्आदित्येभ्यः॥ अथदशमेवकान्हे।त्रीन्पृषतान्विश्वेभ्योदेवेभ्यः।कुलुंगान्कुरंगान्साध्येभ्यः॥२॥
ईशानायपरस्वतः।परस्वतोमृगविशेषानीशानायालभते।त्रीन्गौरान्गौरमृगान्मित्राय।त्रीन्महिषान्वरु
णाय।तत्रैकंद्वादशे।अथैकादशः वकन्नो॥ द्वावत्र।त्रीन्गवयान्गोसदृशानारण्यान्बृहस्पतये।त्रीनुष्ट्रांस्त्व
ष्ट्रे॥३॥प्रजापतयेपुरुषान्।त्रीन्प्रजूरुषान्हस्तिनः प्रजापतयआलभते।ऋषीन्वेक्रंलङ्गान्वाचे।तन्मध्येद्वा
वेवात्र।अथद्वादशावकाशे।एकमत्र।त्रीन्मशकांश्चक्षुषे।त्रयोमृगाः श्रोत्रायआलभ्यास्याइतिशेषः॥४॥प्र
जापतयेच।एकोगोमृगोगवयः प्रजापतयेचवायवेचालियोज्यः।एकआरण्योमेषोवरुणाय।एकः कृष्णोमे
घायमाय।एकोमर्कटोमनुष्यराजाय।एकः शार्दूलायदेवताये।एकागवयीऋषभायदेवताय।अथत्र
योदशावकाशे।एकावर्तिका क्षिप्रश्येनाय [illegible] देगत्या।एकःकृमिः कीटः नीलंगोः नीलंगुदेवाय।एकः शिशुमारो
जलचरः समुद्राय।एकोहस्ती हिमवतेपर्वताय॥५॥षष्ठोनुवाकः॥ ॥मयुः प्राजापत्यः।तुरंगवदनोमयुरित्यभि
धानात्मयुरश्वमुखः किन्नरः प्राजापत्यः प्रजापतिदेवताकः।उलोमृगविशेषः।हलिक्ष्णः सिंहविशेषः।
वृषदंशो बिडालः।तत्रयोधत्रि।ककोबकः दिग्भ्यः।एकाधुंक्षा पक्षिणी आग्नेयी अग्निदेवत्या।धुंक्षे
तिवकारसंयोगरहितंकेचनपठंति।कलविंकः।रोहितादिः।रक्तवर्णसर्पः।पुष्करसादः पुष्करेकमलेसीदती
ति पुष्करसादः।कमलनत्वीपक्षी।तेत्रयस्त्वाष्ट्राः॥ अथचतुर्दशोऽवकाशे।एकः कुंचावांचे।१।सोमायकुलुं
गः॥कुलुंगः एकः सोमाय।आरण्योवनमजः।अजः छागः।नकुलः।शाका।शाकुंतिः।तेत्रयः पौष्णाः।क्रोष्टा

आरण्यान्=

नपुंसकब्रारस र्थ=

सृगालः। मायोः मायवे देवाय। एकोगोस्मृगइस्य। पिद्वो मृगविशेषः। न्यंकुरपि। ककुटस्य। तेत्रयः अनुमसे। चक्रवा
कः प्रतिश्रुत्कायै देवतायै। अत्र प्रतिपूर्वाच्छृणोतेः क्विपि ह्रस्वस्य पिति कृति तुक्। स्वार्थिक प्रत्यये रूपसिद्धिः।
तेन प्रतिश्रुद्वादेव पग्रहः पदपाठे॥२॥ सौरी बलाका। बलाका बलाकस्त्री। सौरी सूर्यदेवत्या। नार्गेः पक्षिविशे
षः। अथ पंचदशावकाशः। सृजयः पक्षिविशेषः। शायांडकोपि। तेत्रयो मैत्राः मित्रदेवताः। पुरुषवाक् मनुष्यवद्व
दंती। शारिः शुकी सरस्वत्यै। श्वावित्सत्यै [illegible] भौमी भूमिदेवत्या। शार्दूलो व्याघ्रः। कृकवाकुश्चित्रकः। पृदाकुः सर्पः।
तेत्रयो मन्यवे। पुरुषवाक् पुरुषवद्वदं[illegible]र्वते। समुद्राय॥३॥ सुपर्णः पार्जन्यः। सुपर्णो गरुत्मान्। पार्ज
न्यः पर्जन्यदेवतः। आतिः आटी। वाहसः। दार्वाघाटः ककुटः। तेत्रयः पक्षिविशेषाः। वायवे। वाचस्पतये एते ऽपि
विशेषाय बृहस्पतये पैंगराजः पक्षि[illegible]नियोज्याः। अथ षोडशावकाशः। अलजः पक्षी। आंतरिक्षः
अंतरिक्षदेवत्यः। प्लवो जलपक्षी। मद्गुः कारंडवः मत्स्यः। तेनदीपतये। कूर्मः कच्छपः। द्यावापृथिवीयः द्या
वापृथिवीदेवतः॥४॥ पुरुषमृगश्चंद्रमसे। नुमृगः चंद्रमसः चंद्रमसे। गोधा। कालका। दार्वाघाटः सारसः।
तेत्रयो वनस्पतीनां वनस्पतिभ्यः। कृकवाकुः ताम्रचूडः। सावित्रः सवितृदेवत्यतः। हंसो वातस्य वाताय। ना
क्रः। स्वार्थे ष्यञ्। नक्रः। मकरः कुलीपयः। तेत्रयो जलचराः अकूपारस्य समुद्राय। समुद्रो ह्यकूपार इत्यभिधा ॥११०॥

॥११०॥

नात्। एतेषां त्रयाणां मध्ये द्वौ षोडशे। अथ सप्तदशावकाशः। एकः कुलीपयः। अकूपाराय। शल्यकः श्वावित् ह्री
यै देवतायै॥५॥ ॥सप्तमोनुवाकः॥ ॥एण्यह्नः। एणी मृगी अह्नः। अहर्देवतायै। मंडूको मूषिका। तित्तिरिस्ते त्र
योः सर्पाणां सर्पेभ्यः। लोपाशो वनचरविशेषः। आश्विनः अश्विदेवतः। कृष्णो हरिणो रात्र्यै। कृष्ण द्वात्र
मगवचनः। कृष्णो मृगसेयाग इति प्रातिशाख्येन। ऋषु दात्यौहः। पुरुषः नक्षत्र। अलजः। सुषिलीका। एताय

द्विधिहृत्वो। तेत्रय इतरजनानां देवानां इतरजनेभ्यः। जहका ... जस्यं को चनी वैष्णवी विष्णुदेवत्या॥१॥ अन्य-
वापोर्द्धमासानां। अन्यवापः कोकिलाख्यः पक्षिविशेषः अर्द्धमासानां अर्द्धमासेभ्यः। अथाष्टादशो ऽवकाशो। ऋश्यो म-
गविशेषः। मयूरो बर्ही। सुपर्णो महान् गरुत्मान्। ते गंधर्वाणां गंधर्वेभ्यः। उद्रः जलचरः कर्कटसदृशः। अपामुद्रः। कु-
लीपयः कच्छपः। मासां मासेभ्यः। वर्णविपर्ययपक्षे ...दसः। रोहितकृष्णः। कुंकुणाची वनचरी। गोलत्तिका। ते
त्रयः अप्सरसामप्सरोभ्यः। असितः कृष्णवर्णः पत्नुर्भ सर्वे॥२॥ वर्षाहूर्न्हूतानां। वर्षाहूः। वर्षाभूः तकी। वर्ण
विपर्ययः। ऋतूनामृतुभ्यः। आखुर्मूषकः। कन्नो मांधाल ... मूषकविशेषो। तेत्रयः पितॄणां पितृभ्यः।
अथैकोनविंशोऽवकाशो। अजगरो महासर्पो बलाय। कपिंजलो वसूनां वसुभ्यः। कपोतः। उलूकः। शशश्च
तेनिर्ऋत्यै। आरण्यो मेषो वरुणाय॥३॥ श्वित्र आदित्यानां। श्वित्रः श्वेतः पत्रः आदित्यानामादित्येभ्यः। उ-
ष्ट्रो दीर्घग्रीवः। घृणीवान्। घृणिवान्। ... ।तेजस्वी पत्रः। वाध्रीनसः कंठे स्तनवानजः। तेत्रयो मत्यै।
सृमरो गवयोऽरण्याय। रुरुर्मृगः रौद्रः रुद्रदैवतः। कृपिः पक्षिविशेषः। अथ विंशोऽवकाशो। कुटरुः कुक्कु-
टः। दास्योहः। कालकंठः तेत्रयो वाजिनां वाजिभ्यः। पिकः कोकिलः कामाय॥४॥ खड्गो वैश्वदेवः। खड्गो मृगो वै-
श्वदेवदैवतः। कृष्णः श्यामवर्णः अंतोदात्तः कृष्णशब्दो वर्णवचनः। श्वा सारमेयः। कर्णः मृगविशेषः। अंता-
दान्तत्वात्। अवयववाची कर्णशब्दस्तु कर्णः स्वांगे इति प्रातिशाख्येनाद्युदात्तः। यथा तत्र कर्णो ... ऽरिसादिः।
गर्द... तरक्षुर्मृगादनः तरक्षुसारमेयेभ्यः। सूकर इंद्राय। सिंहो मारुतः मरुद्दैवतः। कृकलासः सरठः

पिप्पकापक्षिणी। शकुनिः पक्षी। तेत्रयः शरव्यायै देवतायै। पृषतो मृगविशेष एकः विश्वेषां देवानां विश्वेभ्यो दे
वेभ्यः। तस्यै तस्यै देवतायै जुष्टं नियुनज्मीति प्रत्येकं तेषु तेषु यूपेषु तेषु तेष्वेव कानेशेषु च नियोज्या इति
तावः। अत्र द्वविंशतिरेकादशिनः ३२। सप्तविंशत्यधिकानि त्रीणि शतानि तान्यश्वस्तूपरइत्याद्याः श्वेताः सौ
र्याः इत्यंताः ३२७। वसंताय कपिंजलानित्याद्याः विश्वेषां देवानां पृषत इत्यंताः आरण्याः पशवः॥२६०॥ स
र्वे मिलिताः षट्शतानि नवाधिकानि भवंति॥ श्लोकश्च मामकः। षट्शतानि नियुज्यंते पशूनां
मध्यमेहनि। अश्वमेधस्य यज्ञस्य कानि चेति। ते चारण्याः सर्वे उत्स्रष्टव्याः न तु हिंस्या इति
याज्ञिकसंप्रदायः। एषोर्थो ध्यायो आसने अभिहितः। प्रजापतिरकामयतोभौ लोकावभिजयेयं देव
लोकं च मनुष्यलोकं चेति स एतान्पशूनपश्यद्ग्राम्यांश्चारण्यांश्च तानालभत ततो वै स इमौ लोकाववारुंध
ग्राम्यैरेव पशुभिरिमं लोकमवारुंधारण्यैरमुमयं वै मनुष्यलोको सौ देवलोको देवलोकइत्यादिना।
।५॥ ॥षष्ठोनुवाकः॥ ॥इतिश्रीम० षड्विंशोध्यायः॥ ॥ॐ३म्॥ ॥ॐ३म्॥ अथ सप्तविं
शोध्याये आज्यमेवाश्वां तालेन परिकल्प्य शादादिदेवताहोमादिकम त्रिधीयते॥ तथा च कात्याय
नः॥ स्विष्टकृद्वनस्पत्यंतरे मल्यं कुलादेवताभ्यो गेभ्यो जुहोति समुष्मै स्वाहेति प्रतिदेवतं शादप्रभृतीति त्वंगं
तेभ्यो विमुखाश्व परेभ्य इति। स्विष्टकृद्वनस्पत्योरंतरे वनस्पतियागानंतरं स्विष्टकृद्यागात्सर्वं मल्यं
शूलेर्पितं मांसं प्राजापत्यो श्वइति वचनात्प्रजापतये हुत्वा अमुष्मै स्वाहेति प्रतिदेवतं शादादित्वगंते

भ्यो देवताभ्योऽश्वांगेभ्यो देवताभ्योऽश्वांगेभ्य आज्यं घृतं जुहुयात्। अनादेशे द्रव्यस्य घृतस्योक्तत्वात्। तत्र शादं दद्भिरित्यादिः
पृथिवीं त्वचेत्यंतः संहिताभागो ब्राह्मणरूपः। शादाद्या देवाः। दंतादीन्यंगानि। तत्तदंगमुद्दिश्य गृहीत्वा शादाय स्वाहा। दद्भ्यः स्वाहा। अवकायै स्वाहा। दंतमूलेभ्यः स्वाहेत्यादि पृथिव्यै स्वाहा। त्वचे स्वाहेत्यंतं जुहुयादित्येकः पक्षः। कुमारवांतरोदितः। कात्यायनपक्षे तु शादं दद्भिः प्रीणयामि स्वाहेत्यादि होममंत्राः। देवतास्तु द्वितीयया निर्दिष्टाः। अश्वांगं तृतीयया करणविभक्त्या निर्दिष्टं। क्वचित्केवला देवतैव। यथा शुक्लाय स्वाहा कृष्णाय स्वाहेत्यादौ। क्वचिदन्यविभक्त्यैव देवता निर्दिष्टाः। यथाऽग्नेः पक्षतिर्वायोर्निपक्षतिरित्यादौ। तथा च ब्राह्मणं। शादं दद्भिरवकां दंतमूलैरित्याज्यमवदानं कृत्वा प्रख्याय प्रख्याय देवताभ्य आहुतीर्जुहोति यथा एव देवता अनि मा [illegible] गा धेयेन समर्धयतीति। आख्याय आख्याय देवता इति प्रख्याय प्रख्यायेत्यर्थः॥ शादं दद्भिः॥ अस्याध्यायस्य प्रजापतिरृषिः। लिंगोक्तानि देवतानि सर्वाणि यजूंषि। दद्भिरश्वदंतैः शादं देवं प्रीणयामि। दंतमूलैरवकां देवतां प्रीणयामि। बर्स्वैर्दंतपीठैर्मृदं देवतां प्री०। बर्स्वस्याद्दंतपीठिके सन्निधानं। दंष्ट्राभ्यां तेगान्देवतां प्री०। अग्रजिह्वं विभक्तिव्यत्ययः। जिह्वाग्रेण सरस्वत्यै सरस्वतीं प्री०। जिह्वायाः जिह्वया उत्सादं देवं प्री०। तालु तालुना। अवक्रंदेन अवक्रंदं देवं प्री०। हनुभ्यां वाजं देवं प्री०। आस्येन अपः प्री०। आंडाभ्यां वृषणं इंद्रं प्री०। बालसमो वेन्द्रो हा वृषस्य सन्निधानं। देवतांतरं वा॥१॥ आदित्यान् श्मश्रुभिः। श्मश्रुभिरादित्यान् प्री०। भ्रूभ्यां पंथानं प्री०। वर्तोभ्यां। वर्त्मानः पक्ष्मपंक्तिः।

ताभ्यां द्यावापृथिवी। द्यावापृथिवीभ्यां प्री०। कनीनकाभ्यां। नेत्रगतकृष्णगोलकाभ्यां विद्युतं प्री०। तारकाद्वयः कनीन
के सति ध्यानं। शुक्लाय स्वाहा। कृष्णाय स्वाहा। शुक्लाय देवाय स्वाहा सुहुतमस्तु। एवमन्यत्र। अत्र देवतेवाक्यैर्विधीय
ते न पक्ष्मगं। यद्वा पक्ष्मांगमेव चतुर्थ्या निर्दिश्यते। अनादेन्द्रो प्रजापतिरित्युक्तेः प्राजापत्योऽश्व इति श्रुतस्य प्रजाप
तिर्देवोऽध्याहार्यः। एवं सति शुक्लेन प्रजापतिं प्री०। कृष्णेनाश्वांगेन प्रजापतिं प्री०। इति। पक्ष्माणि पार्याणि। विल
क्ष्यस्य पक्ष्मभिर्नेत्रोपरिगतलोमभिः पार्या देवताः प्री०। इक्षवोऽवार्याः। इक्षवो नेत्राधोभागलोमानि।
तैः अवार्याः देवताः प्री०। अत्र विक[illegible] अवार्याणि पक्ष्माणि। पार्या इक्षव इति। व्याख्या पूर्ववत्। यद्वा
सदृशनामकं देवतांतरं कथ्यते। तदा [illegible] ॥ प्रथमोऽनुवाकः॥ ॥वातं प्राणेन। अश्वस्य प्राणवायु
नाऽवातं प्री०। अपानेन नासिके देवते॥ अधरेणोष्ठेन उपयामं देवं प्री०। उत्तरेणोष्ठेन सत् सत्कं देवं
प्री०। प्रकाशेन अश्वस्योपरितनदेहप्रकाशेन अंतरं देवं प्री०। अनुकाशेन उपसर्गस्पर्शन्यमनुष्ये बेहलमि
ति दीर्घः। अनुकाशेनाधस्तनदेहप्रकाशेन बाह्यं देवं प्री०। मूर्ध्ना मस्तकेन [illegible] निवेष्यं देवं प्री०। निर्बाधेन
निश्चितं बाध्यत इति निर्बाधः शिरो[illegible]स्थिमध्यसंलग्नो मज्जा नागः। तेन निर्बाधेन स्तनयित्नुं देवं प्री०। म
स्तके नवं मस्तिष्कं शिरोमध्यस्थजर्जरमांसपिंडं। तिलकं कोम। मस्तिष्कं गोर्दं। किट्टं मलोऽस्त्रियामिति स
मरः। मस्तकमज्जेति क्षीरस्वामी च। तेन मस्तिष्केण अशनिं देवं प्री०। कनीनकाभ्यां विद्युतं प्री०। ११॥ कर्णाभ्या
म् श्रोत्रं। कर्णाभ्यां अश्वकर्णशष्कुलीभ्यां श्रोत्रं देवं प्री०। अत्र श्रोत्रं देवस्तदभिमानी दिगात्मकः। एवमुत्त
रत्रापि ज्ञेयं। श्रोत्राभ्यां श्रोत्रिये इंद्रियाभ्यां। अधिष्ठानभेदात् द्वित्वं। कर्णौ देवौ प्री०। अधरकंठेन। कंठाधोभा

॥११२॥

गेन तेदन्तीं देवतां प्री०। स्कुच्छ्वासोकंठश्वस्तुर्ष्का कंठः कंठनिर्मांसदेशः। तेन कृष्णकंठेनापः देवताः प्री०। पृष्ठ्या
श्री वाशिरामन्ये सप्ति धाना ग्रीवापश्चाद्दुर्गे कृकाटिकायां शिरामन्ये समुच्यंते। संज्ञायो सुमज्जनीति
स्पचू। मन्यानि ग्रीवापस्थान्नाडीभिः क्षितं देवं प्री०। ऊर्ध्वष्णीशिरसा अदितिं देवतां प्री०। निर्जर्जल्येन नित
रोज जेरी। मूलेन शिरोभागेन निर्ऋतिं देवं प्री०। सम्यकू क्रोशंतित्वा बध्यते दुतिसंक्रोशानि। गच्छतोम्बस्य
पान्यंगानि निर्दो ह्रि बाद्यंते तैः संक्रोशैः प्राणान्देवान्प्री०। स्तुपेन स्तुपडक्षाये। उच्छितेन शिरवान्ते तेनांगेन
रुष्माणं देवं प्री०॥२॥ ॥द्वितीयोनुवाकः॥ ॥मन्नाकान्क्रोशैः। कैशैः स्कंधस्थरोमभिः मन्नाकान्देवान्प्री०।
स्वपसा। अपइति कर्मनाम। शोभनमपः कर्म पर्याण धारणं रथवाहनादिकं यस्य सः स्वपाः। अपगता
विसस्मादसुनं प्रस्यपः। तेन स्वपसा वहेन स्कंधेन इंद्रं प्री०। शाकुनिः पक्षीत द्रसादागमनं शाकुनिसादः।
महः विसरणगास्सवसादने ध्वि तस्मात्पचः। वेगवत्कर्दनं ते बृहस्पतिं प्री०। शफैः खुरैः। शफं क्लीबे
खुरः पुमान् ह्रस्यो भिधाने। कूर्मान्देवान्प्री०। स्थूराभ्यां स्थूललाभ्यां। रलयोरेक्यात्। स्थूलाभ्यां गुल्फा
भ्यां आक्रमणे देवं प्री०। कूद्दालाभिः कुद्दलाभिः। गुल्फाधस्थनाडीभिः कपिंजलान्देवान्प्री०॥१॥ जवे
जंघाभ्यां। जानुनोर्मध्यभागो जंघेत्युच्यते। ताभ्यां जवं देवं प्री०। बाहुभ्यां जान्वोरूर्ध्वभागाभ्यां अष्ठी
नं देवं प्री०। जांबीलेन। जांबीरं जंबीरतरोः फलं। पर्ववत्। तदाकारैः स्थर्मे जानुमध्यभागो जांबी
रस्तेन अरण्ये अरण्यान्निमारनिं देवं प्री०। अतिरुग्भ्यां अंसंतं रोचे तेतो अतिरुचो जानुदेशो भाभ्या
नग्निं देवं प्री०। दोर्भ्यां अग्रपादयो जंघयो धो भागाभ्यां पूषणं देवं प्री० अंसाभ्यां स्कंधाभ्यामश्विनादवे

॥११३॥

ष्टी०। रोराभ्यां अंसग्रंथिभ्यां रुद्रं प्रीणामि॥२॥ ॥ तृतीयोनुवाकः॥ ॥ अग्नेः पक्षतिः। अत्र षष्ठ्यंतेन देवतोद्देशः।
प्रथमांतेनाङ्गोद्देशः। ततोस्त्विति अध्याहारः। अस्तिर्भवतिपरः प्रथमपुरुषोप्रयुज्यमानोप्यस्तीति सर्वत्रानुप्रयोगः इति वचनात्।
अग्नेर्देवस्य पक्षतिरस्तु। यद्वा विभक्तिव्यत्ययेन पक्षत्याग्निं प्रीणयामीति संबंधः। पक्षो मूलं लुप
क्षतिरिति विग्रहात्। पक्षाजिरे मूलार्थे तिप्रत्ययः। पक्षस्य पार्श्वस्य मूलभूतान्यस्थीनि
वक्रीभूतानि पार्श्वस्थीनि पक्षतिरित्युच्यते। तानि चस्थीनि प्रतिपार्श्वं त्रयोदश भवंति। पार्श्वानि पशोः पर्शवः
यइति श्रुतेः। अत्र पक्षशब्दस्य पार्श्ववाचित्वेपि तुवलेकाले पतत्रे च रूढौ पार्श्वे प्रकल्पितेस्य तिष्ठानं प्र
माणं। अंगानां क्रमेण देवतासंबंधं वक्ति। तत्रादौ दक्षिणपार्श्वस्य देवता आह। पक्षतिः अश्वस्य
प्रथमं उपरिस्थं दक्षिणपार्श्वास्थि वायोः। इंद्रस्य तृतीया। अपां चतुर्थी। आदित्ये पंचमी। इंद्राण्यै ष
ष्ठी। मरुतां सप्तमी। बृहस्पतेरष्टमी। अर्यम्णो नवमी। धातुर्दशमी। इंद्रस्यैकादशी। वरुणस्य द्वा
दशी। यमस्य त्रयोदशी। पक्षतिरिति विभक्तिः सर्वत्रानुषंजनीयं। अत्र सर्वत्र षष्ठी चतुर्थ्यर्थे॥१॥
॥ चतुर्थोनुवाकः॥ ॥ इंद्राग्न्योः पक्षतिः॥ अत्र वामपार्श्वास्थि देवता उच्यंते। पक्षतिः प्रथमं उपरि
स्थं वामपार्श्वास्थि। इंद्राग्न्योर्देवतयोरस्तु। सरस्वत्यै निपक्षतिः। मित्रस्य तृतीया। सोमस्य चतुर्थी।
निर्ऋत्यै पंचमी। अग्नीषोमयोः षष्ठी। सर्पाणां सप्तमी। विष्णोरष्टमी। पूष्णो नवमी। त्वष्टुर्दशमी। इं
द्रस्यैकादशी। वरुणस्य द्वादशी। यम्यै त्रयोदशी। यमस्य च सा यमी। ऋग्वेदे यमयमी संवादे यमी श
ब्दस्य तत्रैव रूढेः। त्रयोदशी पक्षतिर्यम्यै यमी। चतुर्थ्यर्थे प्रथमेति केचित्। तथा लेप्रक्रमभंगः क्लिष्टकल्प

॥११३॥

नंत्र। अथ समस्तयोः पार्श्वयोर्देवता आह द्यावेति। दक्षिणं पार्श्वं द्यावापृथिव्योरस्तु। उत्तरं वामपार्श्वं विश्वेषां दे-
वानामस्तु॥१॥ ॥पंचमोनु०॥ ॥अथांगांतराणां देवता आह। मरुतामिति। स्कंधाः स्कंधा मरुद्भ्यः संतु। स्कं-
धेर्मरुतो देवान्प्रीणयामीति वा। विभक्तिव्यत्ययः पूर्ववत्। अथाश्वपुच्छे परितिष्ठो। स्थिपंक्तयः संति
तासां देवता आह। विश्वेषामिति। कीकसं कुल्यमास्थि चेत्सन्निधानात् कीकसं तिकसतित्र वृके स्रोतो तिकीक-
सं अस्थि। प्रथमाकीकसा। सुपां सुलुगिति पूर्वसवर्णदीर्घः। प्रथमानि कीकसानि। पुच्छोपरिस्थ्याः घा
पंक्तिरित्यर्थः। विश्वेषां देवानां। द्वितीयास्थिपंक्तिः रुद्राणां। तृतीयास्थिपंक्तिः आदित्यानां। पुच्छं वायोः।
नासदे नासेत इति नासद्वौ नितंबौ। नितंबावा नासदेम तद्दक्षिणसन्निधानात्। अग्नीषोमयोः। श्रोणिभ्यां दक्षि-
णवामाभ्यां कटिस्थां। कटिः श्रोणिः ककुद्मती स्यन्निधानं। कूंचौ देवौ प्री०। इंद्राबृहस्पती ऊरुभ्यां प्री०। अष्ठीव-
स्पर्शग छत ऊरुभ्यां संयोगं प्राप्नुतस्तौ अष्ठीवंतौ वंक्षणौ ऊरुसंधी। वर्णलोप आर्षः। ताभ्यामष्ठीवद्भ्यां मित्रा-
वरुणौ प्री०। स्थूलराभ्यां। रत्नयोरत्नेदा स्थूलाभ्यां नितंबाभ्यो हगाभ्यां आक्रमणं देवप्री०। कुष्ठाभ्यां। कुष्
निष्कर्ष। कुष्येते तो कुष्ठे कूपको आवर्त इत्यर्थः। ताभ्यां बलं देवप्री०॥१॥ ॥षष्ठोनु०॥ पूषणं वनिष्ठुना।
वनतिसंभजतीति वनिष्ठुः स्थूलांत्रं तेन पूषणं देवप्री०। गुदस्थानेपायुर्नेर्याणिधानं। स्थूलांत्रवासो गुदा
वनतिसंभजतीति वनिष्ठुः स्थूलांत्रं। तेन पूषणं देवप्री०। गुदस्थाने पायुर्नैऋत्यधानं। स्थूलांत्राणि गुद
चा स्त्रीत्वं छांदसं। तयास्थूलगुदया। गुदस्यस्थूलभागेन अंधाहीनं च सर्पान्प्री०। गुदाभिः स्थूलगुदा-
तिभिस्तैर्गुदभागैः सर्पान्प्री०। अंत्रं पुरीतदिति सन्निधानात्। अल्पाततो अनेन शब्देन। अस्मात्प्रत्ययः अ-
मतितनजस्यनेन न्त्रभिसंत्रं। अंत्रैरंत्रवा आंत्राः अंत्रसंबंधिनो मांसभागास्तैर्विह्रुतो देवान्प्री०। अपाव

स्तिन।वस्तिर्नातरघोहृयोरित्यस्तिधानं।वसतिमूत्रं यस्मिन्निति वस्तिः।नात्तरघोवर्तमानं मूत्रपुटं।तेनापो
देवताः प्री०।मुष्कोऽण्डवृषणः कोशइत्यभिधानं।अण्डएवाण्डः।आण्डाभ्यांलिंगोभयपार्श्वस्थमांसपिंडाभ्यां
वृषणंदेवंप्री०।शेपेन।शिश्नो मेढ्रो मेहनशेफसीसमे इत्यभिधानात्।शिश्नंमूत्रणे।शिश्नातितनुगमितिशेपः।सां
तोदंतस्य।शेपेनशिश्नेनवाजिनंप्री०।मुष्कतेजोरेतसीसबीजवीर्येन्द्रियाणिचेत्यभिधानं।रोडुःस्रवणेरे
यतेस्रवतीतिरेतोवीर्यं।तेनरेतसाप्रजांप्री०।चाषापित्तेन।पूतततिसंसलेइतिपित्तं धातुविशेषस्तेनचा
षाम्प्री०।प्रदरान्पायुना।पातिमलोत्सर्गमितिपायुर्गुदंउक्तांहिरिक्तं।तेनगुदवलतीयभागेनप्रदरान्प्री०।
कूश्मांशकपिंडैः।शाकोदृशोनपविकूसमित्यभिधानात्।विशिं।विष्ठाया मिस्यर्थः।शाकस्यविष्ठायाः पिंडैः
कूश्मान्देवान्प्री०।।१।। ।।समाप्तोनुवा०।। ।।इंद्रस्य क्रोडः।। पुनर्देवेष्वष्टौ।अंगप्रथमाविभक्तिः।ननाक्रोडंतु
जोतरमित्यभिधानं।क्रुडघनत्वे।क्रुडतीतिक्रोडः।घनीवक्षोमध्यभागः।सइंद्रस्यास्तु।इंद्रस्यवळसंयं
दसं।अदित्यैपाजस्यं।पाजइतिबलनाम।पाजसेबलायहितंपाजस्यंबलकरमेगं।यद्वापादासंपतेय
स्मिन्नितिपाजस्यंखुराग्रं।तदीदित्येअस्तु।दिशांजत्रवः।संधीवक्षस्यैवजत्रुणी इत्यभिधानात्।अंसकंठे
योःसंधिर्जत्रुःपुंस्त्वमार्षं।दिशांजत्रवःसंतु।अदित्यैभसत्।नस्यततसतंतदीस्योः।बस्तिदीप्यतेइति
भसत्।लिंगाग्रं।तददित्यैअस्तु।जीमूतान्हृदयोपसेन।पुनर्देवैर्द्वितीयांऽगेनततीया।हृदयेउपसिनोतीति
हृदयौपसंहृदयस्थंमांसपिंडं।तेनजीमूतान्देवान्प्रीणयाति।पुरीततां।वर्यतेइतिपुरीततौ हृदया
दकमंत्रं।अंत्रंपुरीतदित्यभिधानं।तेनांतरिक्षंदेवंप्री०।।१।।नभउदर्येण।उदरस्तर्वमुहूर्ये।उदर
स्थंमांसं तेननमोदेवंप्री०।शारीराववयवाधदितयतजसयः।चक्रवाकौदेवौमतस्ना।त्योप्रीवाधस्थ

अस्मात्स्तुव

।।१९४।।

।।१९४।।

ता भ्यां मस्थिभ्यां प्री॰। दिवं वृक्काभ्यां प्री॰। वृक्काग्रमांसमित्यभिधाना [illegible] हृदक ओदने। वक्ष्यते स्वादुत्वागत्स्यैतद्गीत रक्की।
अयं स्त्रीलिंग इति क्षीरस्वामी। कुक्षिस्थो मांसगोलकः वामे पुष्फुलाकृती वृक्का वितियाल्पिकावंदंति। मेरान्हा त्रिभिः
प्री॰। प्रकर्षेणाभ्रंसनातीति प्लीहा नामधेयः क्लीमं मले नाड्यः। रक्तयो रेख्या लकारः। तेन्ताडी द्वारे वान्तरे सस्यद
हे संचार इति स्वदन्तात्स्वरोक्तिः। उपलान्त्राङ्ग प्री॰। गुल्मस्तु प्लीहा पुंसीत्यभिधानं। हृदयवामभागे मुधि लोमांसभागः
पुष्फुस संज्ञं प्लीहा। नकारांतोयं। वल्मीका क्लोमभिः प्री॰। तिलकं क्लोमसन्निधानं। उदर्या जलाधारः हृदयदक्षि
णप्रदेशः क्लोमा। वामप्रदेशः प्लीहेति क्षीरस्वामी॥ क्लोमा गळनाडी लिंककी चायः। गलो निर्गुल्मान् प्री॰। ग्लायंती
स्लाम्यंती तिरिगलवा हृदयनाम्नः। हिराभिः स्रवंतीः प्री॰। हरः सन्तरसामिति हिरा। अन्तर्वाहिन्यो नाम्यः। ढ़ढ़ांकु
श्रिभ्यां प्री॰। पिचंडकुक्षी जठरोदरं कुंडमित्यसन्निधाना। जठरस्य दक्षवामभागौ कुक्षी। समुद्रमुदरेण प्री॰। वैश्वा
नरं देवं भस्मा। नाभ्यां गोत्रेन प्री॰ ॥२॥ ॥अष्टमोनुवाकः॥ ॥क्षिपदिति नाभ्या। नाभ्यांकुदराधः स्थप्रधिना विघृति
देवं प्री॰। घृतं रसेन। रसो गंधर सस्वादति क्लादो विषरागयोः। शृंगारादि रसे वीर्ये हेधा लेबु पारद इति विश्व
कानूनात् रसेन वीर्येण धातुविन्यूजेण वा घृतं देवं प्री॰। अपांपृष्णा प्री॰। पूषः क्षुधितो रसः। पद्मन्निसाद्दनाय
पन्तादेवाः। पूष्णा पक्वान्नरसेन अपोदेवताः प्री॰। मरीचीर्विप्रुड्भिः प्री॰। प्रुषांतिबिंदुरूपतां तापुमांसोविप्रुवः
स्निग्धपदस्वाभिधाना द्विप्रुषो वसाबिंदवः। नीहारमूष्मणा प्री॰। कुष्माणस्तु निदाघोष्मा ग्रीष्माः नूषसहा अ
पीतिवि स्वकोष्मादूष्मणान्नारीरगतेनोष्णोनेसर्थः। नीनं वसया प्री॰। मेदस्तु वसा वपासन्निधानं। वस्तमांस
भिर्निवसा। गुडुमांसस्यय स्निहः सावससे सन्निधीयत इति वै घकं। वसया मांसस्तेनेनेत्यर्थः। प्रुषा अस्रुभिः
प्री॰। अस्रुभिर्नेत्रांबुभिः। हादुनी दूषीकाभिः प्री॰। नेत्रमलैः। दूषीका नेत्रयो र्मलमित्यभिधानं। असृग्रक्तं

स्वप्री०। अस्नाअस्नजा। रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितमित्यभिधानं। अस्यते नस्यज्यते वाऽसस्ववृ रुधि
रं। पद्दन्निति अस्नजे असन्नादेशः। चित्राण्यंगैः प्री०। अंगैः फर्वो नुकावयवैः। नक्षत्राणिरूपेण प्री०। रूपं स्वभा
वे सौंदर्ये नाणकेपशुनाद्धयोरितिविश्वकोशोक्तेः रूपेण सौंदर्येण। पृथिवी त्वचा प्री०। त्वचा चर्मणा पृथिवीं दवी
प्रीणयामि स्वाहा सर्वं रूपैर्मंत्रैस्तत्तदस्थावयवत्वेन कल्पितमाज्यं जुहुयात्॥ अत्राग्निर्हृदयेनाग्निं हृदया
ग्रेण सादि द्यावापृथिवीभ्यां स्वाहा संतोष्याज्याहुती जुहुयात्। विंमुखाम्ध्वपरेभ्यः इति कात्यायनोक्तेः। विमुखप
दे लोषामत्र क्रमणिकालोज्ञेया॥ का०॥ अवभृथयस्पैते मु मेंगनस्य पिंगलस्य खलतेर्विक्लिधस्य शुक्लस्य मूर्द्धनि
जुहोति जुंबकाय स्वाहेति। अवभृथयागांते जलमग्नस्य पिंगाक्षस्य खलत्वाटस्य दंतुरस्य अतिगौरस्यैवंविधे
स्य पुंसो मूर्द्धनि सकृद्गृहीतमाज्यमध्वर्युः स्थितो जुहोति जुंबकाय स्वाहेति। वरुणदैवसादि पद्दायजुः। जुंबकस्य
सुंगुलदृष्टा। ब्रह्महसादि प्रायश्चित्तार्थं विनियुक्ता। यथाह हारीतः। जुंबकानाम गायत्री वेदेवाजसनेयके। अंतर्जले
सकृज्जप्त्वा ब्रह्महत्यां व्यपोहतीति। जुबि निरसने। वुनू। जुंबति पापानि निरस्यतीति जुंबकोवरुणः। वरुणो वै जुं
बक इति श्रुतेः। तस्मै जुंबकाय स्वाहा। मुंडुतमस्तु॥१॥ ॥ नवमोनु०॥ ॥ हिरण्यगर्भः समः। चतस्त्रः कदेव सावित्र
सूक्तः प्रजापस्पतिसुतहिरण्यगर्भदृष्टाः प्राजापत्यपशुनामग्रादीनां याज्यापुरोनुवाक्याः। तत्र हिरण्यगर्भो
यः प्राणत इति द्वे ऋचौ पंचविंशोव्याख्याते।२॥ यस्येमे। वयं कस्मै प्रजापतये देवाय हविषा विधेम। द्वितीया
र्थेतृतीया। हविर्दत्तः। कशब्दस्य सर्वनामत्वमार्षं। प्रजापतिर्वै क इति श्रुतेः। इमे हिमवंतः। बहुवचनमार्षं।
अर्थे वौः पुंसि चेति वत्। हिमाचलप्रभृतयः पर्वताः। प्रथमा द्वितीयार्थे। सुपां सुपो भवंतीति वचनात्। इमानि हि
मवंत्यत्र नत्संज्ञेनयस्य प्रजापतेर्महित्वा। महिम्नां। विभक्तेः पूर्वसवर्णदीर्घः। महिमानमाहुः। ब्रुवंतीत्यर्थः।
रसया पृथिव्या सह संहिताम्। नद्युभिरचला नंतारसा। विम्वंतरा स्थिरेऽसन्निधानात्। यद्वा। रसानदी।

॥११५॥

॥११५॥

रसतेः शब्दकर्मण इति यास्कोक्तेः। रसया जललक्षणया नद्या। जातावेकवचनं। नदीभिः सह वर्त्तमानं समुद्रं च यस्य महि-
त्वमाहुः। इमाः प्रदिशः पूर्वाद्याः प्रकृष्टा दिशश्च यस्य महित्वमाहुः। यस्य बाहू भुजौ जगद्रक्षकौ विस्ताहूः। यद्वा रक्ष-
काणां पूर्वादिदिशां बाहू यस्य महित्वमाहुरिति यथावस्थितेनान्वयः। यद्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंशसंभवमिति भगवद्वाक्यात्॥ ३॥ २ य आत्मदाः। यः आत्मानं ददातीत्यात्मदाः। उपास-
कानां सायुज्यप्रदः। यश्च बलदाः देवादीनां जगद्धरणादिसामर्थ्यदाता। तथा विश्वे सर्वमनुष्याद्याः प्राणिनः य-
स्य प्रशिषं प्रकृष्टशासनं उपासते। तथा देवाः अग्न्याद्याः अपि यस्य प्रशिषमुपासते। शासु अनुशिष्टौ। अस्मा-
त् क्विप्प्रत्यये शास इदङ्हलोरिति इत्वे शासिवसिघसीनां चेति षत्वे च कृते रूपसिद्धिः। उक्तं हि। यस्य ज्ञेयावधि ज्ञानं
शिक्षावधि च शासनं। कार्यावधि च कर्तृत्वं स स्वयं भूः पुनातु व इति। भीषाऽस्माद्वातः पवते। भीषोदेति सूर्यः।
भीषाऽस्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इत्यादिश्रुतिश्च। किंच यस्य छाया आश्रयणं ज्ञानपूर्वमुपासनं
अमृतं मुक्तिहेतुः। साध्यसाधनयोरभेदव्यपदेशः। किंच। छायेसनुवर्त्तते। यस्य छाया। तमः। यद्विषयक-
मज्ञानमित्यावृत्। मृत्युः संसारहेतुः। तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनाय। तरति शोक-
मात्मवित्। येतद्विदुरमृतास्ते भवंत्यथेतरे मृत्युमेवापियंतीत्यादिश्रुतेः। एतादृशाय कस्मै। कं ब्रह्मेति श्रुतेः।
कशब्दः सुखादिवचनः। ज्ञानानंदादिस्वरूपाय देवाय हविषा विधेम॥४॥ ॥दशमोनु०॥ ॥आ नो भद्राः। विश्व-
देवपशुवपापुरोडाशयाज्यानुवाक्या इमा दश ऋचो विश्वेदेवदेवत्या गोतमदृष्टाः। तत्राद्याः पंचजगत्यः।
क्रतवो यज्ञाः। संकल्पा वा नोऽस्मान्प्रति यआयंतु। आगच्छंतु। यज्ञकर्तारः सम्यक्संकल्पा वा वपुंत्वमेव स्पर्धः। कि-
दृशाः क्रतवः। भद्राः भंदनीयाः। तदि कल्याणे। कल्याणकारिणः। विश्वतोऽदब्धासः पर्वतोऽनुपहिंसिताः। नि-

विघ्नाद्यस्पर्थः। आ उ असेरस्तु। अपरी तासः। अपरीताः अपरीताः। अपरिगताः। केनापि तज्ज्ञाताः। फलानुमेयाद्
स्पर्थाः इत्यनुगताविस्मात् क्तः। येगस्पर्थास्तैस्तानार्थाः। उद्भिदः। उद्भिन्दंति प्रकटयंतीत्युद्भिदः। यज्ञांतराणां
प्रकटीकर्तारः। किं च। यथायेन प्रकारेण देवा नोस्माकं सदं इत् सदेव वृधे वर्धनाय असन् भवंति तथा
भवान आयुःक्षितिपूर्वेणान्वयः। सदमित्यव्ययं सदार्थे। देवाः कीदृशाः। अप्रायुवः प्रकर्षेण आयुवंति प्रमाद्यं
ति ते प्रायुवः यो ते क्षिप्रा तु गोगमा नवि आर्षः। तादृशा न ते अप्रायुवः। अनलसाः। दिवेदिवे। दिवशब्दो दिनवा
चनः। दिने दिने प्रसह रक्षितारः पालकाः॥१॥ देवानां भद्रा॥ भद्रा कल्याणकारिणी देवानां सुमतिः शोभना बु
द्धिः नोस्मान्प्रति अभिनिवर्त्ततां। अस्मदभिमुखी भवतु। कीदृशा नां देवानां। ऋजूयतां। ऋजूयतां। दीर्घश्छांदसः।
ऋजु अवक्रं यंति गच्छंतीति ऋजूयंतस्तेषां। ऋजूपपदादिणः शतृप्रत्ययः। अवक्रगामिनां। यद्वा ऋजुम
वक्रं साधुं यजमानं कामयंते ते ऋजूयंति। सुप आत्मनः क्यच्। ऋजूयंतीति ऋजूयंतस्तेषां। क्यजंतात् शतृ। सा
धुं कामयमानानामित्यर्थः। किंच। देवानां रातिर्दानं। रादाने। स्मालुक्तिन्। नोस्मानभिनिवर्त्ततां। देवा अस्म
भ्यमिष्टं ददत्वित्यर्थः। देवेभ्यो लब्धाभिलाषा वयं देवानां सख्यं मैत्रीमुपसेदिम। प्राप्नुयाम। षद्ऌ सदेर्लि
टि उत्तमे बहुवचनं। संहितायां दीर्घ आर्षः। देवा नोस्माकं सखीनां जीवसे जीवितुं। तुमर्थे सेन्प्रत्ययः।
आयुः प्रीतिरं तु वर्द्धयंतु॥२॥ तान्पूर्वया। पूर्वया प्राचीनया अत्रिमयानि विदा वेदरूपया वाचा वयं तानभि
सिद्धान्देवान्हूमहे। आह्वयामः। निविल्लक्षणस्त्रयी वचनः। तान्कान्नित्यंत आह। भगं मित्रं। अदितिं देवमातरं।
दक्षं प्रजापतिं। अर्यमणं वरुणं सोमं। अश्विना। अश्विनौ। एतान्। अस्त्रिधमिति भगादीनां विशेषणं। न

॥११६॥

स्त्र घृतेन च्योतते सोऽक्षितं तं अस्त्रिधं । अमरत्वेनाच्युतसद्भावं । किंच । द्यौः नक्षत्रगणाग्र्यं यस्याः सा सुभगा ।
जननी यासरस्वती जगादिसहिता सती नोस्माकं मयस्करत् । मय इति सुखनाम । सुखं करोतु । लिङर्थे लेट् ।
लेटोऽडाटौ । इतश्च लोपः परस्मैपदेष्विति कारलोपः ॥३॥ तन्नः । वातो वायुदेवः । नोस्माकं भेषजं हितं यथा
स्यात्तथा वातु । वा गतिगंधनयोः । लोट् । प्रवातु । अनुगच्छतु इत्यर्थः । किंच तत्तेन भेषजं मयोभु । मयः सुखं तद्भव
ति यस्मात्तन्मयोभु । तथा माता । जगन्निर्मात्री पृथिवी । तत् भेषजं वातु ददातु । धातोरनेकार्थत्वात् । तथा पि
ता पालको द्यौर्लोकस्तद्दातु । तथा सोमसुत्वेतीति सोमसुतः सोमाभिषवकारिणः मयोभुवः । सुखस्योत्पादयिता
रः ग्रावाणः तद्भेषजं वांतु । अत्र पृथिव्यादीनामचेतनव्यापारोऽभिमानिव्यपदेशः । हे अश्विनावश्विनौ । युवां धि
ष्ण्या धिष्ण्यावस्मद्धारकौ संतौ । तत्सर्वात् दितत्प्रोक्तं भेषजं प्रार्थनं शृणुतं । युवामपि हितं प्रयच्छतमित्यर्थः ।
॥४॥ तमीशानं । वयं तं प्रसिद्धमीशानं रुद्रं देवं अवसे रक्षितुं हूमहे आह्वयामः । कीदृशं तं । जगतो जंगम
स्य तस्थुषः स्थावरस्य च तत्रामस्यपतिं पालकं । धियं बुद्धिं जिन्वति प्रीणयति । अंतःकरणमलनिरासे
नेति धियंजिन्वस्तं धियंजिन्वं । अलुक्समासः । जिन्वतिः प्रीणनार्थः । यथा येन प्रकारेण पूषा पूर्णो देवः
नोस्माकं सदमित् सदैव वृधे वृध्ये । वृधु वर्द्धने । स्माद्भावे क्विप । असत् भवेत् । कीदृक् पूषा । वेदसां । वेद
इति धननाम । धनानां ज्ञानानां वा रक्षिता । पायुः । पुत्रादिपालकः । पातेरुप्रत्यये आतो युक् चिण्कृतोरिति युगा
गमः । अदब्धः दंभु दंभने । केनाप्यनुपहिंसितः । स्वस्त्यपि कल्याणाय प्रवर्तते भवेत् ॥५॥ स्वस्ति नः ॥ विराट्स्थाना ।
आद्योपादो नवर्णो । तृतीयादशवर्णः । चतुर्थो व्यूहेनैकादशवर्णः । नवकौ वैराजस्त्रिष्टुभ् स्त्रैष्टुभन्त्येति वचनात् । इं

द्रः नो ऽस्मभ्यं स्वस्ति अविनाशं क्षेमं दधातु ददातु। पोषयतु वा। किंभूत इन्द्रः। वृद्धश्रवाः। वृद्धं महत् श्रवः कीर्ति
र्यस्य सः। तथा विश्ववेदाः पूर्णधनः पूषा नो ऽस्माकं स्वस्ति दधातु। तथा अरिष्टा ऽनुपहिंसिता नेमि
श्चक्रधारा यस्य रथस्य सः अरिष्टनेमिस्तार्क्ष्यो गरुडो विष्णुर्वा नः स्वस्ति दधातु। तथा बृहस्पतिर्देवगुरुर्नः
स्वस्ति दधातु। यद्वा। बृहतां महतां ब्रह्मादीनां बृहस्पतिर्वेदराश्याः वा पतिः परमात्मा नः स्वस्ति दधात्विति। ए
ष उ एव बृहस्पतिर्वाग्वै बृहती तस्या एष पतिस्तस्मादु बृहस्पतिरिति श्रुतेः॥६॥ पृषदश्वा मरुतः। जगती म
रुद्देवत्या। मरुतो देवा अवसा ऽन्नेन हविर्लक्षणेन हेलनार्क्षणेनेनावेद्य इह यज्ञे आगमन्। आगच्छन्तु। की
दृशाः पृषदश्वाः। पृषत्यः पृषतीसंज्ञा अश्वा वडवा वाहनं येषां ते पृषदश्वाः। पृषत्यो मरुतां वाहनानीति व
चनात्। यद्वा पृषत्यः श्वेतबिन्दुका अश्वा येषां ते तथा। पृश्निरदितिर्माता जननी येषां ते पृश्निमातरः। शुभं कल्या
णं यान्तीति यान्ति प्राप्नुवन्तीति वा शुभंयावानः। या प्रापणे ऽस्मात् आतो मनिन्क्वनिब्वनिपश्चेति वनिप्प्रत्ययः।
विदथेषु यज्ञगृहेषु जग्मयः गमनशीलाः। आदृगमहनजन इति किप्रत्ययः। अग्निर्जिह्वा यज्ञसाधनं येषां
ते अग्निजिह्वाः। अग्निमुखा वै देवा इति श्रुतेः। मन्यन्ते सर्वं जानन्तीति मनवः। मन अवबोधने ऽस्मादुप्र
त्ययः। सूरः सूर्यस्तद्वच्चक्षुर्येषां ते सूर्यं च खलु पश्यन्तीति वा सूरचक्षसः। सूरसूर्यौ मादित्ये सन्निधौ तं। सू
र्यवत् ख्यान्ते इति वा सूरचक्षसः॥ किंच। न केवलं मरुत आगच्छन्तु। किं तर्हि विश्वे सर्वे देवा आगमन्॥७॥ भ ॥११२॥
द्रं कर्णेभिः। तिस्रस्त्रिष्टुभः। हे देवाः। सर्वनिघातत्वादामन्त्रितमेतत्। कर्णेभिः कर्णैः। बहुलं छन्दसीति भिस
ऐस्त्वाभावः। भद्रं कल्याणं वाक्यं वयं शृणुयाम। तथा यजत्राः। यजतीति यजो यजमानः। तं त्रायन्त इ
ति यजत्राः। यजमानपालका इत्यर्थः। अक्षभिर्नेत्रैः भद्रं वयं पश्येम। बहुलं छन्दसीति हलादावपि अक्षिश

हृस्यानंदकः। यद्वा ऽकारांतो ऽक्षशब्दोनेत्रवाची। अत्र ऐसभाव आर्षः। किंच। देवहितं देवेन ब्रह्मणा हितं कृतं देवा
नां वा हितं देवोपासनोपयुक्तत्वात्। यद्वा प्रजीवनं तत्तद्वपं व्यशेम। व्यश्नुवीमहि। प्राप्नुयाम। कीदृशा वयं।
स्थिरैः दृढैः अंगैः करचरणाद्यवयवैः सहिताः। स्तनूभिः शरीरैः तुष्टुवांसः युष्मान् स्तुवंतः। यद्वा तायते कु
लमनेनेति तनवः पुत्रादिप्रजाः ताभिः सहिता वयमिति। स्तवनमितरेंद्रियव्यापारोपलक्षणं। स्तोत्रादिकं
कुर्वंत इत्यर्थः। कर्णेभिरक्षभिरिति बहुवचनं प्रजादिसाहित्यपरत्वेन समंजसं।८। शतमिन्नु। हे देवाः त्वा
तमिन्नु। शतमपि शरदो वत्सरान् संवत्सरो वत्सरोब्दो हायनोस्त्री शरत्समा इत्यभिधानं। कालाध्वनोरत्यंत
संयोग इति द्वितीयाविभक्तिः। शतवर्षपर्यंतं। यूयं। अंति। अंतिके। समीपे तिष्ठतीति शेषः। यत्र शरद्भिः तेना ऽ
स्माकं तनूनां शरीराणां जरसं जरां। जरायाजरसादेशः। यूयं चक्र। कृतवंतः। युष्मा प्रार्थनास्येति त्वा
वेनत्वं विध्यार्थेपि भूतार्थप्रयोगः। चक्रेति करोतेर्लिटि मध्यमपुरुषबहुवचने। द्व्यचोतस्तिङ इति चक्र
स्यत्र संहितायां दीर्घः। निपातस्य चेति यत्रेस्यत्र दीर्घः। अस्मद्द्वार्थेकावधिर्यूयं रत्नेणार्थमस्मत्समीपे तिष्ठंति देहे
तिभावः। तथा यत्र च अस्माकं जरायां पुत्रासो ऽस्मत्पुत्राः पितरो भवंति स्वपुत्राणामिति शेषः। यत्रास्माकं पौ
त्रा भवंतीत्यर्थः। तावत्पर्यंतं मध्या मध्ये। सुपां सुलुगिति ङेराकारः। शतवर्षमध्ये नोस्माकमायुः मारीरिषत।
मारीरिषत मा हिंसिष्ट। दीर्घमायुं दत्तः। रिषतेर्हिंसार्थस्य णिजंतस्य च लुङि रूपं। कीदृशमायुः। गंतोः। गंतुं ग
मनशीलं। तुमर्थे तोसुन्प्रत्ययः। अत्र वदारा धनं विना बहुकालजीवनं व्यर्थमिति भावः। तदुक्तं। सोधि

स्य संचिंसतमुग्यं दंडमस्कंमनुष्यस्य विचक्षणस्य। वर्षासु सिक्ताइव चर्मदंडाः सर्वे प्रयत्नाः शिथिली भवंतीति ॥ ९ ॥
अदितिर्द्यौः। मंत्रदृक् सर्वात्मकत्वेनादितिं स्तौति। अदितिरखंडनादिस्तुक्तेरदितिः परमात्मैव। द्यौः स्वर्गो दि
तिः। तदुपलक्षितत्वात्तदाधारत्वाच्च। एवमग्रेपि। अंतरिक्षमदितिः। माता जननी अदितिः। सोऽदितिरेव पिता।
स एव पुत्रः। विश्वेदेवाः ब्रह्मादि सर्वदेवाश्च अदितिः। पंच जनाः मनुष्या असुरा वा तेप्यदितिः। यद्वा। पं
च जनाः प्राणादयः। पंच अदितिरेव। यस्मिन्पंच पंचजना आकाशश्च प्रतिष्ठितः। तमेव मन्य आत्मानं वि
द्वान्ब्रह्मामृतोमृतं। प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुरि
ति बृहदारण्यकत्वात्। किं बहुना। आत्मव्यस्तं प्राणिजातं जनित्वं जनिष्यमाणं च सर्वं च अदितिरेव। ब्रह्मैवे
दं सर्वमिति श्रुतेः। यद्वा द्यौः लोकोस्माकमदितिरखंडितोस्तु इति योज्यं। विश्वेदेवा अदितिरदितयः संतु।
वचनव्यत्ययः ॥ १० ॥ ॥ एकादशोऽनु० ॥ ॥ का० ॥ मानो मित्र इति च प्रत्यृचमनुवाकाभ्यां। मा नो मित्रो यदश्वे
स्यानुवाकद्वयेन पूर्ववच्च लुर्ग्रीहीतमाज्यं जुहोति प्रत्यृचमिति सूत्रार्थः ॥ मानो मित्रः। अश्वदेवत्यास्त्रिष्टुभो
दीर्घतमा दृष्टाः। तत्र एष छागो यूपव्रस्का इति द्वे जगत्यौ। विदथे। यज्ञे। वाजिनोऽश्वस्य वीर्याणि चरि ॥ ११८ ॥
॥ ११८ ॥ त्राणि यत् वयं प्रवक्ष्यामः। उच्चारयिष्यामः। तत्र मित्रः दिवसस्य प्रथमभागाभिमानी देवः वरुणस्तु तृती
यभागाभिमानी। अर्यमा द्वितीयभागाभिमानी। आदित्यस्यैव तानि रूपाणि। वाति संततं गच्छतीति वायुर्वा
युः। वकारलोपश्छांदसः। वा गतिगंधनयोः। यद्वा एति सर्वत्र गच्छतीति वायुः। आयुर्वा रूपो वायुः। इन्द्र

गताविषस्मादेणादिकोणुसू। इंद्रः देवराजः। ऋत्नुत्वाः इंद्राणी। ऋ...द्धास्तस्य तु प्रियेऽस्मिन्धानं। यद्वा ऋतवो
देवाः स्त्रियंति निवसंति यस्मिन्नसु ऋतुत्वाः। सर्वा देवाधारः प्रजापतिः। यद्वा ऋत्वर्ति व्याप्नोति सर्वमिति ऋतुत्वाः परमा
त्मा। अन्तर्भुक्तिमन्थमपः। पथिमध्वर्युत्वाम् इति सा वा केरः। मरुतोऽन्ये देवाश्च नोऽस्मान्मा परिरक्षन्तु की दृशस्य
वाजिनः। देवजातस्य। देवाः सूर्या जातस्य। सूरादश्वं वसवो निरतष्टेति श्रुतेः। x मा निंदन्तु। अश्वादीन्तिरस्थरतस्तु
वंतीति। किं च स्वरूपेण परमात्मानमिव स्तुमहे स्तोमा मा परिरक्षन्तु। x ३ सप्तेः। सपसंबंधे। सपति देवैः सह संब
ध्यत इति सप्तिस्तस्य। मा परिरक्षन्नित्यत्र अस्यपथिवक्ष्यि ... व्याति म्योऽङिति च रः। नमाऽङ्योगे इत्यडभावः। माङि
लुङ् इत्यनुतेलुङ्। परमात्मपक्षे देवजनन्दी लोके वाजी। सर्वगस्तस्य सप्तिर्थः। वृजगंतावितिधातुः। देवार्थं जातो
वतीर्णो। देवानां जनितं जननं यस्मादिति वा देवजातस्तस्य। अन्यत्सर्वं समानं। ४। यन्निर्णिजा। यदक्ष्णयदा ऋ...विङः
अश्वस्य मुखतः सार्वविभक्तिकस्तस्य। मुखाग्रे गृहीतां गृहीतां। हृतपृष्ठे ... ददसि। रातिं। दानं। रा दानेऽस्मा
क्तिनपात्क्तिन्। आज्यस्य च धान्यान्ल क्षणं नयंति प्रापयंति। अश्वापरात्रिकुलन्त्रेषं प्रपक्षतीत्सुक्तत्वात्। तदा
सुष्ठु प्रांचति पूर्वं गच्छतीति सुप्राङ्। मेम्यत्। ना ब्दानुकरणमतत्। मेमे इति शब्दं कुर्वाणः विश्वरूपः नानाव
र्णः अजः छागः। अप्येति लक्षणायां गच्छति। कृष्णग्रीव आग्नेयो रराटे पुरस्तादिति श्रोभिहितो जइत्यर्थः। किं च।
इंद्रापूष्णोः। इंद्रश्च पूषा च इन्द्रापूषणौ। देवताद्वन्द्वे चेति इ उपदस्य दीर्घः। तयोः प्रियं पाथः इष्टमन्नं नाभिबद्धा
ज्जत्ल क्षणं तदप्यप्येति सोमापौष्णः श्यामो नाभ्यामिति श्रुतेः। हुतश्रोषं यदाज्यं प्रदीयते तदा ललाटनाभि
बद्धावजो तल्लक्षणा यागछतइतिभावः। की दृशास्याश्वस्य। निर्णिजा। निर्णेजनेनं निर्णेजनं निर्णिवृ। तयेत्यर्थः।

अंगप्रक्षालनेनप्रावृतसंस्कृतस्य।आलंकृतनकालेस्नापितस्येत्यर्थः।णिजिरन्दुोत्वपोषणायोरित्यस्मात्संपदादित्वा
ष्णावेक्षिप्।तथारेकणसाप्रावृतस्य।रेकणइतिधननाम।धनेनसौवर्णमणिलेन्दूणनालंकृतस्य।अश्वस्यसौवर्णा
भरणीन्केसरपुच्छेषुपत्स्यआवेयंतीन्द्रकुमोखाल।अयंमंत्रः परमेश्वरार्चापरत्वेनयोज्यः।यत्पदा।एकांतनिक्ताः
निर्णिज्ञाकलश्योदकस्नापनेनरेक्णसाऽलंकारेणचप्रावृतस्यपूजितस्यहरेःमुखतोगृह्णीतांरातिंनैवेद्यत्
क्षेणांनयंति।तदा।सुप्राङुः सुलक्ष्मीः।उभितस्थितिङोमोनावस्यादसः।अजः।ब्रह्मान्च।मेम्यत्।समापिब्राप्त तेल
णंक्रिष्यतीतिवदन्त्येतिअोगच्छति।तथाविश्वरूपःरूङः अप्येति।विश्वरूपसदाशिव।विश्वरूपायवेनमोनमः।
सर्वोवैरुद्रइतिश्रुतेः।तथाप्रद्वेङ्गापूष्णार्देवतयोःप्रियंपाथःपाथइत्यन्ननाम।इष्टमन्नंभवति।यत्रहरिर्भुंक्तेतत्र
सर्वदेवाभुंजतेत्रृषिभिरिमावः।उक्तंहिनागविले।लेयोपभुक्तस्रग्गंधवासोऽलंकारचर्चिताः।उच्छिष्टभोजिनो
दासास्तवमायांजयेमहीति।यथातरोर्मूलनिषेचनेनतृप्यंतितत्स्कंधभुजोपशाखाः।प्राणोपहारेणयथेंद्रिया
णितथैवसर्वार्हणमच्युतेज्येति।मेज्योपहृतमन्नाद्यंयदास्वीकुरुतेहरिः।तदस्यादयस्तदेप्रंतिस्यामकिरो
षनाभिनइतिपंचरात्रेच॥२॥एषच्छागः।यत्पदा।एषच्छागःवाजिनाविगवताऽश्वेनपुरःपुरस्तान्नीयतेप्रा
प्यते।ललाटबद्धत्वात्।कीदृशः।विश्वदेव्यः।विश्वेभ्योदेवेभ्योहितःसर्वदेवार्हः।पुनःकीदृशः।पूष्णोभागः।पु
ष्णातिदेवानितिपूषाग्निस्तस्यभागःभजनीयः।आग्नेयोरराटइत्युक्तत्वात्पूषशब्दोग्निपरः।अग्नेःसर्वदे
॥११९॥ वात्मकत्वेनविश्वदेव्यत्वं।यद्वासोमापौष्णःश्यामोनाभ्यामित्युक्तत्वात्पूष्णोदेवस्यभागोजः सोपिअश्वेनतदे ॥११९॥
णासमयेपुरानीयतेआरभ्यतेतदात्वष्टाइत्।त्वष्टैवप्रजापतिरेवअर्वताऽश्वेनसहएतंछागंजिन्वतिप्रीणा
ति।किमर्थंसौश्रवसाय।शोभनंश्रवःकीर्तिर्यस्यससुश्रवाःतस्यभावःसौश्रवसंतस्मैसौश्रवसायसुकी

र्त्यै। यज्ञेष्वमृतानां स्वर्गगतिरूपत्वात्। कीदृशमेनं। अभिप्रियं। अभिप्रीणयति। सर्वस्याभिप्रियस्तं। समंतात् देवानां प्रीणयितार
मित्यर्थः। पुनः कीदृशं। पुरोडाशं। दाशृ दाने। पुरः पूर्वं दाशृमते दीयते स तथा तं। पुरोडाशस्य दृष्टं वा ॥३॥ यद्धवि
ष्यं। मानुषाः मनुष्या ऋत्विजो यत् यदा अश्वं त्रिः परिनयंति वारत्रयं पर्यग्निं कुर्वंति। कीदृशं अश्वं। हविष्यं हविर्यो
ग्यं। ऋतुशः ऋतौ ऋतौ यज्ञकाले देवयानं देवानां प्रापणीयं। देवेषु यानं गमनं यस्य स तं वा। देवयानमार्गगामिनं वा।
अत्र अस्मिन् पर्यग्निकाले पूष्णः पोषकस्य वह्नेः हुतस्य वा ऽग्ने भागः अजः प्रथमः पुरोगामी सन् एति गच्छति। आग्नेयो
ऽज इति श्रुतेः पूषा अग्निरेव। किं कुर्वन्। देवेभ्यः यज्ञं प्रतिवेदयन्। प्रख्यापयन्। पष वृद्धौ इति धातुः ॥४॥ होताध्वर्युः
इहोत्रादयः ऋत्विजः। तेन प्रसिद्धेन यज्ञेनाश्वमेधेन वक्षणाः वक्षणेति नदीनाम। घृतकुल्याख्याः नदीः आपृणध्वं।
घृतदधिपयः पयस्यापुरोडाशमांसैः पूरयध्वं। वहंतीति वक्षणाः। अनेनाश्वमेधेन घृतकुल्यादिनदीस्तांसाध
यतेत्यर्थः। कीदृशेन यज्ञेन। स्वरंकृतेन। रलयोरैक्यात् सुष्ठु अलंकृतेन। विप्रहविर्दक्षिणादिभिः शोभितेन। स्वि
ष्टेन। सा सुष्ठु इष्टेन। के ऋत्विजस्तानाह। होता देवानामाह्वानकर्त्ता। एकः। अध्वर्युः। अध्वरं इच्छतीत्यध्वर्यति।
सुप आत्मनः क्यच्। कव्यध्वरपृतनस्यर्चि लोप इति लोपः। ततः क्याच्छंदसीत्युप्रत्ययः। अयमपरः। आव
याः। अभिमुखेनावयजतीत्यावयाः। श्वेतवाहस्य शास्पुरोडाशावयाजां डस्यदोत इति डस्प्रत्ययः। अवयाः प्र
तिप्रस्थाता। तृतीयः। अवे यज इति ण्विन्। टिलोपः। अग्निमिंधे दीपयतीत्यग्निमिंधः। अग्नीत्। चतुर्थः। आग्नीध्र
न्मो रिंध इति मुमागमः। ग्रावग्राभः। ग्राव्णां ग्रहीतेति ग्रावग्राभः। कर्मण्यण्। हृग्रहोर्भश्छंदसि। ग्रावस्तोता।
पंचमः। उत अपि। शंस्ता। शंसति स्तौतीति शंस्ता। प्रशास्ता। षष्ठः। सुविप्रः। शोभनो विप्रो मेधावी सुविप्रो ब्र
ह्मा। ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हतीति स्तुतेः॥ अयं सप्तमः। अनुक्तोऽप्युपलक्षकः। एतैः पर्यंतेन यज्ञेन वक्षणा आ

॥१२०॥

आघ्रेण ध्व मितिसंबंधः।५। यूप व्रस्काउत। तेषामर्ह्व विजां। अभिगूर्त्तिः। अभिगोरणमभिगूर्त्तिः। उद्यमः। गुरी उद्यमने इति धातुः। नो स्माकं इन्वतु। प्रीणातु। व्याप्नोतु वा। अस्मद्यज्ञं सम्यक् कुर्वं त्विसर्थः। इन्वि व्याप्ति प्रीणनयोरिति धातुः। लोट्। इन्वपिसतिः इदितो नुम् धातोरिति नुमागमः। तेषां केषां। ये यूपव्रस्का ः यूपाय तक्षं वृक्षं तिच्छिंदंती ति यूपव्रस्काः। वर्णव्यत्ययः। उत अपि च। ये यूपवाहाः यूपं वहंतीति यूपवाहाः। कर्म ण्यण्। छिन्न यूप वाहकाः ये च अश्वयूपाय अश्व संबंधि यूपार्थं चषालं तक्षति यूपाग्रे तगे स्थाप्यं काष्ठं तक्षति। वचनव्यत्ययः। चषालो यूपकटकः कटक इत्यभिधानं। तक्षू त्वक्षू तनूकरणे। उतो अपि च। येनराः अर्वते अश्वाय। वाजिवाहार्वगंधर्वाइत्यभिधानं। पचनं। पच्यतेनेनेति पचनं पाकसाधनं काष्ठ कांडादिकं संभरंति। आनीयैकत्र कुर्वंति। तेषामभिगूर्त्तिर्न इन्वत्विति संबंधः॥६॥ उप प्रागात्॥ मन्म। मननीयं फलं। सुमत्। स्वयमेव उप अस्मत्समीपे अगात्। आगच्छतु। सुमदि स्वयं स्वयंमित्यर्थे। सुमम स्वयमित्यर्थ इति यास्केनोक्तः। तच्च फलं। मे मया धायि। धृतमित्यर्थः। किंच। वीत आरोहणार्थं सर्वैः कामितं पृष्ठं यस्य स वीतपृष्ठो यमश्वः देवानां आशाः मनोरथान् पूरयितुं उप। उपगच्छतु। उपेत्युपसर्गेण क्रिया ध्यावर्त्तिः। किंच। देवानां पुष्टं। पोषणं पुष्टं। तावक्तः। निमित्ते सप्तमी। देवपुष्टिनिमित्तं यं अश्वं वयं सुबंधुं। स्वर्गसाधनत्वात् शोभनबंधुं चकृम कृतवंतः। दीर्घः संहितायां। मार्षः। एनं अश्वं विप्राः मेधाविनः ऋषयः मंत्रदर्शिनः अनुमदंति। अनुमोदंतां। तुष्यंतु। लेट्। एतस्य ब्रह्मपरत्वे तु तत्र सायणोक्तेनीये। सर्वैर्मननीयत्वान्मन्म ब्रह्मतत्वं। सुमत्। स्वयं। कृपया। उप अस्मद्धृदयसमीपे अगात्। आगच्छतु। तत्किं। यन्मन्म मे मया धायि। कर्णाम्भत्वेन पादरूपीतं। धेटपाने। उपलक्षणं। यः परमात्मा दाग छतु। तत्किं। श्रवणमनननिदिध्यासनविषयीकृतः। तस्य साक्षात्कारो मम अस्त्विति भावः। कीदृशः। देवानां आशाः उपप

॥१२०॥

ऽधितं वीतं दत्तं पृष्ठं येन कूर्मसूत्रेणासवीतपृष्ठः । अन्यत्सर्वं स्पष्टं ॥७॥ यद्वाजिनः ॥ वाजिनो वेगवतोऽर्वतोऽश्वस्य
यत् ॰ म । शीर्षायां बद्धरज्जुः । शीर्षस्य ग्रीवा पन्नो दद्भिर्यो ये वतद्धिते इति । निरसो न वे छंदसीति यत्नस यः । तिष्ठवरि
त हितिस्वधितः । रसना । रसनानां रूपा । कटिस्थाया वास्थर ॰ ॰ । वा अथवा । अस्या मुखस्य च । प्रक्षिप्तं । आस्ये मुखे प्र
तं प्रहृतं प्रक्षिप्तं यत्तृणं । अस्तीति सर्वत्र शेषः । हेऽश्व । तेन च । ॰ सर्वा । तानि सर्वाणि देवेषु अस्तु । सन्तु । वचनव्य
त्ययः । देवोपयुक्तानि भवंत्वित्यर्थः ॥ निरुद्धो बहुलमिति प्रतिस्वरव्यनन्ति लोपः ॥८॥ ॥ हृदि दृष्टोऽस्तु ॰ ॥ यदश्वस्य ।
मक्षिका । अश्वस्य क्रविषः । क्रविः मांसं । कर्मणि षष्ठी । यत् । आस । तेन स्थितवती । अस्त्रक्षो जते । वा ऽथवा । यत्
मांसं । स्वरौ । स्वरुरि सकारांतो यं । यज्ञार्थ युधे पश्च अनेककाले रिसंलिप्तमस्ति । सत्वरुणा मुखमनक्तीति स्वरुते ।
यत्स्वधितौ । नखासे लिप्तमस्ति । छेदनकाले ऽवदानकाले च । यच्च शमितुर्हस्तयोर्लिप्तमस्ति । यद्वा शमितुर्नखे
षु लिप्तमस्ति हेऽश्व । सर्वा तानि अपि । तव तानि सर्वाण्यपि देवेषु सन्तु । सन्तु ॥९॥ यदूवध्यं । उदरस्य ऊवध्यं दूष
जीर्णतृणपुरीषं यत् अपवाति । अपगच्छति । बहिर्याति । तेन स्थितमपक्वमांसं यस्य ऊवध्यमित्युच्यते । तथा । आ
मस्यापक्वस्य क्रविषो मांसस्य यो गंधो लेशोऽस्ति । घृतगंधि भोजनमित्यादौ गंधशब्दस्य महा नाम्पले नापरत्वेन
व्याख्यातत्वात् । शमितारो विशसितारः देवा वा । तत् । ऊवध्यादि सर्वं सुकृता सुकृतं सुसंस्कृतं कृण्वंतु कुर्वंतु । उत
अपि च । मेधं मेध्यं । अश्वं । तद्धितलोपश्छांदसः । शृतपाकं यथा स्यात्तथा पचंतु । शृतः देवयोग्यः पाको यस्मिन्क
र्मणि यथा तथेत्यर्थः । अतिपक्वमीषत्पक्वं च न कुर्वंत्वित्यर्थः ॥१०॥ यत्ते गात्रात् । हेऽश्व । अग्निना पच्यमानात्तेत
व गात्रात् शरीरात् यत् अर्थात् कुमांसं वा अवधावति । अधस्तात् गच्छति । तथा । निहतस्य निःशेषेण हतस्य
यत् अंगं शूलं अभिधावति । शूलेन पाके क्रियमाणे यन्निर्गच्छतीत्यर्थः । तत् । निर्गतमांसादिकं स्म भूम्यां मा श्रित्

भवतु। नेत्यादि॥ श्लिष्टं मा भूत्। श्लिष आलिंगने। स्मास्कृषादित्वात् क्तेर् उः। नमाङ्योगे इत्यडभावः। तथा तण्णिषृपि मा श्लिषं
भवतु। विश्वासनसमये बर्हिर्लग्नं मास्तु। किंतर्हि तत्। पतितं तत्तण लग्नं च सर्वं देवेभ्यो रातं दत्तमस्तु। रा दाने। कीदृशेभ्यः।
उशद्भ्यः। उशन्ति कामयंते तेन उशंतः तेभ्यः। हविः कामयमानेभ्यः वशकांतौ। अस्माल्लटः शत्रादेशः। संप्रसारणं॥१॥
ये वाजिनं। ये जनाः पक्वं वाजिनं अश्वं परिपश्यंति। अयं पक्व इति जानंति। ये। ईं ई मित्यनर्थकं पूरणार्थं। ये च जनाः।
सुरभिः सुगंधः। हेतुगर्भं विशेषणं। सुरभित्वात्साको जातः। अतो हे पाचक। निर्हर। अग्नेः सकाशादुत्तारयेति
आहुः। तथा। ये च जनाः अर्वतोऽश्वस्य मांसभिक्षां उपासते। हुतशिष्टमांसयाचनां कुर्वते। उतो अपि च। तेषां पाकं
प्रष्टॄणां जनानां अभिगूर्तिरुद्यमो नोऽस्मान् इन्वतु प्रीणयतु। यद्वा। यं मंत्रो देवपरो व्याख्येयः। ये देवाः पक्वं वाजिनं परि
पश्यंति कदा हे पाचक अस्य पुरो ति। ये च देवा विलंबं दृष्ट्वा सुरभिः सुपक्वो जातोऽस्मान्नर्पि निर्हर देहीत्याहुः। ये च देवा अर्व
तो मांसभिक्षामुपासते मांसयाचनं। तेषामभिगूर्तिः संकल्पः नोऽस्मान्प्रीणयतु सफलो भवतु॥१२॥ यन्नीक्षणं।
एतद्वक्ष्यमाणा अश्वं परिभूषंति। अलंकुर्वंति। स्वस्वव्यापारेण पाकं साधयंतीत्यर्थः। के ते अलंकारत्वेनोक्ताः दिकः।
एते के। तानाह॥ मांस्पचन्याः। मांसं पच्यते यस्यां सा मांस्पचनी। तस्याः। मांसपाकाधिकरण भूतायाः उखायाः
स्थाल्याः यन्नीक्षणं। नितरामीक्षणं पाकनिष्पत्त्यर्थं पुनःपुनर्दर्शनं। करणाधिकरणयोश्चेति ल्युट्। लुंपेद
वश्यमः कृत्ये तुंकाममनसोरपि। समो वा हितततयोर्मांसस्य पचि युट्। घञोरिति मांसच्छब्दस्याकारलोपः। दि ॥१२१॥
॥१२१॥ इत्यणि त्रिलिङ्गात्। तथा। यूष्णः पक्वरसस्य आसेचनानि आसिच्यते येषु तानि आसेचनसाधनानि। या। यानि
पात्राणि। पद्दन्निति यूषन्शब्दस्य यूषन्नादेशः। यानि च रूपाणि मांसपूर्णपात्राणां अपिधानानि। अपिधानानि आ
च्छादनपात्राणि। कीदृशानि तानि। ऊष्मण्या। ऊष्माणं वारयंतीति तान्यूष्मण्यानि। निलोप आर्षः। ऊष्मन् शब्दाद्धार

णार्थे यत्रस्य धयः। आच्छादने स्तृणाति ऊष्मानं बहिर्यातीत्यर्थः॥ तत्स्वरितमिसं ततस्वरितः॥ किंच। अंकाः। चिह्नानि। चिह्नसा

अश्वावयव= धना। निहृदयाद्येवयवकलापकानि वंतस्मयानि। तथा। सूनाः॥ विन्यासनकारणीभूताः स्वधितयाद्यश्वस्य तेऽश्वपरिभू

षंतीति संबंधः॥ ५॥ मा त्वाग्निः॥ हेऽश्व अग्निः। त्वा त्वां मा धूनयीत्। धूमगंधं मा कारयतु। ध्वनौ सति पवन ध्वंसकं गः॥

स्यात्। दह्यमानं मांसं सिमिसिमीतिन्नद्यत्करोतीति तन्मा सिम्बु सर्थः॥ नेनयति धनयती स्यादिनाण्य ह ताच्च ङ अतिषे

धात्तूः चेकृः सिजेव। स्यंत द्दणाश्च स जागणिम्व्यादितामिति वध्यत्वाव। कीदृशो अग्निः। धूमगंधिः। धूमेस्य गं

धो लेनो यत्रस्य। अल्पधूमवानित्यर्थः। अल्पाख्यायामिति गंधादिकारः। किंच। भ्राजंती अतितापेन दीप्यमा

नाऽस्वास्थाली। मा अभिविक्त। मा चलतु। उपविजी त्वपचलनपो विस्वस्मात्तु ङितो ङिन्द्वलो झलीतिसिलोपे

विक्तेतिरूपं। कीदृश्यस्वा। जिघ्रिः। जिघ्रतिगंधमितिजघ्रिः। आदृगमेति किन्प्रत्ययः। आघ्राणमंत्राधिष्ठानदे

वतापत्त्यपा। तं एवंविधमश्वं वादे वासोदेवाः प्रतिगृण्हंति प्रतिगृह्णंतु। कीदृशं त्वां। इष्टं। प्रयाजैः। वीतं। आघ्री

भिः पर्यग्निकृतं। अभिगूर्तं प्रियजामहेइत्यागूर्तसौक्ते। वषट्कृतं। वषट्कारेण संस्कृतं॥ ६॥ निक्रमणं निषदनं।

यत्तु निक्रमणं नितरां क्रमणं। यद्वा नितरां क्रमते यत्र तन्निक्रमणस्थानं। एवमग्रेपि। निषदनं। सम्यगुपवे

शनं। तत्स्थानं वा। विवर्त्तनं। विविधं वर्तनं लुंठनं। तत्स्थानं वा। तत्वाधिकरणे च सर्वत्र ल्युट्। यच्च अर्वतोऽश्वस्य

पड्वीशं। पदबंधनं विशतीति तत्सड्वीशं पादबंधनसूत्रं। वर्णव्यत्ययश्छांदसः॥ किंच। अयमश्वः। यच्च अतत्पिपौ।

पच्च घासिं घासं। अकारस्येकार आर्षः। अदनीयं तृणादिकं न घासं जग्धितवान्। घसत्लृ अदने लिट्। हेऽ

श्वास्य वीताते। सर्वाणि तवतानि क्रमणादीनि देवेष्वस्तु। संतु। देवार्थस्योऽस्याश्वस्य परो मादीनामपि निरर्थ

कत्वं मा। स्वितितावः॥ ७॥ ॥ त्रयोदशोनुः०॥ ॥ यदश्वाय। रुक्ति जः अश्वाय अधीवासं। अधि अधिकत्वेन उप

रिवा। वसत्ते आच्छाद्यते येन तद् अधीवासं। दीर्घश्छादः। वासः वस्त्रं उपस्तृणंति। आच्छादयंति। तत्र आच्छादने
ऋषा दिगणः। ते धाप्या। यानि। हिरण्यानि मणिमालास्वरूपानि णि। अवदानार्थे सौवर्णानि शलाकानि वा उपस्तृणंति
अस्मै अश्वाय। तथा अर्वंतं। अर्वतः। षष्ठ्यर्थे द्वितीया। संदाने शिरो बंधने। पद्बंधनं पाद बंधनं चा स्ति। एतानि स
र्वाणि प्रिया। प्रियाणि भूत्वा देवेषु आयामयंति आरामयंति। प्रापयंति। यामयंतीति दीर्घश्छादः। अधीवास
मिसेके इति प्रातिशाख्येन प्रहूतिदीर्घत्वाद् अधीवासपदं काण्वमते पदपाठेन द्विरावर्त्तते। उपस्तृणंतीत्येकं प
दं। यद्वृत्तयोगेन निपातानामाख्यातपदेन सह समासात्। एवं यत्र यत्र यद्वृत्तयोगस्तत्रापि एवमेव ज्ञातव्यं॥१॥
चतुर्दशोनु०॥ ॥का०। इमा नु कमिति चद्विपदाः। अयस्मयपात्रेण अश्वलोहितहोमानंतरं इमानु कमित्या
द्याः षड् द्विपदाः जुहोति। कंडिकाद्वयस्य षड् द्विनिसंति। तैः षड्।हुतीर्जुहोतीति सूत्रार्थः॥ इमानुकं।
द्विपदा छंदस्का विश्वेदेवदेवत्या आप्त्यपुत्र भुवनदृष्टास्ति स्तिक्तवः। नु कं एतौ निपातौ पादपूरणौ। इमा नु
वना। इमानि भुवनानि कृतजातानि वयं सीषधाम। साधयाम। वशीकुर्म इत्यर्थः। साधयते र्लुङि चङि उत्त
मे बहुवचनं। अडभाव आर्षः। अश्वमेधेन सर्वं वशीकुर्म इति भावः। किं च इंद्रः। इदि परमैश्वर्ये। परमैश्वर्य
वान् गणः। निजपरिवारैः सहितः इंद्रः देवाः विश्वेदेवाश्च आदित्यैश्च दत्ता आदित्यैर्मरुद्भिरेकोनपंचाशता

स्वैश्च सहिताः संतः अस्मभ्यं भेषजा। भेषजानि औषधानि हितानि अनिष्टनिवृत्ती ष्ट प्राप्तिरूपाणि
करतु। कुर्वतु। किं च। इंद्रः आदित्यैः सहनः अस्माकं यज्ञं अश्वमेधं तन्वं शरीरं प्रजां पुत्रादिरूपां च सी
षधाति। साधयतु। नीरोगाः सुपुत्रादयो वयं यज्ञं सम्पूर्णं कुर्म इति भावः॥१॥ अग्ने त्वं। एता अपीति सूत्रोक्ति

पदाः। हे अग्ने। गार्हपत्य। त्वं नो अस्माकं। अंतमः अंतिकतमः सदा अस्मत्समीपवर्ती त्वं। उत अपि च। त्राता। त्रायते
स त्राता। पालयिता शिवः शांतः वरूथ्यः वरूथः पुत्रपौत्रादिसमूहः तस्मै हितो वरूथ्यः असि भव। दीर्घः संहिता
यां छांदसः। किंच हे अग्ने। वसुः अस्मन्निवासयिता वसुश्रवाः। वसुना धनेन श्रवः कीर्तिर्यस्य स तथा।
धनप्रदायीभि सेवमस्य कीर्तिर्महती। आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनादिति स्मरणात्। अग्निः अग्र
गामी त्वं अच्छ स्वच्छभावेन नक्षि। अस्मदीयं यागस्थानं प्रत्यागच्छ। नक्षगतौ व्याप्तौ इति धातुः। नक्षतिर्व्याप्तिकर्मा
र्थः। यद्वा यद्वा। वर्गं कुर्मस्तदा तदा निर्मलत्वेनागच्छेत्यर्थः। आगत्य च त्वं मतः सन् द्युमत्तमं दीप्तिमत्तमतिशयेन
रयिं धनं मानुषं देवं नाना खं च रादेहि। व्यत्ययश्छांदसः। किंच। हे शोचिष्ठ। शोचिरिति दीप्तिनाम। अति
शयेन दीप्तिमन्। अतिशायार्थे इष्ठन्प्रत्ययः। हे दीदिवः। अतिशयेन सर्वस्य दीपक। अग्ने। तं पूर्वोक्तगुणविशि
ष्टं त्वां सुम्नाय सुखाय ईमहे। शरणं व्रजामः। न केवलमस्मदर्थं। किं तर्हि। सखिभ्यः सखीनामर्थं च। त्वं द
त्तं धनं देवमित्राणामुपकाराय भवत्विति तात्पर्यार्थः। एष खण्डार्थो ब्राह्मणेऽपि हितः। पुरुषच्छंदसं वै द्विपदा द्विपा
द्ध्ययं पुरुषः पुरुषान्वायात्वदस्या इत्याद्येनेत्यलं विस्तरेण॥२॥ ॥पंचदशोऽनुवाकः॥ ॥ इति श्रीमं० सं० हि
तायां भाष्ये सायणाचार्यविरचिते वेदार्थप्रकाशे माध्यंदिनीयशुक्लयजुर्वेदीये तृतीयोऽध्यायः॥ ॥अनेन वेददीपेन मया नीराजितो हरिः। महुमंसार्थकीर्त्या महदंत्रं सर्वदे
वतु॥ ॥ ॥श्री॥ ॥ ॐ ३ नमः॥ सर्ववेदैकसंवेद्यं विष्णुं देवशिरोमणिं। देवतातः कालतश्चैव गुणतो
नेतमाश्रये॥ ॥इदं तु सारभ्य दर्शपूर्णमासपितृयज्ञाग्निहोत्रं तदुपस्थानं चातुर्मास्यपर्यन्ता ज्यो
तिष्टोमवाजपेयपर्यंतं तस्य याग्निचितिसौत्रामण्यश्वमेधसर्वमेधा मंत्राः क्रमेण व्याख्याताः। अथेदानीं पि

आधाराधेय
त्वेन =

त्तामंत्रा व्याख्यायंते। कात्यायनेन तेषां कुत्र चिद्विनियोगानुक्तेः। शाखांतरे तु रुगोसवादौ विनियुक्ताः। तेषां विव
स्वान्नृषिः। अन्यस्यानुक्तेः। आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायंत इति स्मृ
तेर्याज्ञवल्क्यो वा ऋषिः। ७॥ अग्निश्च॥ सप्त लिंगोक्त देवत्यानि। चतस्र ऋग्गायत्र्यः। सप्त संसदः। आसुयेकु
दुप्। अग्निः। च। पृथिवी च सन्नते। नवृतः। सन्नमनं संनतं। परस्परानुकूल्येन प्रवर्त्तनं। यतोऽग्निपृथिव्यौ
परस्परानुकूल्यवंतौ। अतोऽहं ब्रवीमि। ते अग्निपृथिव्यौ। मे मम। अदः। अमुकं वस्तु। संनमतां। अंतर्भूतण्य
र्थः। सन्नमयतां। ममवशवर्त्तिनं कुरुतामित्यर्थः। अद इति पुरूषादेर्नाम। द्वितीयांतमप्येतत्। णमुप्रह्वत्वे शब्दे।
छंदस्युभयथेति शपोऽप्यार्धधातुकत्वात्सेरनिटीति णिचो लोपस्तिस्संनमतामिति रूपसिद्धिः। एवमुत्तर
त्रापि। तथा वायुश्चांतरिक्षं च ते संनते। ते मेऽदः संनमतां। तथा। आदित्यश्च द्यौश्च संनते ते मेऽदः स
न्नमतां। तथा। आपश्च वरुणश्च सन्नते सन्नते। परवल्लिंगं द्वंद्वतत्पुरुषयोरिति युक्तेः पुंस्त्ववत्त्वे स्त्रीत्व
मार्षं। एवमष्टानां मध्ये सप्त संसदः। परमात्मानं प्रस्तुव्यते। हे परमात्मन्। यस्य जगच्चिकीर्षा स्तव जग
न्निर्माणे सति। अग्निवाय्वंतरिक्षादित्यद्युजलवरुणाः संसदः संसाधयंते संपादयंते जगंतिर्यात्मिरिति
संसदः। साधनानि। अष्टमी। पृथिवी तु। भूतसाधनी। भूतानि साधयति उत्पादयतीति भूतसाधनी।

॥१२३॥

साधूनानामेषामन्येषां चोत्साहिकाः। भूमिं विना भूतोत्पत्तेरसंभवात्। अथवा लुप्तोपमात्र। यथा अग्निश्च पृ
॥१२३॥
थिवी चेति ते तेऽसंनते परस्परेणानुकूलेन वर्त्तेते तथा अदो जगत्। मे मह्यं संनमतां। अनुकूलमस्तु। लो
डात्मनेपदे प्रथमपुरुषैकवचनं। एवमुत्तरत्रयोर्ज्ञेयं। अग्निः पृथिवीस्थानो वायुरंतरिक्षस्थानः सूर्यो द्युस्थाः

१२३

ग

नइतिश्रुतेराधाराधेयत्वाव॥ यद्वा॥ हेहरे। तवजगन्निर्माणे अष्टमी पृथिवी मूलप्रकृतिः भूतसाधनी सूक्ष्मस्थूलरूपेण
भूतेसादिका। अग्न्यादयः सप्तऋतवससदः सप्तरूपाः अर्वाचीनाः॥ सिंहासनप्राप्य भूतेतरैराज्ञः सम्पाद्यइवतदनंत
राड्रूसर्थः॥१॥ सकामांअध्वनस्कुरु। प्राजापत्यानुष्टुप्वाग्देवत्या। यस्यजगन्निर्माणे पृथिव्यादयः कारणं। सः स्वतंत्रः
कर्तासि अध्वनः अस्मन्मार्गान्सकामान्कुरु। काम्यंतदितिकामाः मनोरथास्तैः सहिताः सकामाः॥ येषुयेषुमार्गेषुधे
मीदिष्कुमयागम्यतेतत्रतत्रास्मन्मनोरथप्राप्तिरस्त्वित्यर्थः॥ किंच॥ अमुनामनोरथप्राणेनमेममसंज्ञानंसमं। वी
नंज्ञानंपरोक्षमपरोक्षंवास्तु। मनोरथप्राप्तिर्ज्ञानिसाधनमस्त्वितिभावः। यथायेनप्रकारेण ज्ञानभक्तिवैराग्यात्मके
न जनेभ्यः भ्रष्टाद्विजनेभ्यः इमांबुद्धिस्थांकल्याणीं श्रीभगवद्भक्तिपरत्वेन मंगलात्मिकांवाचं अहमावदानिसम्य
ग्वदामि। हेपरमात्मन् त्वंमदीयांवाचंतथैवानुगृहाण। यानहमुपदेस्यामि तेपि तेभ्यस्साज्ञानिनो भूयासुरित्यर्थः। य
तदानिखिलसंबंधात्तथेत्याद्यध्याहारः। यद्वा। हेपरमेश्वर। बृहस्पते वाग्न्यादयः सप्तसंसदः पंचज्ञानेन्द्रियाणिमनोबु
द्धिश्चेतिसप्तायतनानि। अष्टमी भूतसाधनी। भूतवत्रीकर्त्री वाक्। सत्वंनोध्वनः सकामान्कुरु। अमुनाकामेनसंज्ञा
नमस्त्वितियोजनीयं॥ एषोर्थोबृहदारण्यकेनिरूपितः॥ तदेषश्लोकोभवति अर्वाग्बिलश्चमसऊर्ध्वबुध्नस्तस्मिन्यशोनि
हितंविश्वरूपं। तस्यासतऋषयः सप्ततीरे वागष्टमी ब्रह्मणासंविदाने। अर्वाग्बिलश्चमसऊर्ध्वबुध्नइतीदंतच्छिर
एषह्यर्वाग्बिलश्चमसऊर्ध्वबुध्नस्तस्मिन्यशोनिहितंविश्वरूपमिति प्राणावैयशोविश्वरूपं प्राणानेतदाह तस्यासत
ऋषयः सप्ततीरइति प्राणावाऋषयः प्राणानेतदाह वागष्टमी ब्रह्मणा संविदानेति वाग्घ्यष्टमी ब्रह्मणा संवित्तइति॥२॥
ब्रह्मराजन्याभ्यां शूद्राय चार्याय। अत्रार्द्धर्चं कुलिगोक्तदेवसा गायत्री॥ द्वितीयार्द्धर्चं मध्येऽवसानरहितानुष्टुब्लोगा
क्षिदृष्टा। पूर्वं द्विजजनेभ्य इत्युक्तं। केभ्य इत्यत आह। ब्रह्मराजन्याभ्यां। ब्राह्मणाय। क्षत्रियाय। शूद्राय। अर्याय। वै
श्याय। अ। र्यः स्वामिवैश्ययोरितिनिपातः॥ स्वाय आत्मीयाय। अरणाय पराय। नास्तिरणःशब्दः। संग्रामोवायेनस

हसोऽरणइतिविग्रहः। रण शब्दे। चकारचतुष्टयं प्रत्येकं प्रत्येकं क्रियान्वयार्थं। यथाहं ब्राह्मणादिभ्यः कल्याणीं प्रियां वाचं
आवदानि तथा देवानामहं प्रियः प्रीतिपात्रं भूयासं स्वर्गादौ। इह अस्मिंल्लोके। दक्षिणायै दक्षिणाया आनतिः सा
धनभूता याः दातुश्च प्रियो भूयासं। देवाद् दक्षिणादातारश्च मयि प्रीतिं कुर्वन्त्वित्यर्थः। किंच। मेमम अयं कामः समृध्य
तां। सफलो भवतु। किंच। अदः इदं प्राणिजातं मां उपनमतु। प्रणमतु। सर्वजगत्प्रियो भूयासमिति भावः।१३।। ।।
प्रथमोऽनु०।। ।। बृहस्पते अति। ब्रह्मदेवस्यार्षं त्रिष्टुप्। गृत्समददृष्टा। बृहस्पतिस्त्वे बार्हस्पत्यं ग्रहयद्गृणेऽस्याः सोपपया
मायाः विनियोगः। ऋतात् सत्यात् ब्रह्मणः सकाशात् प्रजातं प्रकृष्टं जातं यस्य जन्म यस्य स ऋतप्रजातः। हे ऋतप्रजा
त बृहस्पते आंगिरस परमात्मन्वा। चित्रं विचित्रं तत् द्रविणं धनं अस्मासु यजमानेषु धेहि धारय स्थापय देहि
स्पर्धः। तत्किं। अर्यः स्वामी। श्रेष्ठः यत् धनं अति अधिकं अर्हात्। अर्हति पूजयति। अर्ह पूजायां। लेट्यडागमः। आवडावित्याग
मः। इतश्च लोपः परस्मैपदेष्विति इकारलोपः। अर्यशब्दोऽन्तोदात्तत्वात् स्वामिवाचकः। वैश्यार्थके आद्युदात्तः। ईश्वरयो
ग्यं धनं देहीत्यर्थः। यच्च धनं जनेषु स्वमित्रादिजनेषु विभाति। विशिष्टं भासते। यच्च द्युमत्। द्यौः कीर्तिरस्यास्तीति
द्युमत्। उत्तमवर्णं। दिवउत्वे ऋकुरः। यत् क्रतुमत्। क्रतुः सा धनं। यच्च शवसा बलेन सुखेन च दीदयत्। दापयति
प्रापयति दापयति वा। द्युत्यादिना आनीतं तद्दीदयत् इह तद्धनं धेहि। दय दानगतिहिंसादानेषु। अस्मात् लिङंता
त् कुल्प्रत्ययः प्रत्ययो द्वित्वे च। हे ग्रह त्वं उपयामेन पात्रेण गृहीतोऽसि बृहस्पतये धीपत्ये त्वां गृह्णामि स्थापयामि। ए
षते योनिः स्थानं। बृहस्पतये त्वां सादयामि। विनालीसेकपदं। यद्वात्र योगार्थसमासः। यद्वा ब्रह्मपरमिदं। तथाहि। हे बृ
हस्पते। अर्यः श्रेष्ठो ज्ञानी। यत् धनं ब्रह्मस्वरूपात्मकं। ब्रह्मैव वित्तं पुरुषस्य केवलमिति स्मृतेः। अति अर्हात्। अ
पि तमपि ज्ञाते। यच्च द्युमत् प्रकाशवत् निर्दोषं। यच्च क्रतुमत् सहसंकल्पं यज्ञप्रियं वा। यच्च जनेषु विभाति अंतर्या
मिरूपेण। यच्च शवसा स्वस्वरूपबलेन दीदयत् सर्वगतं दीप्यमानं वा यच्च चित्रं मत्स्याद्यवताररूपेण। हे ऋतप्र

॥१२४॥

॥१२४॥

षुः। वर्षणशीलो मनुष्यास्तान्सहंते। अभिभवंतीति वर्षणिसहः। मनुष्याभिभावुकास्तेषां मध्ये ओजस्वितमः। अतिशयेन ओजस्वी
ओजिष्ठः। इष्ठन्प्रत्यये परे विन्मतोर्लुगिति विनो लुकि टिलोपे सति ओजिष्ठ इति रूपं। दीर्घसूत्रोदस्तः। एवंविध इंद्र
आज्यस्य वेतु। कर्मणि षष्ठी। वी धातुः पानार्थः। आज्यं पिबतु। हे मनुष्य होतः त्वमपि यज ॥१॥ होता यक्षत्तनून
पातं। अतिजगती। नराशंसेन देवेन युक्तं तनूनपातं इंद्रं च देवं होता यक्षत्। यजतु। कैः। पथिभिः। पथ्यंते गम्यंते स्व
र्गं यजमानाः यैस्ते पंथानो हवींषि। तैः। कीदृशैः। द्युतिभिः। अवंतीर्लयंती सूतयस्तैः। ऊतिसती स्यादि नाकर्त
रि निपातः। तथा मधुमत्तमैः। मधु मधुरः स्वादोस्ति येषु ते मधुमंतः। अतिशयेन मधुमंतो मधुमत्तमास्तैः। की
दृशमिंद्रं। तेजसा जेतारं शत्रूणां। अपराजितं। केनापि न पराभूतं। स्वर्विदं। स्वः स्वर्गं वेत्ति स्वीयं जानातीति
स्वर्विल्लतं। यद्वा। स्वः स्वर्गो विद्यते इति स्वर्वित्। तं। विद सत्तायां। एवं देवहूयमुत इंद्र आज्यस्य वेतु। तनूनपादेव
तु। अत्र तनूनपान्नराशंसावेकत्र प्रयाजे पठितौ विकल्पेनेत्या वानयोः प्रयाजः ॥२॥ होता यक्षदिळाभिरिंद्र॥
मीळितमाजुह्वानं। होता इळाभिः प्रयाजदेवताभिः सह इंद्रं यक्षत्। कीदृशमिंद्रं। ईळितं। ऋत्विग्भिः स्तुतं। आजुह्वा
नं देवानाह्वयंतं। अमर्त्यं। अमरधर्माणं। देवो देवैरिंद्र आज्यस्य वेतु। कीदृशः। देवैः सवीर्यः। समानं वीर्यं यस्य सः।
सर्वदेवेषु यावद्वीर्यं तदेकस्मिन्निंद्रे स्तीत्यर्थः। वज्रहस्तः। पुरंदरः। पुरः शत्रूणां नगराणि दारयतीति तथा। सुमा
गमः। उक्तमन्यत् ॥३॥ होता यक्षद्बर्हिरिंद्रं। आर्षी त्रिष्टुप्। बर्हिः प्रयाजदेवतायां स्थितं इंद्रं होता यक्ष
त्। कीदृशं। निषद्वरं। निषीदतीति निषदः उपवेष्टारः। तेषां वरं श्रेष्ठं। अचलासनमित्यर्थः। वृषभं वर्षि
तारं। नर्यापसं। नर्यं नरहितं अपः कर्म यस्य तं। यजमानहितकारिणं। स इंद्रो वसुभिः। रुद्रैः। आदित्यैः। सव
नत्रयदेवैः सहितः सन्बर्हिः यज्ञं आसदत्। आसीदतु। आज्यस्य वेतु च। कीदृशो वः स्वादिभिः सयुग्भिः। सह
युज्यंते इति ते सयुजः। तैः। समानयोगैः ॥४॥ होता यक्षद्दुरो सेन। अतिजगती। नकारश्चकारार्थः। याद्वारः।

प्रयाजदेवता॥ इंद्रं इंद्रे ओजो वीर्यं सहस्वावर्द्धयन्। ओजः इंद्रियबलं। वीर्यं शारीरं बलं। सहो मनोबलं। तादृशे हे होताय

जल। तासु द्वारः इंद्रायेंद्रार्थं विश्रयंतां। विवृता भवंतु। अस्मिन् यज्ञे आज्यस्य आज्यं वा तु पिबंतु च। कीदृश्यो द्वारः

सुप्रायणाः। सुखेन प्रकृष्टमयनं गमनं यासु तास्तथा। विवृतत्वादित्यर्थः। ऋतावृधः। ऋते सत्ये यज्ञे वर्द्धयंति

ता ऋतवृधः। दुघ धर्मस्यास्तुदुसः। कीदृशोइंद्रायमीढ्वुषे। मीढुषे। मेहति सिंचतीति मीढ्वान्। तस्मै। छंदसत्वात् निपातः।

छदकस्य मनोरथस्य वर्षित्रे॥५॥ होतायक्षदुषे इंद्रस्य। औष्णी त्रिष्टुप्। अत्र पूर्वपदलोपः। होता उषे। नक्तोषसयजेतु।

कीदृश्यो ते। ये। समानो वा तरो वत्सो बालो यथोस्तो सवालरौ एके। नक्तोषसौ। नरो वत्सांगलुसौ मा। वत्सं यथा वा

दुयेतेत थेंद्र तेजसा अवर्द्धतां अवर्द्धयतां। तेजआज्यं वीतां। पिबतां। कीदृश्यो। इंद्रस्य धेनू। धिनुतस्ते घेनो। प्री

णयित्र्यौ। सुदुघे। सुष्ठु दुग्धस्ते ८ सुदुघे। दुहः कप्। घादेशश्च। मातरा। मातरौ। नात्वव्यत्यालिके। महि महो। महसौ।

॥६॥ होतायक्षदैव्या होतारो। अति जगती। दैव्याहोतारा दैव्यो होतारौ अयमग्निरसौ च मध्यमो वायुस्तौ हे होताय

जतं। यौ च इहविषा इंद्रं भिषज्यतः। चिकित्सतः। भिषज्रुग्ज, ये। केंडुदित्योयगितिपक्। इंद्रायइंद्रियं धत्तश्च।

कतो आज्यं वीतां। कीदृशौ तौ। भिषजौ। भिषजौ। चिकित्साकुशलौ। सखाया सखायौ। अन्योन्यस्ने हवंतौ। क

वी। क्रांतदर्शिनौ। देवो दप्यमानौ। प्रचेतसौ। अप्यु दारौ। पूर्वसवर्णदीर्घ आकारश्चयथायथं ज्ञेयो॥७॥ होता

यक्षत्तिस्रो देवीः। आर्ली अनुष्टुप्। भेषजं भेषजस्य। पे च यो लोकौ स्थान्। इळा सरस्वती भारतीति तिस्रो देव्यः

स्य होतायजतु। ते चाज्यं व्यंतु। नकारश्चार्थे। कीदृश्यस्त्र। तिधातवे आत्रेयो। अग्निवायुसूर्या धातवो धर्ता रो येषां

वो अपसः। पूर्वपदलोपः। स्वपसः। सुनानकर्मणि॥ ना.... णावातवर्षादिभिर्लोकस्य कुर्वंतद्दित्यर्थः। कीदृश्य

स्तिस्त्र। महीः महत्सः। इंद्रपत्नीः। इंद्रस्य पालयित्र्यः॥ हविष्मती॥ हविर्विद्यते यासां ताः हविष्मत्सः॥ विभक्ति

व्यत्ययः॥८॥ होतायक्षत्त्वष्टारमिंद्रं। अति जगती। होता त्वष्टारं प्रजा देवं यजतु। कीदृशं त्वष्टारं। इंद्रं। परमै

॥१२५॥

॥१२५॥

ष्वर्यवंतं । दीवं दीव्यंते । भिषजेरोगनिर्वर्तकैः । सुपर्णं । सुष्टुरस्यते स सु[...]जसं । स्तुतं । अयं घृतेन श्रीः सूत्रो गायस्यतं । ओ
ष्महृ[...] क्रादि प्रयाजाः । पुरूरूपं । पुरूणि बहूनि रूपाणि यस्य तं । सुरे [...] सूत्रो [...] तोयस्मात्तं । ७ मघोने । धनवं
ते । सत्वष्टा । इंद्राय इंद्रियाणि वीर्याणि दधत्सन् आज्यं [...] । होताय[...] वनस्पतिं । गाक्रूरी । होता वनस्पतिं प्रया
जदेवं यजतु । कीदृशं । शमितारं । उलूखलादिरूपेण [...] विशसिस्कं [...] र्तारं । यातेक्रतवः कर्माणि यस्य तं शतक्रतुं ।
प्रियो जोष्टारं । बुद्धेः सेवितारं । इंद्रियं इंद्रस्य हितं । [...] त्वष्टा मधुना मधुरेण घृतेन यज्ञं समंजन्नत्र हृदयं
नृसन् सुगेभिः सुगैः । शिस्यै स्सत्त्वविष्मादसः । सुगमैः पथिभिः मार्गैः [...] यज्ञं स्वदाति स्वादयति देवान्प्रापयति ।
अग्रे तर्षी लण्यधीः । स्व वनस्पतिरास्यं वेतु । सुखेन गम्यते येषु ते सुगाः । सुदुरोरधिकरणे इति गमेर्डप्रत्ययः । १० ॥
होतायक्षदिंद्रं स्वाहा । गाक्रूरी । होता इंद्रं यजतु । स्वाहाकारेण आज्यस्य देवान्यजतु । स्वाहाकारेण मेदसो देवान्य
जतु । स्वाहाकारेण स्तोकानां सोमबिंदूनां देवान्यजतु । स्वाहाकारेण स्वाहाकृतीनां देवानां । षष्ठी द्वितीयार्थे ।
स्वाहाकृतीः प्रयाजदेवताः यजतु । स्वाहाकारेण हव्यसूक्तीनां हव्यसंबंधि सुवचनानां देवान्यजतु । स्वाहाकारे
णाज्यपा देवाः प्रयाजदेवा जुषाणाः प्रीयमाणाः संतोऽग्ने वंत इंद्र आज्यं । व्यंतु पिबंतु ॥ ११ ॥ ॥ प्रथमोनुवाकः ॥
देवं बर्हिरिंद्रं । इत आरभ्य एकादश प्रैषाः प्रयाजसंबंधिन एवानुयाजप्रैषाः । देवता बर्हिरादयः । मैत्रावरुणो
वदति । बर्हिर्देवं । बर्हिः संज्ञा ऽनुदेयाजदेवता । इंद्रमवर्द्धयत् । लकारव्यत्ययः । वर्द्धयति । पुष्णाति । किं कृतं
बर्हिः । सुदेवं । द्योतनादेवा मरुदादयो यत्र तत् । तथा । देवैर्दीप्यमानैर्दीप्तिभिः खिन्निवीरवत् । वीरयुतं ।
वेद्यां स्तीर्णं । आच्छादितं । वस्तोरिव्यहर्नाम । वस्तोरहनि वलं लूने । धातुर्नामनेकार्थत्वात् । अक्तोरितिरा
त्रिनाम । अक्तोः रात्रौ प्रभृतं । प्रकर्षेण धृतं । यत्र बर्हिः । रायाहविर्लक्षणेन धनेन बर्हिष्मतः बर्हिर्युक्ता

नूअ न्मान्याग्गान् अस्मगात् अतिक्रम्य स्थितं। संस्कारो कर्षील्। त ह्व दुर्ग्ह्रे॥ वसुवने। वसुवन नाय धनदानाय।
वसु ये यस्य। वसु येसाय। वसु नो निधानाय यजमानग हे निरवननाय च वेतु। आ ज्ये पिबतु। वसुवने वसुधे
य स्मीति सप्तमी षष्ठी चतुर्थ्यर्थे। हे मनुष्य होतः त्वमधियज। एवमग्रेपि कुंडिका नेषो व्याख्येयः॥१॥ देवीर्द्वारः॥
एकाधिकानुकारी। यज्ञगृहद्वारोत्र देवताः। यद्धेति नियता नुवंति पन्नं त्विज्ञाय नैतयाम। कर्मतास्मिन् याम
न्। सुसम्यालुक्। यमेरनिण प्रसयो वह्निस्था। यामनि। कर्मणि याः द्वारो देव्यः इंद्र अवर्द्धयन्। कीदृश्यो द्वारः।
संघाते देहली कपाट द्वारद्वारशाखार्गलादिसमूहे संपन्ने सति वीड्वीः॥ वीड्वः। दृढाः। संघातं विना द्वारं दृढत्वा
नावादु। ताः द्वारः रेणुककाटं अपनुदंतां। काटः कूपः। कुत्सितः काटः ककाटः। रेणुभिः स्त्वाकुकाटो रेणुकक
टः तं अपनुदंतां। निवर्त्तयंतु। किं निम्नतो विद्वावेण साहुः। वत्सेन गोपुत्रेण। तरुणेन कुमारेण च। बालेन वा।
ओ। आनिमु रत्वन। अर्वाणं। अर्यते गम्यते यत्रेत्यर्वा। तं। द्वाराणां वेगो वत्स तरुण कुमारादीनां कूपपातः स्या
दिति हि लोर्थस्तु द्वारस्वेसति तत्स्मरणं युक्तमिति भावः। क्रूगतो विस्मसमादन्येभ्यो पि दृश्यंत इति वनिप् प्रसयः।
कीदृशेन वत्सादीना। मीवता। मीञ् हिंसायां। मय्यनमीः। क्विबंतोय। मीर्विद्यते यस्येति मीवान्। तेन मीव
ता। हिंसावता। हिंसा नूलीलाभ्यं चलन उज्ज्वलतो वत्साः कुमाराः मन्तेत्वात् रुणास्व यत्र पतेयुस्तं कूपमपनुदं
ता। भिस्पर्धः। उपलक्षणमेतत्। यत्र स्वप्रजा पत्नु नामनिष्टकरणि कूपादीनि मार्गादपनयंत्विसाशयः। ता
मंतु विवंतु॥२॥ देवी उषानक्ता। आहनी उष्णिक्। उषाश्च नक्ता च। उषासानक्ते। ते एवउ षासानक्ता। विनक्ते ॥१३६॥
॥१३६॥ राकारः। समासेउषः सू [illegible] उषसादेशः। दीर्घश्छांदसः। अहोरात्राभिमान्यो देवी देव्यौ यज्ञे प्रयति प्रवर्त्तमा
नेसति। इंद्र अहुतां आहूतवसो। प्रेतीति प्रयन्। तस्मिन्। प्रपूर्वादिणः शतृप्रत्ययः। ये उषसानक्ते देवीः
देवसंबंधिनी र्विर्तः प्रजाः प्राप्यासिषं जगतवसो। यातल्लिङ्। वसवो रुद्रा आदित्या विश्वेदेवा मरुत इत्यादयो

देवयज्ञाः। तेवी तां पिबतां। कीदृश्यौ। सुप्रीते। सुहुते। सुधिते। सुतरां हिते॥ ३॥ देवी जोष्ट्री। एकाधिका अतिजगती।
जोष्ट्री देवी। जोष्ट्र्यौ देव्यौ। इन्द्रं देवमवर्द्धतां। कीदृश्यौ। वसुधिती। वसुनो धनस्य धितिर्धारणं ययोस्ते तथोक्ते। द्यावापृ
थिवीरूपे। तयोर्मध्ये अन्यतरा एका आधा। अघानि पापानि द्वेषांसि द्वेष्याणि च अयावि। पृथक् कृतवती। दूरीकरो
ति। योतेश्छिण् लकारव्यत्ययः। अन्या द्वितीया। वार्याणि वरणीयानि भोग्यानि। वसु। वसूनि धनानि यज
मानाय आवक्षत्। आवहति। कीदृश्यौ। शिशिते। परस्परमनसा विदिते वेद्यौ। तेवी तां॥ ४॥ देवी ऊर्जाहुती। विकृतिः।
अधस्तनमन्त्रोक्तदेवताविकल्पः। ऊर्जाहुत्यौ देव्यौ। ऊर्जा बलरूपा आहुतिराह्वानं ययोस्ते देव्यौ। पूर्वं प्रोक्ते। प
यसा दुघेन इन्द्रमवर्द्धतां। अवर्द्धयतां। छन्दस्युभयथेति शप आर्द्धधातुकत्वात् सिचो लोपः। कीदृश्यौ। दुघे। दुग्ध
स्तं दुघे। दुहः कप् घश्चेति कप्रत्ययो घादेशश्च। दोग्ध्र्यौ। अनयोः सर्वाः प्रजाः संयोगमनुसञ्जीवन्तीति श्रुतेः। सु
दुघे साधु दोहने। तयोर्मध्ये अन्यतरा एका देवी इषमन्नं ऊर्जं द्व्यादिकं वक्षत् वहति यजमानाय। अन्या द्वितीया
तु सग्धिं सपीतिं च वक्षत्। समानो ग्धिः भोजनं सग्धिः। तां सग्धिं। समाना पीतिः सपीतिः। तां सपीतिं। पुत्रपो
त्रादिभिः सहपानं तेनान्नेन वहती स्पर्थः। किंच। येदे क्यो। नवेन अन्नेन पूर्वं पुराणमन्नं अघातां। पुराणेनान्नेन
नवमन्नमघातां। वार्याणि वसु। वसूनि चाघातां। अन्नं धनं चात्तयं कृत्वा वस्याविस्पर्थः। कीदृश्यौ। दयमाने। रक्ष
यंत्यौ रूपयंत्यौ वा। दयतेरनेकार्थत्वात्॥ ६॥ ऊर्जाहुती। ऊर्जा युक्ता आहुतिर्होमो ययोस्ते। ऊर्जं दधिघृतादिरसं यु
ञ्जयमाने वर्द्धयन्त्यौ। शिशिते तत्त्वदृष्टे। तेवी तां पिबतां॥ ५॥ दैव्या देव्या होतारा। अतिजगती। एकः पार्थिवोऽग्निः अ
न्यो मध्यमो वायुः। इमौ दैव्यौ होतारौ इन्द्रं देवमवर्द्धतां। कीदृशौ। हताघशंसौ। अघं पापं दुःखं शंसतीत्यघ

शंसः। हतोघ्नशंसोऽयाभ्यां तौ पापिनिवारकौ द्विष्टितौ। किंच। यजमानायवार्याणि वसु वसूनि आभो र्षम्। आहू
र्षं। आहतवंतौ। आङ्पूर्वाद्धरतेर्लुङ्। हस्य भः॥९॥ देवीस्तिस्रः। अतिजगती। तिस्रोदेवीर्द्देव्यः पतिं पालकं मि
द्रुमवर्द्धयन्। तिस्रोदेवीरिति पुनर्वचनमादरार्थं। ताएवाह। भारती दिवं स्वर्गमस्पृक्षत्। स्पृशंति। सरस्वती रविः
तरीयाकांतिकारिणी सधस्थः। रुद्रैः सहिता सरस्वती यज्ञं स्पृशंति। वसुमती धनवती इळा गृहान् स्पृशंति।ग्प
हृत्वा ब्देन भूर्लोकः। ताः व्यंतु॥७॥ देवइंद्रः। द्युतिः। नराअस्मिन्नासीनाः शंसंतीति नराशंसो यज्ञो देवः इंद्रं
देवमवर्द्धयत्। कीदृशो नराशंसः। इंद्रः इंदतीति इंद्रः ऐश्वर्यवान्। त्रिवरूथः। वरूथं गृहं। त्रीणि वरूथानि
सदोहविर्धानाग्नीध्राणि यस्य सः। त्रीणि बंधुराणि कूबरप्रकुः साभलतृणाभि बंधनानि यस्य सः। स नराशं
सः। शितिपृष्ठानां तातेन आहितः संसहस्रेण गो सहस्रेण प्रवर्त्तते। शितिश्यामं पृष्ठं यासां ताः शितिपृष्ठाः
गावः। तासां तातेन आहितः स्वर्गे स्थापितः। पश्चात् सहस्रेण यज्ञपशुसहस्रेण प्रवर्त्तते। मित्रं वरुणा
द्रत्। मित्रावरुणावेव वजस्य नराशंसस्य होत्रं अर्हतः। होतृकर्मणि योग्यौ भवतः। बृहस्पतिस्तोत्रं ओहा
त्रं अर्हति। अश्विनो अस्य आध्वर्यवं अर्हतः। स वेतु॥८॥ देवो देवैः। अतिशक्वरी। म्रपेउच्यते। वनस्पति
र्देवो देवैः सह इंद्रं अवर्द्धयत्। कीदृशः। हिरण्यपर्णः। हिरण्मयानि पर्णानि यस्य। मधुशाखः। मधुर्मधु

॥१३७॥

रारसवती शाखा यस्य। सुपिप्पलः। शोभनानि पिप्पलानि फलानि यस्य। योवनस्पतिः अग्रेण दिवं ॥१३७॥
स्वर्गमस्पृक्षत्। स्पृशति। स्पृश स्पर्शने। ऽस्मात् लुङि च्लेः शल इगुपधादनिटः क्स इति क्सप्रत्ययः।
अंतरिक्षं मध्येनेति शेषः। आ। स्पृशति। पृथिवीं अदृंहीत् दृढां अकरोत्। उपरेणेति शेषः। आंतरि

संमश्रेताभ्याः पृथिवीमुपरेण दृंही रितिसमानश्रुते ःस्वेतु ॥९॥ देवंबर्हिः । आर्षीत्रिष्टुप् । बर्हिर्देवं बर्हिः संज्ञम
नुयाजे देवतं कर्त्तृ इंद्रं देवमवर्द्धयत् । अन्या । अन्यानिबर्हींषि अभ्यभूत् । अभिभवतिस्म । यतः । वारितीनां ओ
षधीनां मध्ये देदीप्यमानं श्रेष्ठं । ओषधीनां कुशाः श्रेष्ठा इति स्मृतेः । वारि जले इति वर्त्तितिर्यासां ताः । वारितन
यः । जलाश्रयाः ओषधयः इति भावः । स्वासस्थं सुखेन आसेन आसनेन स्थीयते यत्र तत् स्वासस्थं । इंद्रेण
आसन्नं । आश्रितं ॥१०॥ देवो अग्निः । आर्षी त्रिष्टुप् । स्विष्टकृत् । अग्निर्देवः इंद्रं देवमवर्द्धयत् । स नोस्माकं अध
स्विष्टं कर्त्तव्यमिति तस्याधिकारोस्ति ॥११॥ अग्निमद्य ॥ × साधुकं करोतु । कीदृशः । स्विष्टं कुर्वन् । स्विष्टकृ
त्नाम्ना । होतेन मिष्टं × ८ एकाधिका जगती । सूपस्था ब्राह्मी उष्णिक् । त्वामद्य । एकाधिका विकृतिः । त्वामद्य
त्ययं प्रतीकः उक्तेषप्रैषेषु पक्षे संबंधी सूक्तवाकप्रैषः । अनुवाकद्वये विपिसकलः पठनीयः । अयं यजमानः अ
द्य अस्मिन्नहनि अग्निं होतारमवृणीत । वृतवान् । वृणीतेर्लङ् । किं कुर्वन् । पक्तीः पाकान् हविषां पाकान् पच
न् । पुरोडाशान् पचन् । इंद्राय देवाय छागं बध्नन् । किंच । अद्य वनस्पतिर्देवः यूपः छागेन इंद्राय सूपस्थाः
सूपस्थातव्यः । अभवत् । अपिबात् इंद्रः मेदस्तः । सार्वविभक्तिकस्तसिः । मेदोवपा । तामारभ्य तं छागं
अघसत् । अभक्षयत् । घस्लृ अदने । पचता । पचतानि । पचतेरतच् प्रत्ययः औणादिकः । पक्वान्यवदानानि प्रस
मत्सीत् । प्रतिजग्राह । पुरोडाशेन । अवीवृधत् । ऐधत । त्वामद्येति व्याख्याता । त्रयोविंशे ॥१२॥ ॥द्वितीयोनु०॥
एकादश वायोधसे पद्मैः प्रयाजप्रैषाः समित्तनूनपाद्या अग्नीदेवताः ॥ होतायक्षत् समिधानं ॥ अतिजगती । दैव्यो
होताग्निं वयोधसमिंद्रं च परतत् यजतु । वयः आयुर्दधातीति वयोधास्तं । आयुषो दातारं धारयितारं
वा । कीदृशमग्निं । समिधानं दीप्यमानं । महद्यशः । विभक्तिव्यत्ययः । महता यशसा सुसमिद्धं । दीप्तं । वरेण्यं

वरणीयं। किं कुर्वन्यजतु। गायत्री छंदः इंद्रियं वीर्यं त्र्यविं गां। वयः अग्नेस्त्वद धत्स्थापयन्। इंद्रे इति तन्नेषुः। षण्मासात्मकः का
लो ऽविस्फुच्यते। त्र्ययोवयोयस्याः सात्र्यविः। सार्द्धवत्सरागोः तां। साप्रयाज देवतेंद्र घृतासती आज्यं वेतु। हे मनुष्य हे
तस्त्वमपियज। एवमग्रेपियोज्यं ॥१॥ होतायक्षत्तनूनपातं ॥ एकाधिकातिजगती। होता। तनूनपातं प्रयाजदेवं। वयो
धस्मिंद्रे च यजतु। अदितिर्यं गर्भेदधे तमिं। द्रुमिस्यर्थः। शुचिं पवित्रं। कीदृशं तनूनपातं। उद्भिदं। उद्भिनत्ति प्रकट
यतिफलमित्युद्भित्। तं। यज्ञफलानामुद्भेत्तारं। किं कुर्वन्। उष्णिहं छंदः इंद्रियं दित्यवाहं गां वयस्त्वइंद्रे दधत्। द्वि
वर्षार्धगो र्दित्यवाट्। सः सेंद्रो वेतु ॥२॥ होतायक्षदीळेन्यं। वृत्रहन्तमाक्षरी। होता इळाभिः प्रयाजदेवताभिः सह व
योधस्मिंद्रं यजतु। कीदृशमिंद्रं। ईळेन्यं। ईडितुं योग्य ईळेन्यस्तं। ईड स्तुतौ। अस्मादर्हार्थे एन्य प्रत्ययः। ईळितं
ऋषिभिः स्तुतं। वृत्रहंतमं। अत्यंतं वृत्रहतवान्। वृत्रहंतमस्तं। नाहस्यनुडागमः। ईंद्रं सर्वैस्तुत्सं। सहः। सहसा।
बलेन। सोमं यज्ञिनां सोम वेदाह्लादकं। किं कुर्वन्। अनुष्टुभं छंदः इंद्रियं पंचाविं गां वयश्च इंद्रे दधत्। पंचाव यो यस्याः
सासार्द्धद्विवर्षगोः। सवेतु ॥३॥ होतायक्षत्सुबर्हिषं। गौंकूरी। होतावयो धसमिंद्रं यजतु। कीदृशं सुवर्हिषं। शो
भनं बर्हिः प्रयाजदेवतायस्य तं। पूषण्वंतं। पूषास्यास्तीति पूषण्वांस्तं। पूष्णायुक्तं। अमर्त्यं अमरणधर्माणं। श्रिये
रुचिते। अमृता। अमृते अनश्वरे बर्हिषि सीदंतिं तिष्ठंतं। सप्तम्या आकारः। किं कुर्वन्। बृहती छंदः इंद्रियं त्रिवत्सं गां
वयश्च इंद्रे दधत्। वत्सोव त्सरः। त्रयोवत्सायस्य सः त्रिवर्षो वृषभस्यर्थः ॥४॥ होतायक्षद्व्यचस्वतीः सुप्रायणाः। अति

॥१३८॥

कूरी। होताद्वारो देवीः। ब्रह्माणं परि बृंहणं वयोधस्मिंद्रं च यजतु। कीदृशी द्वारः। व्यचस्वतीः। व्यचो व्यंचनं गम
नावकाशो विद्यते यासु ताः अत एव सुप्रायणाः। प्रोक्तं प्रकर्षेण अयनं गमनं यासु ताः। ऋतावृधः। सत्यस्य
वर्द्धयित्र्यः। हिरण्ययीः। हिरण्यवदुज्वलाः। किं कुर्वन्। पंक्तिछंदः इंद्रियं तुर्यवाहं गां वयश्च इह इंद्रे दधत्। सार्द्धत्रि

॥१३८॥

वर्षो गोस्तुर्यवाट्। तुर्यं चतुर्थं वर्षं वहतीति व्युत्पत्तेः। ताः व्यंतु॥५॥ होता यक्षत्सुपेशसा सुशिल्पे। अतिद्रा करी हो
तो। [illegible] नक्तोषासा। नक्तोषसौ देव्यौ। विश्वं सर्वमिमं दंवयोधसमिंद्रं च यजतु। नकारो [illegible]। उषाः रात्रेरपरभागः। नक्ता
[illegible]। कीदृश्यौ सुपेशसा। सुपेशसौ। पेश इति रूपनाम। [illegible]। सुशिल्पे। यद्वै प्रतिरूपं तच्छिल्पमिति श्रुतेः। सु
ष्ठु शिल्पं प्रतिरूपं ययोस्ते। बृहती। बृहत्यौ दर्शनीये। दर्शनीयौ दर्शनीये च रूपेण। अस्मादतन्त्रप्रत्ययः। पुंगतलक्षणः पञ्च
स्वप्रतिगुणः। किं कुर्वन्। त्रिष्टुभं छंदः इंद्रियं पष्ठवाहं गां वयो दधद्दधत्। पष्ठं पंचमं वर्षं वहतीति पष्ठवाट्।
तेवीतां॥६॥ होता यक्षत्प्रचेतसा देवानां। एकाधिका। होता। दैव्या होतारा। दैव्यौ होतारौ अग्निवायू वयो
धसमिंद्रं च यजतु। कीदृशौ। प्रचेतसा। प्रचेतसौ। प्रकृष्टज्ञानौ। देवानामुत्तमौ यज्ञः। पुंजीकृतदेवयज्ञः स्वस्ति
कौ क्रांतदर्शिनौ। सयुजौ। सहयुज्येते तौ। समानयोगौ। किं कुर्वन्। जगती छंदः इंद्रियं अनड्वाहं गां वयो दधद्
दधत्। अनः शकटं वहतीत्यनड्वान्। शाकटवाह उत्तमो वृषः। अनसः सकारस्य वहतौ डकारादेशः। तौ वीतां।
॥७॥ होता यक्षत्पेशस्वतीः। एकाधिका। होता। तिस्रो देवीः। पतिं लोकपालकं वयोधसमिंद्रं च यजतु। कीदृ
शीस्तिस्रः। पेशस्वतीः। रूपवतीः। हिरण्ययीः। हिरण्यालंकृतदेहाः। बृहतीः। प्रभावेण। महीः। महतीः। तेजसा। आ
दिसैंद्राग्निसंबंधात्। कास्ताः। भारती। बहुवचनमादरार्थे। भारतीळा सरस्वती। किं कुर्वन्। विराजं छंदः इंद्रियं धेनुं
गां धेनुं गां वयो दधद्दधत्। नत्वार्थः। सैंद्रास्तास्तिस्रो व्यंतु॥८॥ होता यक्षत्सुरेतसं त्वष्टारं। एकाधिका। करी।
होता। त्वष्टारं वयोधसमिंद्रं च यजतु। कीदृशं। सुरेतसं। शोभनरेतस्कं। जगदुत्पादकत्वात्तस्य रेतः शोभनं। पुष्टिवर्द्धनं।
पुत्रादिपुष्टेर्वर्धयितारं। एकरूपाणि नानाविधरूपाणि बिभ्रतं। किं कुर्वन्। द्विपदं छंदः इंद्रियं उक्षाणं रेतःसेक्तारं गां

धृतंवयस्थइंद्रेदधत्। नष्टार्थः। सेंद्रउरस्यव्यवेतु। अत्र वष्ट्‌शब्देन सर्वस्यस्वातिरिक्तस्यजन। गतस्तन्मूकरणान्नियमन
नात्सरमात्मान्नियियते। तस्यजगदुत्पादकत्वेन सुरेतस्त्वं। जगदृत्यार्थं पृथक्पृथक् कूर्मादिनानारूपधारणादनेक
रूपधरत्वादिकंयुज्यते॥ २। होतायक्षद्वनस्पतिंशमितारं। असस्थिः। होता। वनस्पतिं वयोधसमिंद्रं चयजतु। कीदृशं
वनस्पतिंशमितारं। संस्कर्तारं हविषांकाष्ठरूपेण। शतक्रतुं बहुकर्माणं। हिरण्यपर्णं। हिरण्मयानिपर्णानियस्य
स्यतं। उक्थिनं। उक्थानिशस्त्राणिसंतियस्यतं। यज्ञवत्त्वा। रशनांरज्जुंबिभ्रतं। स्वभावानुवादः। वशिं। बध्नंते
नपशुवशीकरणकर्तृत्वं। कांतंवा। कमनीयं। अस्मादिप्रत्ययः। भगं भजनीयं। किंकुर्वन्। ककुप्छंदः इंद्रियंव
र्णांवशांवेहतंगर्भोपघातिनींचगांवयस्थइंद्रेदधत्। सेंद्रोवनस्पतिर्वेतु। १०। होतायक्षत्स्वाहाकृतीः अग्निं अति
ष्टगतीहोता। स्वाहाकृतीः प्रयाजदेवताः इंद्रंचयजतु। कीदृशमिंद्रं। अग्निं। अग्रेगतारं। पृथक्
प्रत्येकंयज्ञभुगृहपतिं। गृहस्यपालयितारं। वरुणं। व्रियतेस्तुत्विग्भिरितिवरुणस्तं। भेषजं। रोगनाशकं। कविंक्रा
तदर्शिनं। क्षत्रं। क्षतात्त्राताहारात्त्रातारं। वयोधसं आयुषोदातारं। किंकुर्वन्। अतिछंदसंछंदः इंद्रियंवीर्यं। बृहत्महत्
वृषभंपुष्टंगांवयस्थइंद्रेदधत्। सेंद्राः स्वाहाकृतयोदेवाआज्यस्यव्यंतुपिबंतु। हेमनुष्यहोतः त्वमपियज॥ ११। ।।
इतीयानुवाकः॥ ।देवंबर्हिर्वयोधसं। वायोधसस्पदेंद्रोरहमएकादशानुयाजानांप्रैषाः बर्हिरादिदेवताः एकाधिके
आर्ष्यैत्रिष्टुभे द्वे। बर्हिर्देवंवयोधसंइंद्रंदेवं अवर्द्धयत्। कीदृशंबर्हिः। गायत्र्याछंदसासहवासशंसितंवावर्हिरिंद्रि
यंवयस्थइंद्रेदधत्। ततवसुवनेनामवसुधानायवाज्यस्यवेतु। षष्ठीसप्तम्योचतुर्थ्यर्थे। हेमनुष्यहोतस्त्वमपियज ॥१३९॥
॥१३९॥ ॥१॥ देवीर्द्वारः। द्वारोदेव्यः। वयोधसं शुचिंपवित्रं इंद्रं अवर्द्धयन्। कीदृश्योद्वारः। उ
ष्णिहा छंदसासहवासहवाप्राणमिंद्रियं घ्राणेंद्रियं वयस्थइंद्रेदधत। दधत्सः। लिंगवचनव्यत्ययः। ताः व्यंतु। २। देवीउ

पासानक्ता। द्वे अह्नी बृहत्यौ। उषासानक्ता। देवी देव्यौ वयोधसं इंद्रं देवं अवर्द्धतां। उपास्थेन नक्ता वेउषासानक्ता। उड
वासौ बृहत्सइतिउषः शब्दस्य देवता द्वंद्वे उषस आदेशः। विनक्तेरा■कारश्च। कीदृश्यौ ते। देवी दीप्यमाने। कीदृशं इंद्रं।
देवं। दीप्यमानं। एको देवी देवशब्दो दीप्तिवाचको। अन्यो सुरवाचको। अनेन ... छंदसा बलं इंद्रियं वयश्च इंद्रे दधतु।
दधत्यौ दधतिः स्वयं। लिंगवचनव्यत्ययो वा। तेवीतां॥३॥ देवी जोष्ट्री। देवी देव्यौ दीप्यमाने। देव्यौ अनुयाजे
वते। देवं दीमं। वयोधसमिंद्रं देवं अवर्द्धतां। देवी देवशब्दो ... पूर्ववत्। कीदृश्यौ। जोष्ट्री जोष्ट्र्यौ। जुषते इति जोष्ट्र्यौ। मि
थः प्रीतियुक्ते। जुषेस्तृच् ऋन्नेभ्यो ङीप्। वसुधिती। वसुनो धारयित्र्यौ। धाञस्तिन्। स्थाधोरिच्चेतीकारः। बृह
त्या छंदसा श्रोत्रं इंद्रियं वयश्च इंद्रे दधद्दधत्यौ। तेवीतां॥४॥ देवी ऊर्जाहुती। शाक्वरी। देवी दात्र्यौ। दीदानगासौ। ऊर्जा
हुती। ऊर्जाह्वानवत्यौ। देवी देव्यौ। पयसा वयोधसमिंद्रं देवमवर्द्धतां। कीदृश्यौ। दुघे। दोग्ध्र्यौ सुदुघे। सुखेन दोग्ध्र्यौ
इष्वे। पंक्त्या छंदसा शुक्रं वीर्यमिंद्रियं वयश्च इंद्रे दधद्दधत्यौ। तेवीतां॥५॥ दैव्या देव्या होतारा। अतिजगती। देवस
बंधिनौ होतारौ दैव्यौ। विलक्षेरादेशः। वयोधसं देवं दीप्यमानं इंद्रं देवमवर्द्धतां। कीदृशौ। देवौ दीप्तौ। त्रिष्टुभा छं
दसा त्विषिं कांतिं इंद्रियं च भिंद्रियं वयश्च इंद्रे दधत्दधतौ। तेवीतां॥६॥ देवीस्तिस्रः। एकाधिका ब्राह्मी अनुष्टुप्।
तिस्रो देव्यः। भारती का सरस्वत्सः पत्नि पा॰ ल॰ कं वयोधसमिंद्रं अवर्द्धयन्। अभ्यास आदरार्थः। कीदृश्यः। जगत्या छं
दसा शुष्मं बलं इंद्रियं वयश्च इंद्रे दधतदधत्यः। तावेतु॥७॥ देवो नराशंसः। अतिजगती। देवो दातानराशंसो
नाम देवो देवं दीप्तं वयोधसमिंद्रं देवं अवर्द्धयत्। कीदृशः। विराजा छंदसा रूपमिंद्रियं वयश्चेंद्रे दधत्॥८॥ देवो व
नस्पतिः। अतिजगती। देवो दातावनस्पतिर्यूपो देवो देवं घोतमानं वयोधसमिंद्रं देवं अवर्द्धयत्। कीदृशः। द्वि
पदा छंदसा नगंसो भग्यरूपं इंद्रियं वयश्च इंद्रे दधत्॥९॥ देवं बर्हिः। ब्राह्मी बृहती। बर्हिः संज्ञं देवं दैवतं इंद्रं

देवमवर्द्धयत्। कीदृशमिंद्रं देवं दीप्तं। वयोधसं वयोदातारं। कीदृशं बर्हिः। वाशिनी नां वा र्थ्यऽसन्नानां मोषधी नां मध्ये देवं श्रेष्ठं। कुकुनाच्छंदसाय नूरस्तपमिंद्रियं वयस्त्विन्द्रे दधत्॥ १०॥ देवो अग्निः। ब्राह्मी बृहती। देवो दाता स्विष्टकृत्। नाम्ना अग्निर्देवो वयोधसं देवं दीप्तं इंद्रं देवमवर्धयत्। किं कुर्वन्। अतिछंदसा नाम्ना छंदसा हेतुभूतानेत्रा णरूपं इंद्रियं वयस्त्विंद्रे दधत्। सन्वंद्रः। वसुवने। वसुनो वननाय वसुधेयस्य वसुधानाय च वेतु आज्यं पिबतु हे मनुष्य होतस्त्वमपि यज॥ ११॥ अग्निमघ॥ एकाधिका ब्राह्मी गायत्री॥ स्तूपस्या ब्राह्म्यनुष्टुप्। एते व्याख्याते। वयो धसे। इति अत्राधिकमिंद्र विशेषणं। त्वामद्येति प्रतीकोक्तः सर्वोपि पठनीयः। एकाधिक विकृति छंदस्कः। अ ग्रमपि व्याख्यातः॥ ७॥ १२॥ ॥ इति त्रिंशोध्यायेन्त्यः षष्ठोनुवाकः॥ ॥ इति श्रीमन्नागदेव भट्टात्मजेन श्रीमदनं ता चार्येण विरचितायां वेदार्थदीपिकायां काण्वीयसंहितायां त्रिंशो ध्यायः समाप्तः॥ ॥ अनुनावे ददीपेन मया नीराजितो हरिः॥ मच्छ्रमं सार्थकी कुर्वन् मदं द्वासर्वदावतु॥ ७॥ ॥ ॥ ०॥ १॥ ७॥ ॥

॥ १४०॥ ॥ १४०॥

श्रीगणेशाय नमः ॥ ॐ ॥ सर्वविदेकसंवेद्यं हरिं देवद्विजप्रियं । देशतः कालतश्चैव गुणतोऽनंत माश्रये ॥ १ ॥ स
मिद्धो अद्य ॥ अथ मा[illegible]चिको ध्यायः । समिद्धो अंजन्कृदरं मतीनामिति बाहुदुक्थ्यो जिराप्रीणीयाद्बहदुक्थ्यो ह वै वाम
देव्यो श्वो वा सामुद्रिरूचस्याप्रीर्ददर्श तस्य तास्ताभिरेवैनमेतदाप्रीणीम इतिवदंतो न तथा कुर्यात् जामदग्नीभिरेवाप्री
णीयात्[illegible]तिर्वै जमदग्निः सोमयमेधः स्वयैवैनं देवतया समर्द्धयति तस्मा जामदग्नीभिरेवाप्रीणीयादिति ब्रा
तपथोक्तेः । तत्स्थास्याध्यायस्य प्रजापतिर्ऋषिः आद्याद्याए कादश त्रिष्टुभः आप्री संज्ञाः अग्निवस्तुतयो वामदेवपु
त्रेण बहदुक्थ्येन समुद्रपुत्रेणाग्नेन वा दृष्टाः । समिजान्नपादिळादिदेवताकाः ॥ तत्रस्थायं मंत्रार्थः ॥ हे अग्ने
जातवेदः जातप्रज्ञान । त्वं देवानां सधस्थं सहतिष्ठंति यत्रेति सधस्थं सह स्थानं प्रति । प्रियं प्रीति हेतुरूपं आ
वक्षि । आवह । देवान्प्रीणयेः सर्थः । वहतेः लापोलु[illegible]किमध्यमैकवचने रूपं । सधस्थमित्यत्र सधमादस्थयो

कारिंद्वया तिमानित्वल

रिति सूत्रेण तिष्ठतो परे सह शब्दस्य सधे स्यादेशः । कीदृशस्त्वं । समिद्धः । दीप्तः । इंधी दीप्तो अस्मात्कर्मणि नि
ष्ठाप्रत्ययः । मतीनां कृदरं । वर्णव्यत्ययः पदव्यत्ययश्च । बुद्धीनामलंकर्त्ता । रदजंतादिगणस्य स्यत्वा सर्वत्र निपातः ।
अंजन् । अर्थाद्घृतं प्रच्यावयन् । अंजव्यक्तिम्रक्षणकांतिगतिष्विति धातोः शतृप्रत्ययः । यद्वा मतीनां बुद्धीनां कृदरं
उदरं गर्भे अंजन् व्यक्तीकुर्वन् । अग्नेर्वागिंद्रियस्थत्वा द्वाक्यद्वारा बुद्धिरहस्यं प्रकाशयन्नित्यर्थः ॥ उदरमि
ति प्राप्ते कृदमिति छांदसं । मधुमत् । स्वादु घृतं पिन्वमानः । देवेषु सिंचन् । पिन्वतिः प्रीणनार्थः । वाजी । वजतीति
वाजी । गमनशीलः । वज गतौ । ग्रहादिभ्यश्च णिनिः । वाजिनं अन्नं वहन् । यद्वा त्वं वाजी । हयो भूत्वा वाजिनं अ
श्वमध्यीय वा त्वं यद्वा अन्नं वहन् देवान्प्रापयन्सन्प्रीणय । अत्र समिद्धशब्दः समिद्देवतावाचकः ॥ १ ॥ घृतेनांजन् । वा

नीः अस्मै देवान्। अर्थे कुर्वन्तु। कीदृशाः। घृतेन देवयानान्। देवान् यान्ति येस्ते देवयानाः तान् पथो मार्गान् प्रजानन्। दे
वमार्गज्ञः। एवं परोक्तमुक्त्वा प्रत्यक्षमाह। हे सप्ते अग्ने प्रदिशः प्रकृष्टदिगाश्रिताः प्राणिनः त्वा त्वां अनुसचं
ते। षच सेवने। सेवन्ते। सेवं तां। षपसंबंधे। सपति कर्मणा संबध्यते इति सपतिः। न केवलं देवानामुपकर्ता पितृसर्वेषा
मुपकर्ता पित्तनिष्पादकत्वं केवलं नेति भावः। किंच अस्मै यजमानाय स्वधामन्नं धेहि प्रयच्छ। अत्र घृतत्र बहुत्वं नेमा
ह्वाचकः। एवमुत्तरत्रापि ज्ञेयं।२॥ ईड्यश्च। हे वाजिन्नग्ने। त्वं ईड्यः असि। स्तुत्योसि। वंद्यो नमनीयोसि। आशुः
शीघ्रगोसि। मेध्यः अग्ने मेधयोग्योसि। चत्वारश्चकाराः समुच्चयार्थाः। असीति पदद्वयस्यो तत्रानुषंगार्थश्च।
अत्रामित्रावद्दस्य सर्वं निघाता। त्वा जातावोऽसि वं घो मेध्य इति प्रातिशाख्येनऽस्वयः। किंच। जातवेदाः अग्निः त्वा
त्वां वहतु। देवान्प्रापयतु। कीदृशोग्निः। वसुभिर्देवैः सजोषाः। जोषसा प्रीत्या सहितः। कीदृशं त्वां। प्रीतो वह्नि
देवानां वाहनं। हयो भूत्वा देवानवहद्वाजी गन्धर्वानर्वाऽसुरानश्वो मनुष्यानिति श्रुतेः। हविर्हव्यवाहकं वा॥३॥
स्तीर्णं बर्हिः। वयं बर्हिः सुष्टरीम। साधु स्तरीम। स्तृञ् आच्छादने। अदितिर्देवी स्तीर्णं तद्बर्हिः सु
विते। सुप्रसूते। साधुगते स्वर्लोके दधातु स्थापयतु। यण्णादन्त्रो वक्तव्य इयङादेशो आर्षः। यद्वा ऽस्मात् तिः घ ॥५४१॥
॥५४१॥ छिवांस्तीर्णं बर्हिः। अदितिः सुविते स्वर्गे दधातु विसन्न्वतयं। सुष्टरीम सस्या रव्यातत्वे सर्वं निघातत्वं प्रसङ्गे
त। कीदृशी अदितिः। सजोषाः। सप्रीतिः। स्योनं सुखं स्पर्शं कृण्वाना। कुर्वाणा। जुषाणा स्वयमपि सेवमाना।
कीदृशं बर्हिः। सुष्टरीम। सुष्ठु स्तीर्यते इति सुष्टरीम। स्तृणातेः कर्मणि मनिन्। सार्वधातुकार्धधातुकयोरि
ति गुणः दीर्घश्छान्दसः। अग्ने स्वयमग्नौ मनाच्छादकमिसमर्थः। उरु। बहु। पृथु। विस्तीर्णं। देवेभिर्देवैः प्रथमानं

विस्तार्यमाणं। युक्तं देवादेर्योग्यं॥४॥ एता ऽकवः। हे ऋत्विग्यजमाना वो युष्माकं। एता द्वारो देवीः। यज्ञगृहद्वारो देव्यः। ई
दृग्यो जं वंतु। उ। पादपूरणः। एवार्थः। ईदृग्यः कीदृग्यः। सुभगाः। शोभनं भाग्यं श्रीर्यासां ताः। विश्वरूपाः। नानारूपाः।
पक्षोभिः। पक्षस्त्रूदः संतः प्रदातार्थः। पक्षैः पक्षप्राये पार्श्वभागे कपाटैर्वा विस्त्रयमाणाः विस्तार्यमाणाः। कीदृ
शेः। उरु ऊर्ध्वं आतैः। असं तेषु विस्तार्यते ते आताः। अतसातत्सगमने समादत्रः। बद्धिः। उरुः ऊर्ध्वं प्रसृतैरिस्थैः। ऋ
ष्वाः। ऋषतीति ऋष्वाः। ऋषगतौ। अस्मात् कर्तरि भ औणादिको वप्रत्ययः। सतीः सत्यः सम्यचीनाः कवषः। कुषनि
ष्कर्षे। अमागमः। गुणः। कुषंति त्रिरुद्धं यंते इति कवषः। कपाटपिधानसमर्थेपत्रद्वैं कुर्वाणाइत्यर्थः। स्तसुषिरा वा। शुं
भमानाः शोभमानाः। सुप्रायणाः। सुखं प्रकृष्टं मयनं गमनं यासु ताः। यद्वा द्वारः धर्मार्थकामेषु द्वारभूताः देव्यः
यजमानपत्न्य ईदृग्यो भवंत्विति योजना। सुभगाः सुरूपस्थाः। वीरोत्पादकत्वात्। तत्र त्कार्ये विश्वरूपाः। विपक्षोभिः
पक्षभूते बलिः श्रयमाणाः। उदातैः संततैः। ऋष्वात्तत्सतो गमनशीलाः सत्यः पतिव्रताः कवषः सर्वगृहकार्य
निष्कर्षयंसः समापयंत्यः। शोभमानाश्च भवंतु॥५॥ अंतरा मित्रावरुणा। हे पत्नीयजमानो। वां युवयोः भूतस्य च
ज्ञस्य गृहाः स्मिन्यो नो स्थाने। उ षास्या। नक्तोषासो। एकदेश लोपो दीर्घश्च छांदसः। सादयामि स्थापयामि। द्विवच
नासह विरिखाच द्वितीयारात्रिः। वां क्यं तरेक्तम त्वाल्। कीदृशौ ते। मित्रावरुणा। मित्रावरुणो। अंतरा। अंतरांतरे
णायुक्ते इति द्वितीया। द्यावापृथिव्यौ मध्ये चरंती संचरंतो। अयं वै लोको मित्रो सौ वरुण इति श्रुते मित्रावरुणशब्दे
न द्यावापृथिव्यावुच्यते। यज्ञानां मुखं अग्निहोत्रादेः प्रारंभकालं अभिसंविदाने अभिसंवेदयमानो। अंतर्णीत
ण्यर्थः। कथयंत्यौ। सुहिरण्ये। शोभनं हिरण्मयरूपोचंद्रसूर्यौ ययोस्ते। सुशिल्पे। अन्योन्यं प्रतिरूपे। शिल्पं प्र

नक्तोषासा
समनसेति =

तिरूपं त्रवतीति वचनात्। एकस्याव सानेप्रीतिर्द्वितीयस्यासक्तिरिति भावः॥ ६॥ प्रथमावं। हे पत्नी यजमानौ। वां युव
योर्यज्ञे प्रथमा। प्रथमौ मुख्यौ होतारा होतारौ अहे अपि प्रियं। प्रीणितवानस्मि। प्रीणातेर्णिजंतस्य लुङि उत्तमैकव
चनं। अयं चाग्निरसौ च वायुर्मध्यम इति होतारौ द्वौ। कीदृशौ। सरथिना। समानरथिनौ। एकरथारूढौ। सुवर्णा। त्वो
तनकांती। देवौ दीप्यमानौ। दातारौ वा। दाञ् दाने गत्योः। विश्वा भुवनानि सर्वाणि भुवनानि पश्यंतौ। ओं दिसव इ
वनिलो। न लक्ष्यघोर्भेमिरापोहृदयं मनस्व। अहस्पुरा त्रिस्वस्र्जते च संध्ये धर्मश्च जानाति जगत्समस्तमिति वि
नेश्वरोक्तेः। वां युवयोश्चोदना। चोदनानि। कर्माणि। भिमाना। निर्मिमाणौ। प्रदिक्षु। प्रादेशो नाग्निमुखेन। ज्योतिः।
आहवनीयारव्यं ज्योतिर्यच्छत्यमिति दिशंता। दर्शयंतौ। यद्वा दिवारात्र्यग्निमार्गानुदेवौ अहमपि त्रियं। कीदृशौ। प्र
दिशा। पूर्वापरा दिग्भ्रमणेन ज्योतिः परब्रह्मारव्यं सर्वदास्येयमिति दिशंतौ उपदिशंतौ। प्रसहे का लोयातिः। ज्ञान्म
नव्यर्थेकार्यं। किं तु ज्योतिः ब्रह्मसेव्यमिति पुष्पदादिविश्वमुहूर्तपयंताविति सर्थः। आयुई रतिवे मुंसामुधन्नस्तम
यन्नसो। तस्यत्तैयः सणानीत उत्तमम्लाकवान्तयेति श्री नागवतो नेः। सरथिनो। सदृशरथौ। अन्यत्समानं। ७॥
आदिसेर्नः। आदिसेर्युता नारती। नोस्माकं यज्ञं व ह। कस्मयतो। वनूकां तो। तथा। सरस्वतीरूद्रैः सह नोस्माकं
यज्ञमावीत्। अवतु। लकारव्यत्ययः। तथा इडावरूत्रिः सहावतु। कीदृशी। उपहूता। हूतोपहवा। सज्जोषाः। प्री
तियुता। ति सणां विशेषणं। एवं परो स्मत्को प्रसेसेमाह। हे देवा देव्यः नारश्या घाः। पर्यंनोपस्ते अमृते षु देवे
षु धेनम्धापयत। ८॥ त्वष्टावीरं। त्वष्टा प्रेयाज्जदेवः वीरपुत्रं जनोनोजनयति। कीदृशं। देवकामं। देवान्कामय
ते तं [illegible] ऋणत्रयापाकरणसमर्थमित्यर्थः। आश्रमानो वेश्मसणा। स्त्रिनिर्ऋणवाजायते ब्रह्मचर्येण ऋषि

॥१४२॥

॥१४२॥

२

भिष्मं

योयज्ञेन देवेभ्यः प्रजाभ्यः पितृभ्य एव वा अनृणो यः पुत्री तिलेभिरीयस्तुते। तथा त्वष्टुः सकाशात्। आयुः। अस्मिन्
तेदिव्यो व्याप्नोती सायुः। अस्मो तेरूपप्रसयः। श्री अग्रगामी। अर्वा। इयम्भि न्नू नीभिनवतीसर्वा। अन्येभ्योपि दन्नूयंतेइ
स्पर्त्तर्वि निःपृ। अस्मो हु यो गायते तु स घृते। किंच। त्वष्टा इदं सर्वं भुवनं भूतजातं जजान। जनयति। अंतर्णी॥ तेण्यर्थः। हे
होतः। एवं बहोः भूयसः पथो दार्थस्य कर्त्तारं त्वष्टारं इह यज्ञे त्वमग्निरिह यज। यजते। इापिलुप्ते रूपं। ९। अस्मो घृतेन।
पाथस्य स्वमन्नं नाम। अस्वः। पाथः अवदानरूपं अन्नं मन्वा। ऋतुभिः ऋतो ऋतौ यज्ञकाले त्मन्या आत्मना। स्वयं। मं
त्रेघाः आद्देरासनत्स्याकारलोपः। देवान्। उपएतु। समीपे प्राप्नोतु। त्मन्ये स्वत्रि वित्र तोर्यादेन्द्रः सुपांसुलिति। कीदृशो
स्वः। घृतेन समक्तः। पत्नीभिः समुच्छ्रितः। किंच। वनस्पतिर्देवः प्रयाजस्य देवः हव्या हव्यानि वहत्। वहतु देवा
न्प्रति। कीदृशो वनस्पतिः। देवलोकं प्रजानन्। प्रकर्षेण जानन्। कीदृशानि हव्यानि। अग्निना स्वदितानि आ
स्वादितानि। अस्मो वनस्पती देवेभ्यो भागं प्रयच्छतीति सत्यर्थः॥१०॥ प्रजापतेस्तपसा। हे अग्ने त्वं यज्ञं दधिषे धा
रयसि। लडर्थे लिट्। कीदृशस्त्वं। प्रजापतेस्तपसा वावृधानः। वर्धमानः। दीर्घ आर्षः। वर्द्धमानः। सद्यो जा
तः। तत्कालमरणेनु सर्वाः। किंच। स्वाहाकृतेन। स्वाहाकारमुक्तो हुतेन हविषा सह पुरोगाः। पुरोगच्छतीति
पुरोगाः। अग्रगामी सन्। याहि। देवानाह्वय। विधिगते सति देवाः हविः अदंतु। नदायंतु। कीदृशं हविः। साध्या।
साध्यं। साधु लिखितं विभक्तेर्डादेश इति लोपेरूपं। यद्वा साध्या इति देवविशेषणं। साध्याः सन्ति देवा इति वचनात्।
अत्रापि पक्षे विभक्तेः पूर्वसवर्णदीर्घत्वं। हविर्दर्पिसोः साध्या इति प्रातिशाख्योक्तेः। पुरोगा इत्यत्र पुरः शब्द उप
पदे गमेरसुनप्रत्ययः। सर्वनिघातत्वा भद्रा मंत्रितं॥११॥ ॥प्रथमोऽनुवाकः॥ ॥केतुं कृण्वन्। अग्निर्देवस्य गाय

ऋ०।मधुछंदसा दृष्टाऽनिरुक्ता।हेऽग्ने त्वं उषद्भिर्होतृभिः कृत्वा अजायथाः।उत्पन्नोसि।जनेर्लङि रूपं।उषदाहे।उष्यं
ति हविर्ददतीति तेऽषंतः।होमकर्तारो यजमानाः।कीदृशस्त्वं।अकेतवे अज्ञानाय।केतुरिति प्रज्ञाननाम।मर्याः म
र्याय मनुष्याय।केतुं ज्ञानं कृण्वन्।कुर्वन्।तन्त्रादिक्षितिन्नोषः।विभक्ति वचन व्यत्ययः।यद्वा मर्या इति निपातः आमंत्र
णार्थकः।वाचक मुखिरिति प्रातिशाख्येन मर्यां इति निपातस्य सर्व निघात लोके।आविर्मर्या इत्यादौ तथा दृष्ट
त्वा।अत्र पक्षे।हे मर्याः पृथ्यागने त्वमुषद्भिरजायथा इत्यन्वयः।सकारांतं।तथा अपेशसे।पेश इति सुवर्णनाम।ना
स्ति पेशो यस्य तस्मै अपेशसे।पेशः कृण्वन्।आरोग्यं भास्करादिच्छेत् धनमिच्छेद् हुताशनादिति स्मृते।।४।।एवमग्निं स्तुत्वा अ
श्वस्तृणेष्वितान्योद्धॄन् युद्धोपकरणानि च स्तौति।।जीमूतस्येव भवति।भरद्वाजपुत्रः पायुः संग्रामांगानि प्रत्यृचं
स्तौत्यानिस्त्रिष्टुबादिः।तत्रादौ वर्म स्तवीति।यत्।यदा वर्मी।कवचवान्।समदां।संग्रामाणां उपस्थे उत्संगे अभ्ये
याति।तदा प्रतीकं।स्वेनां मुखं।मुखं प्रतीकमिति श्रुतेः।जीमूतस्य मेघस्येव भवति।स कृमा घेतियो ध्यायासु
ताः समदः संग्रामाः।मंदेः सहपूर्वी क्विप्।यथा मेघस्य मुखं विद्युत्तनितधारादिभिर्दुस्सहं।एवं हस्त्यश्वरथ
पादातास्त्र ज्वालनर्य नादन्नारादिभिः सेनामुखमसह्यं भवतीत्यर्थ वर्म घोरे ग्रेसती सर्थः।अतो हे वर्मिन् हे वर्मि
॥१४२॥ न।अनाविद्धया अहतया तन्वा शरीरेण त्वं जय।शत्रून्।सहा जयं प्राप्नुहि।किंच।सः प्रसिद्धः वर्मणः कवचस्य
महिमा त्वा त्वामपि पर्तु पालयतु।पृ पालनपूरणयोः।।१।।धन्वनागा।धनुः स्तौति।धन्वना धनुषा कृत्वा वयं गाः
जेन्तः जयेम।धन्वना आजिं मार्गं जयेम।अजंति गच्छंति यस्मिन्नित्याजिः प्रद्रुतिः।तीव्राः समदः संग्रामान् धनु ॥१४३॥
३ न्वना जयेम।धनुः शत्रोः अपकामं कामाभावं कृणोति।करोति।अपकाममित्यत्र अव्ययं विभक्त्यर्थ इत्यादिना अ
व्ययीभावः।।किंच।धन्वना सर्वाः प्रदिशो जयेम।इदं हि मनुष्यः प्रज्ञावो यत्सर्वजय इति भावः।।२।।ते

आवरंती। अत्र धनुःकोटी स्तूयते। ते प्रसिद्धे इमे आर्त्नी। अर्त्न्यौ धनुःकोटी। उपस्थे उत्संगे मध्यभागे विभृतां धारयतां। शर
मितिशेषः। तद्दृष्टांतः। मातापुत्रमिव। लिंगव्यत्ययः आर्षः। यथा जननी पुत्रमुत्संगे बिभर्ति। तथा ते। शत्रून् अपविध्य
तां ताड्यतां। यथा हि ना इति निपातस्य क्रियया संबंधः। कीदृश्यौ ते। आवरंती आ। चरंतौ। आगच्छंत्यौ धनुष्कं यति
तत्र दृष्टांतः। समना। योषेव। समनस्के योषे इव। चित्तैक्ये उदितः। यथा समचित्ते परस्परानुकूले स्त्रियौ कांतमागच्छ
तः। संविदाते। परस्परं संकेतं कुर्वाणे। संस्तृणीहि द्विषः शत्रून्। अमित्रान् शत्रून् प्रतिविस्फुरंती। विस्फुरंत्यौ। टंकारं
कुर्वाणे। इत्यर्थः ॥४॥ वक्ष्यंतीवेत् ॥ ज्याः स्तूयते। इयं ज्या। धन्वन् धन्वनि धनुषि। अधि विततात् उपरि विस्ता
रिता सती। शिंक्ते। अव्यक्तं शब्दं करोति। शिजि अव्यक्ते शब्दे। अदादिः। इदितो नुम् धातोरिति नुम्। का इव। योषेव।
यथा योषा कामिनी कामुकं रंजनाय अव्यक्तं वदति। एवमियमपीत्यर्थः। कीदृशी ज्या। समने संग्रामे पारयंती। सं
ग्रामादुत्तारयंती। समनमिति संग्रामनाम। या ज्या। कर्णं आगनीगंति। आकृष्यमाणा सती योद्धुः कर्णं प्रति प्रगच्छति तमा
गच्छति। यङ्लुकि गमेः रूपं। कीदृशी। उक्ते स्यते वक्ष्यंतीव। वक्तुमिच्छंतीव। अन्योऽपि प्रियं वक्तुं कर्णं प्रसागच्छति
प्रियं सखायं प्रकृष्टं मित्रं बाणरूपं परिषस्वजाना। आलिंगंती। खड्गे... स्वजेः ज्यानिमित्तापः रेलोसतिहि स्वाहृह्वः पार

कुंतं

यणः ॥५॥ अहिरिव भोगैः। हस्तघ्नः स्तूयते। हस्ते स्थित्वा हंतीति हस्तघ्नः खेटकः। यद्वा हस्तमाहंति त्राणोतीति स
हस्तघ्नः। हन हिंसागत्योरिति धातोः। प्रकोष्ठत्राणाय यत् तत् चर्मपुटकः। पुमान् सं मां परिपातु विश्वतः। सर्वतो रक्ष
तु। किं कृतः। विश्वा विश्वानि सर्वाणि वयुनानि ज्ञानानि कर्माणि अपायविषयाणि। विद्वान् जानन्। पुमान्
पुरुषो देवाधिष्ठितः। ज्याघातनिवारणाय वा। किंवा यो हस्तघ्नो भोगैः अवयवैः प्रबाहुं पर्येति हस्तं वेष्टयति। कइव।
अहिरिव। यथाहिः सर्पो भोगैः स्वदेहैः वृक्षादिकं वेष्टयति। कीदृशो हस्तघ्नः। ज्यायाः गुणस्य हेतिं बाणमोक्षसमुक्तं
परिबाधमानः। निवर्त्तयन्। इति खेटकपक्षे। प्रकोष्ठत्राणपक्षे तु ज्याया हेतिं प्रहारं परिबाधमानो निवारयन् ॥६॥ ब

एकवचनेनमत्रबहुवचनार्थेइषवः शर्मयंसन्निसुपसंहारात्।

ह्वीनांपिता। इषुधिः स्तूयते। इषुधिः तूणीरो बह्वीनांइषूणांपितापालकः। इषुर्द्वयोरित्युक्तेस्त्रिलिंगः। तथा। अ
स्य इषुधेः पुत्राः बहुः। पुत्रस्थानीयाबहवोयस्य। सइषुधिः। समना। समनासंग्रामानवगत्यप्रजाताव
स्था। कृणोति। चिश्चेतिशब्दंकरोति। शब्दानुकरणमेतत्। तूणाद्बाणनिर्गच्छतिचिश्चेतिशब्दोभवतीत्यर्थः। च
पुनः। सइषुधिः धानुष्कस्य पृष्ठेनिनद्धः नितरांबद्धोपिप्रसूतोऽनुज्ञातः सन्सर्वाः पृतनाः जयति। शत्रुसेनाः
पराभवति। कीदृशीः पृतनाः। संकाः। सर्वंतेसंबध्यंतेयोधाप्यासुताः संकाः। योद्धृरहताः। सच्चतेः संपर्का
द्वाकिरतेरितियास्कोक्तेः सच्चतेः किरतेर्वारूपं। विवृत्ताः कारकाणिभवंतीतिवचनादिषुधेः कर्तृत्वेदेवता
भिप्रायेणवेतिज्ञेयं॥७॥ सुपर्णंवस्ते। इषुंस्तौति। इषुदेवत्यात्रिष्टुप्। तत्रतत्रलिंगोक्तादेवतानुसंधेया।
याइषुः सुपर्णंपक्षिपिच्छंवस्तेपरिधत्ते। वसआच्छादने। शोभनंपर्णमपिरूपस्येतिसुपर्णः। पक्षी। तस्यविका
रः सौपर्णी। तत्रएकदेशे ... वन्निगमाभवंतीतियास्कोक्तेः सुपर्णशब्दस्तत्पिच्छार्थः। बाणपुंखेपिच्छसद्भावा
त्प्राप्यसेतत्॥ किंच। अस्याः इषोः दंतः फलकः मृगः। मृगयतेऽन्विष्यतीतिरिपन्हंतुमितिमृगः। मृगअन्वेष
णे। धुरसाध्वरदंतेः पचाद्यच्। मृगोमृगयतेरितियास्कोक्तेः। शल्यंहिवेध्यंमृगयते। किंचा याइषुः गोभिः प
र्ववत्। गोविकारैः स्नायुभिः सन्नद्धा। संबद्धा। पहबधनेः स्थान्निष्ठा। प्रसृता धनुष्मताप्रेरितासतीपततित।
यत्र दीर्घमुखंदेसः। नरः योद्धारः संद्रवंतिच संमुखंगच्छंति। विद्रवंतिच। विमुखं
नाचबलेप्रतिगच्छति॥ किंच। यत्रादीर्घसंग्रामदेसः। नरः योद्धारः संद्रवंतिच संमुखंगच्छंति। विद्रवंतिच। विमुखं

गच्छंति। चोसमुच्चये। तत्ररणे। इषवः बाणाः अस्मभ्यंशर्म। सुखंयंसन्। यच्छंतु। यमुउपरमे। लेटितिइडकार
लोपेऽडागमेसिबहुलंलेटीतिसिबागमेयंसन्नितिरूपसिद्धिः॥८॥ वनस्पतेवीड्वंगः। रथदेवत्यात्रिष्टुप्।
हेवनस्पते। रथ। वनस्पतिविकारत्वादथस्य। तत्रहत्वेनवन्निगमाभवंतीत्युक्तेः। त्वंवीड्वंगोभूयाः। त्वंवीडू
निदृढान्यंगानियस्येतिविग्रहः। कस्मत्सखा। अस्मत्सखा। अस्माकंमित्रभूतः। समासांतविधेरनित्यत्वाड्

जाहः स रविभ्रष्ठज्ञ। प्रतरणः। प्रतरति संग्रामपारं गच्छतीति तथा। सुवीरः। शोभनो वीरो रथी यत्र। किंच हे रथ। य
तः त्वं गोभिः गोविकारैः चर्मभिः सन्नद्धः बद्धोसि। अतो वीळय स्व। वीडयस्व। कते दृढं स्व। आत्मानं स्तंभय। ते तव
आस्थाता। आरोढा रथी जेत्वानि जेतव्यानि। जितेवन्त लुक्। रिपुधनानि जयतु। हिः पादपूरणः॥९॥ रथे तिष्ठन्
अश्वदेवस्थान जगती। सुषारथिः। प्रत्नमार्षं। शोभनः सारथिः। रथे तिष्ठन् सन् पुरः अग्रे गमनात् स्वर्वे यत्र यत्र
दृढा कामयते गन्तुमिच्छति। तं तं देशं वाजिनः रथे नियुक्तान् अश्वान् नयति। तथा। अभीशूनां प्रग्रहाणां रज्जूनां नाम
महिमानं महत्त्वं समुदायं पनायत। पनायति। व्यवहरति। स्वेच्छया रज्ज्वाकर्षणादिकं करोतीत्यर्थः। पन व्यवहारे।
गुपूधूपविच्छिपणिपनिभ्य आय इति आयप्रत्ययः। लोटि लङ्। अडभाव आर्षः। पश्चात् आकर्षणानंतरं। म
नः। अश्वानां मनः करणे रश्मयः प्रग्रहाः अनुयच्छंति स्वानुकूल्येन नियमयंति। यम उपरमे। इषुगमियमां छः
इति छत्वं। विवक्षाणि कारकाणि भवन्तीति सूक्तेः रश्मीनां कर्तृत्वं। सारथिर्यथा रज्ज्वाकर्षणं करोति तदानुकूल्ये
नाश्वा गच्छंतीति भावः॥१०॥ आजंघंति। कशां स्तौति। अनुष्टुप् कशादेवत्या। अज गतौ क्षेपणे च। अश्वाः अज्य
ते क्षिप्यंते यया सा अश्वाजनी। तस्याः संबोधनं हे अश्वाजनि कशे। समत्सु संग्रामेषु त्वं अश्वान् चोदय। प्रेरय। जया
पतिन्नेषः। कीदृशान् अश्वान्। प्रचेतसः। प्रकृष्टचेतनान्। अश्वविद्याविधिज्ञान्। हे कशे। यस्त्वया अश्ववाराः। एषाम्
अश्वानां सानु। सानूनि। वचनव्यत्ययः। सानुतुल्यानि मांसोपचितान्यंगानि आजंघंति आघ्नंति ताडयंति। यन्तुरंगताः।
तथा जघनान् अश्वानां कटिप्रदेशान् उपजिघ्नते निघ्नंति। तुरगारोहाः यया कृत्वा ये हयान् त्वरयंति। सा त्व
मश्वान् प्रेरयेत्यर्थः॥११॥ उपश्वासय। दुंदुभिदेव सा त्रिष्टुप्। दुंदुभिः स्तूयते। हे दुंदुभे। सं पृथिवीं भूमिं। उत अपि
चयो दिवं च उपश्वासय। उपनूह्य। श्वसिः शब्दार्थः। श्वस प्राणने। तथा विष्ठितं। वि विधं स्थितं जगत् त्स्या

नरं अंगमात्मकं विश्वं पुरुत्रा बहुधा ते त्वां मनुतां तु नातु। देवमनुष्यपुरुषपुरूमर्त्येभ्यो द्वितीयायास्त्वतस्योर्बहुत्वमिति
त्राप्रत्ययः। दुंदुभिर्विजयाय मन्दतीति सर्वे त्वां जानंतीत्यर्थः। स त्वं। दूरात् दवीयः। दूराद्दूरं गच्छन्। अपसेध। अपग
मय। अत्यंतं दूरं दवीयः। स्थूलदूरेति रेफलोपः पूर्वगुणो। कीदृशस्त्वं। इंद्रेण देवैश्च सजूः। जुषा प्रीत्या सहितः सजूः।
प्रीतियुतः॥१२॥ ॥द्वितीयोनु०॥ ॥ यदक्रंदः। त्रयोदशाश्वस्तुतिरूपास्त्रिष्टुभो जमदग्निर्दीर्घतमो श्वोदृष्टः। हे
अर्वन्। अश्व। यत्प्रथमं त्वं अक्रंदः। क्रंदितवान्। हेषारवमकार्षीरित्यर्थः। तदेतत्तव। महि। माहात्म्यं। उपस्तुत्यं
स्तोतुं योग्यं जातं। कथं स्तुत्यं तदाह। श्येनस्य पक्षा। पक्षौ। हरिणस्य बाहू वस्त्वदाक्रंदनजितावितिशेषः। श्ये
नपक्षौ वेगेण। हरिणबाहू वेगेन जितावित्यर्थः। कीदृशस्त्वं। समुद्रादंतरिक्षात् उद्यन् एवं प्रथमं जायमानः। उत
तवा। अथवा। पुरीषात् पालकपार्थिवात् सकाशात्। उद्यन्। उत्पद्यमानः॥१॥ यमेन दत्तं। हे वसवः अश्वेनाण देवाः। सूर्य
सूरात्। सिबं धेलक्षणा। आदित्यमंडलात् अश्वं निरतष्ट। निष्कृष्टवंतः। निःपूर्वात्तक्षतेर्लङि मध्यमबहुवचनं।
ततः। त्रितः। त्रिस्थानो वायुः यमेन दत्तं एनं अश्वं आयुनक्। अयुनक्। युक्तवान्। युजेर्लङ्। संहितायामटो दीर्घः।
इंद्रश्चैनमश्वं प्रथमः अध्यतिष्ठत्। आदावधिष्ठितवान्। वसुनिर्मितं यमेन पोषितं वायुना त्रितेन ऋषिणा वा ॥१४५॥
सन्नद्धमश्वमिंद्रोध्यतिष्ठदितिभावः। तथा। गंधर्वो विश्वावसुः। अस्याश्वस्य रशनामगृह्णात्। अग्रहात्।
॥१४५॥ हृग्रहोर्भश्छंदसीति भः। ई दृशास्तमश्वं स्तुम इति शेषः। एणमिति संहितायां छांदसं॥२॥ असि यमः॥
हेऽर्वन्। त्वं यमोसि। आदित्योस्यसि। गुह्येन गोप्येन व्रतेन कर्मणा त्रितोसि। किंच। सोमेन। सोमाधिष्ठात्रें
णा समया सह विपृक्तः विशेषेण पृक्तः संपृक्तः अधिष्ठितः। पूर्वमंत्रोक्तानुवादो ऽतो दोषवारणा। एवंभूत ५
स्य तव दिवि नक्षत्रे आदित्यमंडले सतः। त्रीणि बंधनानि रूपाणि सामलक्षणानि आहुर्ब्रह्मवादिनः। यदेत

मंडलं तपती सा दिवि सुरा त्वष्टा विराट् भावि यातपती स्फुर्के ॥३॥ त्रीणिते हे वरुण यत्र तेतव परमे

कुंचा अं कुरादि सरूपेण । तत्र ते तव त्रीणि बंधनानि पूर्वोक्तान्याहुः । तथा त्रीणि बंधनान्याहुः । स्वि

ति । तथा समुद्रे जलः समुद्रा बद्धं तदन्तरिक्षवाची । अंतरिक्षमध्ये त्रीणि बंधनान्याहुः । मे श्रेषिविधुत्सान

उतेव उतापि च । वरुणो वरुणरूपस्त्वं । मे । मां । शुन्सि । प्रशंससि । कर्मणि षष्ठी । छं इति सर्वं त्रिकर्म । अ

ने येत्रातेइति दीर्घ आर्षः ॥४॥ इमाते हे वाजिन् । तेतव । इमा । इमानि । अवमार्जनानि अहमपश्यं । प

कारस्य यः । अवमार्ज्यते ये स्तानि अवमार्जनानि वेत्तेसकटादीनि । तथा । शफानां खुराणां सनितुः

निधेयं तु पादवाससस्य इमा । इमानि । निधाना । निधानानि स्थानानि च अपश्यं । अत्र यज्ञे तेतव रस्र ... न

बंधनरज्जोः अपश्यं । कीदृशानि स्ताः भद्राः । कल्याणरूपाः । गोपाः । गोपायंतीति गोपाः रक्षयितारः । याः स्नानं

ऋतस्य । द्वितीयार्थे षष्ठी । कृतयज्ञं अभिरक्षंतेति । अत्रातेइत्यत्र संहितायां दीर्घ आर्षः ॥५॥ आत्मानंते । एवमश्व

स्तुत्वा मे विश्वर्त्यकर्म स्तोति । हे अश्व । तेतव आत्मानं मनसा आरात् दूरे । अहं अजानां । जानामि । जानातेर्लङि

उत्तमैकवचने । कीदृशमात्मानं । अवः । अधस्तात् दिवि सति । दिवा नभो मार्गेण पतंतं गच्छंतं । प्रतिपतयं

ते । पत ऐश्वर्य गत्योरिति धातुः । किंच । तेतव शिरः केकिनी । पतंगं पश्यामि । कीदृशं शिरः । पथिभिर्

मार्गैः जेहमानं । अतिशयेन गच्छंतं । हि गतौ । कीदृशैः पथिभिः सुगेभिः सुगेः । सुगमैः सुखेन गम्यते येषु तेः ।

सुप्रोरेभिकरणेद्वितिगर्मेई । अरेणुभिः । नास्ति रेणुर्येषु ते अरेणवस्तेः । उपद्रवरहितैरित्यर्थः । कीदृशं शिरः ।

पतत्रि । पतनशीलं । यथा सूर्येण नभोमार्गेण शीघ्रं गच्छता पक्षिणा । इपक्षवरहित तत्स्थामेव तत्र गामी सर्थः ॥६॥

अत्राते हे अश्व । अत्र अस्मिन् गोः सूर्यस्य पदे मंडले तव उत्तमं रूपं अहं अपश्यं । समंतात् पश्यामि गोर्नाद्दिसेबलि

बहुर्दस निधानाद्योरादिसोत्र । कीदृशं रूपं । इषः अन्नस्य हविषः । जिगीषमाणं जेतुमिच्छमानं । इषोन्नानि ।

Margin notes:

कामरादीनि

ग

जिगीषमाणमिति कृचिध्यातें। द्वितीयाबहुवचनस्ते सोविकाचस्तती यादिर्दीर्घत्वक्रिरिति पाणिनिना। तृतीयादेरं
तोदात्तत्वनियमा नादंतोदात्तत्वं न स्यादत्रे तिद्वेयं। जिगीषमाणमिस्पत्र जयतेः सनंतात्शानच्। संहित्तिलं
कुतोऽधिकं = होर्दै रितिगः। किंचामर्त्तेमिनुष्यापदाते तव नौगं अनुआनट्। अनुव्याप्नोति। हविर्लक्षणं भोगं समर्पयति।
आत्इत्। अनंतरमेव त्वं ओषधीः हविर्लक्षणाः अजीगः। गृ निगरणे। गिरसि नत्त्रयसि। कीदृशस्त्वं। ग्रसिष्ठः।
ग्रसेतस्ग्रसिता। अतिशायने ग्रसिताग्रसिष्ठः। असंतंमेत्तापिता। इष्टनि लुक्चोल्लुक्। गृणातेर्णिजंतस्याजीग
रिति रूपं॥७॥ अनुत्वा। हेऽर्वन् अश्व रथः। त्वीं त्वां अनुवर्त्तत इति शेषः। मर्योमिनुष्यस्त्वामनु। गावस्त्वामनु। कनी
नां कन्यानां भगः सौभाग्यं। त्वामनु। कन्यायाः कनीसादेशः। यत्र त्वं वर्त्तसे तत्र रथादयः संतु इत्यर्थः। किंच। व्राता
सः व्राताः अकारांतात् जसेरसुक्। मनुष्यसंघाः। तव सख्यं मैत्रीं ईयुः प्राप्नुवंति। मा गीदावितिशेषः। किं बहुना
देवास्ते तव वीर्यं सामर्थ्यं अनुममिरे। अनुमितवंतः॥८॥ हिरण्यशृंगोयः। यः प्रथमो मुख्यः अर्वतं त्वां अध्यति
ष्ठत्। अधिष्ठितवान्। यद्वृत्तं संयोगादध्यतिष्ठदित्येकं पदं। सोपिइंद्रः अवरः त्वदपेक्षया
यतः तस्याप्यपेक्षाप्यरकस्त्वमित्यर्थः। कीदृश इंद्रः। हिरण्यशृंगः। हिरण्यवत् शृंगं दीप्तिर्यस्य
नामसुपठितं। अस्याश्वस्य पादा अयः। अयः सदृशाः। आयसेन ग्रथितत्वा द्वाऽयः। मनोज
किंच। देवाइत्। देवा अपि अस्याश्वस्य हविरघं आयन्प्राप्नुः। अदनमघं। हविषः अघं
॥१४६॥ ॥९॥ ईर्मान्तासः। सूर्याश्वरूपेण यमश्वः स्तूयते। यत् यदाऽश्वाः सह। रविरथस्याः श्वे
हंसाइवश्रेणि यतंते। सम्यग्यत्नं कुर्वंति। तदादिव्यंदिवि वं दिव्यं। अज्मंगमनं संग्राममिवा
५ वंति। अहत् व्यासौ॥ द्विनिवासगत्यौ रिति वा। लङि प्रथमपुरुषबहुवचनं। कीदृशा अश्वाः
दूर्तीर्मः। ईर प्रेरणे। प्रभसयः। ईर्मः प्रेरितः अंतः शरीर प्रांतो येषां ते। ईर्मांताः। ए शूजनः

श्रीलिकमध्यमासः। श्रीलिकः श्लिष्टः संलग्नो मध्यमो मध्यप्रदेशो येषां ते श्रीलिकमध्यमाः। कृशोदराः इ
त्यर्थः। इकप्रत्ययः। शूरणासः। शूराः शौर्येण रणो रवो युद्धं वा येषां ते शूरणाः। दिव्या सेव दिव्याः। अत्ये
सततं गच्छतीति अत्याः। स कृध्युक्ता ब्राणा हंसपङ्क्तिरश्रेणिरिव धावन्तीत्यर्थः॥१०॥ तव शरीरं हे अर्वन्। त
नयिष्णु। पतनशीलं। तव चित्तं। ध्रजीमान्। ध्रज इति गतिनाम। गतिमान् वात इव। वेगवत्। तव शृंगा
अरण्येषु वनेषु दवाग्निरूपेण। चरन्ति। प्रसरन्ति। कीदृशानि शृंगाणि। पुरुत्रा बहुधा। विष्ठिता। वि
विधं स्थितानि। विषु जंङ्गाकीर्णि पुस्थितानि। जर्भुराणा। जर्भुराणि। जर्भुरविकसने। विकसितानि॥११॥ उप
प्र। अश्वः। शसनं। विशसनस्थानं उपप्रागात्। आगतः। कीदृशो वा। वजतीति वाजी। गमनशीलः। अर्व
वान्वा। देवद्रीचा मनसा दीध्यानः। देवानञ्चतीति देवद्र्यक्। तेन देवद्रीचा। विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्र
त्यय इति देवस्य टेरद्र्यादेशः। दीध्यानः। दीधीते स दीध्यानः। दीधीङ् दीप्तिदेवनयोः। शानच् प्रत्ययः। देव
हितेन चित्तेन दीप्यमानः। किंच। अस्याश्वस्य पुरो अग्रे अजो नीयते स्थाप्यते। कृष्णग्रीव आग्नेयो ररांटे पुरस्तादि
त्युक्तत्वात्। नाभिरस्यानु पश्चात्। अस्याश्वस्य नाभिः नाभ्यां विनिक्तिव्यत्ययः। नीयते। पौष्णः परस्तादिति श्रुतेः।
पौष्णः श्यामो ललाटे पश्चिमिति पर्वक्तेः। पश्चात्। अस्याश्वस्य पश्चात् कवयः क्रान्तदर्शिनः ऋत्विगादयः यन्ति गच्छ
न्ति। कीदृशाः। रेभाः। रेभन्ते स्तुवन्ति ते रेभाः। रेभृ शब्दे। स्तोतार इत्यर्थः॥१२॥ उप प्रागात् परमं॥ एवमश्वस्तु सा प्रजन्मा
ति। अर्वान् अर्वा। नलोपाभाव आर्षः। अश्वः पितरं मातरं च अच्छ। द्यावापृथिव्यौ सम्यक्। पृथिवी माता द्यौः पि
तरमाह। परमं उत्कृष्टं यत्सधस्थं सहस्थानं तत्। उपप्रागात्। गतः। एवं अश्व एवं देवलोकं गते सति हयस्य जन्मा
ता इति श्रुतेः।
ना। जुष्टतमः प्रीततमः। त्वं अद्य देवान् गम्याः। देवलोकं गच्छेः। गमेराशीर्लिङि मध्यमैकवचनं गम्या इति रूपं।

अथ अथानंतरं । एवं देवत्वं गताय दाशुषे हविर्दत्तवते ते तुभ्यं । वार्याणि वरणीयानि भोग्यवस्तूनि आ ऽशास्ते दे
वगणो वा ऽस्मै वा ददातीत्यर्थः ॥१३॥ ॥ तृतीयो ऽनु० ॥ ॥ समिद्धो अद्य । द्वादशर्चमाप्रीसं त्रिष्टुभो जमदग्निदृष्टाः ।
समिन्तनूनपाताद्याद्या देवताः । हे जातवेदः जातप्रज्ञ । अद्य अग्ने मनुषः मनुष्यस्य यजमानस्य दुरोणे । अद्य गृ
हे अद्य त्वं देवान्यजसि । कीदृशस्त्वं । समिद्धः दीप्तः । देवादानादिगुणयुक्तः । किंच हे मित्रमहः । मित्रवत्सर्ववन्म
हस्तेजो यस्य स तथा । आ वह च । देवानावह । आहूय यजेत्यर्थः । यतस्त्वं । चिकित्वान् । चेतनावान् । दूतः दौत्यक
र्ता । कविः क्रांतदर्शी । प्रचेताः । उत्कृष्टज्ञानो ऽसि । अतो यजेत्यर्थः ॥१॥ तनूनपात्पथः । तनूनामपां न पाति । यो
ऽग्निः । अद्भ्यो वा इदं जायते । तस्मादग्निरपां नपात्त्वमग्ने । हे तनूनपात् अग्ने । हे सुजिह्व । शोभनसत्
जिह्व । नानादेवस्थानि हवींषि उत्पन्नेषि नो लिह्यानि करोतीति वह्निः सुजिह्वत्वं । ऋतस्य यानान् पथः स्वदय ।
स्वदय । यायते यैः येषु वा ते याना स्तान् । करणाधिकरणयोश्चेति ल्युट् प्रत्ययः । ऋतस्य यज्ञस्य गमनसाध
नभूता मार्गाः हवींषि तान्स्वदय । हविर्भिर्यज्ञः प्रवर्त्तत इति यज्ञगमनपंथानो हवींषि । किं कुर्वन् । मध्वा सम
ञ्जन् । मधुरसेन संमिश्रयन् । यद्वा ऋतस्य देवगणस्य यानान्यात यान्पथः मध्वा रसेना ऽस्मे समंजंस्त्वं स्व
दय । हवींषीति शेषः । किं च नो ऽस्माकं अध्वरं यज्ञं देवत्रा देवेषु कृणुहि । देवानामय । करोतिर्ग त्यर्थः । किं कु र्व ॥१४७॥

न् । धीभिर्बुद्धिभिः सह मन्मानि ज्ञानानि उत अपि च यज्ञं विष्णुं कृण्वन् समर्द्धयन् । विष्णुवर्द्धनं तत्प्रीणनं ॥२॥
नराशंसस्य महिमानं । नरा अस्मिन्नासीनाः शंसंतीति नराशंसो ऽग्निः । प्रजापतिर्वा । नरैः शस्यो ऽग्ने

र्नो ऽसि वा । नराशंसस्याग्नेः प्रजापतेर्वा महिमानं महान्तं भाग्यं यज्ञपतिं ज्ञात्वा यमानानादेवानां मध्ये व
यस्तोषाम । स्तुमः । स्तौतेर्लेटि उत्तमबहुवचने सिब्बहुलं लेटीति सिप्प्रत्यये सति रूपं । कीदृशस्य । य

नतस्य। यजनी यस्य। यज्ञेः कर्मण्यच्प्रत्ययः। एषां केषां। ये देवाः उतपानि हव्यानि हव्यानि। हव्यकव्यरूपाणि
नयंति। कीदृशा देवाः। सुकृतवः। शोभनकर्माणः। शुचयः शुद्धाः। निष्पापाः। धियंधाः। धियं बुद्धि
दधतीति धियंधाः। विभक्तेरलुगार्षः समासे॥३॥ आजुह्वान ईड्य। हे अग्ने। त्वं। आ याहि। आगच्छ। कीदृशः
ह्वयति देवानित्याजुह्वानः। ह्वयतेः शपः श्लुः। ह्वः संप्रसारणमभ्यासस्य संप्रसारणं शानच् च। ईड्य
वंद्यः नमनीयः। वसुभिर्देवैः सजोषाः समानप्रीतिः। किं च। हे यह्व महत्। यः त्वं। देवानां होता आह्वाता। असि।
सः त्वं एनान्देवान् यक्षि यज। कीदृशस्त्वं। इषितः प्रेरितः। देवैः। अग्नीषोमा वा। यजीयान्। यजतीति यष्टा। अयं
तं यष्टा यजीयान्। ईयसुनि प्रत्यये तुरिष्ठेमेयस्सु इति तृचो लोपः॥४॥ प्राचीनं बर्हिः। अह्नां दिनानां अग्रे पूर्वा
ह्ने। बर्हिः प्राचीनं। प्रागंचतीति प्राचीनं प्रागग्रं वा स्मते स्तीर्यते। प्रातर्यागकालस्य प्रशस्तत्वात्। प्रातरग्निहोत्रं
हुत्वा ब्रह्माणं वृणीत इति श्रौतोक्तेः [illegible] इस्मुक्ते। किं बर्हिरास्तरणं स्वबुध्या। नेत्याह। प्रदिशा। प्रकर्षेणादि
श्यती प्रदिक् तेन। प्रागग्रं बर्हिः स्तृणातीति श्रुतिवाक्येन। अस्याः पृथिव्याः वेदेः वस्तोः वसितुं आच्छादयितुं
तुमर्थे तोसुन्प्रत्ययः। वेदिमाच्छादयितुमित्यर्थः। तत्र [illegible] निगमात्रवंती तेनेरूक्तास्य पृथिवी वेदिः। तत्
तू बर्हिः वि प्रथते। विस्तीर्णं भवति स्तीर्यमाणं सत्। उरु वा अर्थः। कीदृशं बर्हिः। वितरं। वरीयः। अस्यतेर्विरिति वि
तरं। अतितरां। अस्यंतमुरु इति वरीयः। प्रत्यर्थ [illegible] स्यादिना उरुशब्दस्य वरादेशः। ईयसुनि। देवेभ्यः अदितं
ये च स्योनं सुखकरं। अत्रादितिरखंडितत्वात्स्परमात्मापि [illegible] पते। तेन महतोप्युपकारित्वं बर्हिषा क्रियत इति
द्योत्यते॥५॥ व्यचस्वतीरुर्विया। द्वारो देवीः। द्वारो देव्यः। विश्रयंतां। विवृता भवंतु। कीदृश्यो द्वारः। उर्विया। उरुत्वे
न व्यचस्वतीः। व्यंचनवत्यः। गमनवत्यः। कथमिव। पतिभ्यो जनयो न। स्त्रिय इव। नञुपमार्थः। यथा जायाः

र्थं रूपं विश्वयंतीति तथेत्यर्थः। एवं परोक्षमुक्त्वा प्रत्यक्षमाह। हे द्वारो देव्यः। यूयं देवेभ्यो देवोपकारार्थं सुप्रायणाः
सुप्रगमनाः भवत। कीदृश्यः। बृहतीः बृहत्यः। विश्वमिन्वाः। विश्वं व्याप्नुवंति याः ता विश्वमिन्वाः। एतेन बृहत्त्वे हेतुरुक्तः। अ
नु सुप्रगमनाः भवत। कीदृश्यः। नमाना नमानाः। हे देव्यो द्वारः स्त्रीणां च विशेषणं। देवीर्द्वार इत्यादि सर्वं सामंत्रितं। सर्वं नि
घातात्। अर्वियेति द्वार्विभूषणं। ऊर्ध्वया। ऊरवः विशाला इत्यर्थः। इयान्वडियाच इयारश्चौर्ति विनक्ति रियाजादेशः।
विशालं ददतो दत्तः॥६॥ आसुष्वयंती। आ। नि। एतस्य पदयोः सदताभिस्यनेन संबंधः। अधीसस्पद् ध्यानेड इसनं
न। उषासानक्ता। अहोरात्रदेवते। यो नोपयज्ञ गृहे आनिषदतां। सीदतां। सीदादेशः भाव आर्षः। सम्यगुपवि
सूतां। कीदृश्यो। सुष्वयंती। स्मयतेः स्वपतेर्वा सु पूर्वस्य रूपं। पूर्वपक्षे मकारस्य वकारश्छांदसः। उत्तरपक्षे
पकारस्य यकारः। परस्परं हसंत्यौ। साधु स्वपंत्यौ वा। पुनः कीदृश्यौ। यजते। यजतीये। यजतेरतन्प्रत्ययः।
उपाके। उपसमीपं अक्रतः गच्छतः इत्युपाके। अंतिकगते। परस्परमव्यवहिते। दिव्ये दिविभवे। योषणे स्त्रीदे
वते। बृहती बृहत्यौ। सुरुक्मे। शोभनालंकारे। चंद्रसूर्याभिप्रायमेतत्। यतः शुक्रपिशं। शुक्रं च पिशं चावि
शुक्रपिशं। रलयोरभेदः। शुक्लं कपिशं च वर्णद्वयं धाने। धारयंत्यौ॥७॥ दैव्या होतारा। दैव्यौ होतारौ दृढौ आ
यातेरिति शेषः। कीदृशौ। प्रथमा। प्रथमौ। आद्यौ। सुवाचा। शोभनवाचौ। मनुष्यस्य यजमानस्य यज्ञं
कर्मिमाना। निर्मिमाणौ। कुर्वंतौ। प्रत्ययः। विदथेषु यज्ञेषु प्रचोदयंता। कारवः प्रेरयंतौ। कारू। कुर्वंत
इति कारू। कृणादयो बहुलमिति उण्। स्वयं कर्तारौ। प्राचीनं। पूर्वां दिशि आहवनीयाख्यं प्रदिशा
कृतिवाक्य नदिशंता। यदुक्त्वा निति कथयंतौ। सर्वत्र प्रथमाद्विवचनस्य सुपां सुलुगित्याकारः। यद्वा प्राचं
नं सर्वस्या पुरं ज्योतिः परं ज्योतिः सेव्यमिति कथयंतौ॥८॥ आनो यज्ञं। भारती इळा सरस्वती देवताः नो
कर्म यज्ञं। तूयं। क्षिप्रं आगत्य। यंतु। आगच्छंतु। कीदृश्यः मनुष्यवत्। इह कर्मणि चेतयंती

मनुष्यवदिति जा
ते =

॥१४८॥

॥८॥

८

[illegible]ः कार्य.। समिद्धोऽमंजन्नाश्वमेधिको ऽध्याय इति कात्यायनो केशरश्वमेधोपयोगित्वादिदमुक्तमिति ध्येयं।
[illegible] ॥पंचमोऽनु०॥ ॥आग्नेयः कृष्णग्रीवः॥ अश्वमेधे श्रुतिरस्ति। द्वत्येवै तेए कादशिन्या वालभ्रेते ते। तयोरेका
दशिन्योः पश्नवस्तद्देवताश्च केऽ काद्धयेनोच्यंते। ततश्च मानि ब्राह्मण कवाक्याभिः व्यदेवताप्रतिपादकानि
यजुर्षि। अतश्च मंत्रसंज्ञानि। कृष्णा ग्रीवा यस्य स कृष्णग्रीवः पशुराग्नेयोऽग्निदेवस्यः॥१॥ मेषी सारस्वती सरस्वती
देवताका॥२॥ बभ्रुः पिंगलवर्णः पशुः सोम्यः॥३॥ श्यामः कृष्णवर्णः पौष्णः पूषदेवस्यः॥४॥ शितिः श्यामं पृष्ठं यस्य
सः शितिपृष्ठः पशुर्बार्हस्पत्यः॥५॥ शिल्पो विचित्रवर्णो वैश्वदेवः विश्वेदेवदेवस्यः॥६॥ अरुणो रक्तवर्ण ऐंद्रः॥७॥
कल्माषः कर्बुरो मारुतो मरुद्देवस्यः॥८॥ संहितो दृढांगः ऐंद्राग्नः इंद्राग्निदेवस्यः॥९॥ अधोरामोऽधोदेशे श्वेतः
सावित्रः सवितृदेवस्यः॥१०॥ एकः शितिः श्वेतः पादो यस्य स एकशितिपात्। शितिः श्वेते तथान्यपात्र मेदुस्यंति
धानं। एकपादे श्वेतः अन्यत्र कृष्णः पेत्वः पतनशीलो वेगवान् पशुर्वारुणो वरुणदेवस्यः॥११॥ ॥षष्ठोऽनु०॥ ॥
अग्नयेऽनीकवते॥ द्वितीये कादशिनी पशुदेवानाह। रोहितो लोहितो रक्तवर्णोऽग्निस्तिलकोऽयस्य सोऽनड्वान्
अग्नयेऽनीकवते॥ ग्नये आलभ्यः। अनीकं मुखं सेन्यं वा यस्य सोऽनीकवान् तस्मै॥१॥ अधोरामो॥ अधोभागे
श्वेतोऽ नीकवते ऽग्नये आलभ्यः। रजतवर्णो नाक्रियपोरजतनाम्नी द्वौ पशू पौष्णौ॥५॥ पिशंगो पीतो
श्वेतो द्वौ पशू सावित्रौ सवितृदेवस्यौ॥३॥ रजतवर्णो नाक्रियपोरौ रजतनाम्नी द्वौ पशू पौष्णौ॥५॥ पिशंगो पीतो
तूपरो निःशृंगो द्वौ वैश्वदेवौ॥७॥ कल्माषः कर्बुरो मारुतो॥८॥ कृष्णः कृष्णवर्णः अजो मेष आग्नेयः॥९॥ मेषी
सारस्वती॥१०॥ पेत्वो वेगवान्पशुर्वारुणो वरुणदेवस्यः॥ एवमेकादशानि वंति॥११॥ ॥सप्तमोऽनुवाकः॥ ॥इ
ति श्रीम० मेकत्रिंशोऽध्यायः॥ ॥ ॥३१॥ [illegible] ॥ ॥ ॥ श्रीः॥ सर्वमेधे ऽग्निष्टोमसंस्थेऽग्निष्टुत्संस्थे प्र

यमेह नि अस्याजरासइत्याद्याः महो अग्नेर्नोरिसंताः सप्तदशाऋचो ग्निदेवत्याः पुरोरुचो न्नवंतीति। कात्यायन्नः॥
रुपुरोरुकू शब्दनकूष्माणाः ग्रह ग्रहणमंत्राउच्यते। नयजुस्त्वाः ऋग्वि पुरोरुगिति श्रुतेः। उक्थ्य महावैश्व
देवपात्नीवतहारियोजनेषु यजुस्त्वे ग्रहणमंत्रे सत्यपि। तंवा अपुरोरुचं गृह्णातीति श्रुते स्तत्र नदोषः। अ
तएवाग्नेयी भिर्ऋग्भिः पुरोरुचएव निर्वर्त्तते नो यथामादीनि। सप्तदशाऋचांमेध्ये आद्येद्वे ऐंद्रवायवग्रहग्र
हणेपुरोरुचो। ते तयोराद्याप घते। अस्याजरासोदमां॥१॥ वत्सप्री दृष्टा ग्निदेवत्या त्रिष्टुप्। आवायो न्न
वद्भ्याचिपा इत्यस्याः स्थाने इयमग्न न्विहिता। यतः प्रकृते आवायाविस्यविहिता। ७॥ अस्यार्थः ईमानस्य अग्न
यः ईद्दशाः संतु। कीद्दशाः। अजरासः। नास्तिजरायेषांते अजराः। वार्थकर हिताः अग्नीनाम मर्त्त्य धर्मित्वात्।
ओजस्विनस्सुकू। दमां ग्रहाणां अरित्राः रक्षकाः। नोकानामिवकेनिपाताः। अरित्र्यस्त्रायंत इत्यरित्राः। दमे
ति गृहनाम। यद्वा। दमांदमानां दमनीयानां रक्षसां सकाशात् अरित्राः तारकाः। आगमस्यानित्यत्वेन। वि
भक्तेर्नुडभावात्सवर्णदीर्घः। अर्चद्धूमासः। अर्चन्त्यर्चनीयः धूमो ज्वालायेषां ते अर्चद्धूमाः। पद्यमान त्वा
त्वाः। अर्चदित्यत्र कर्मणिशतृ प्रत्ययश्छांदसः। यद्वा अर्चंत्सः धूमोपकारिका ज्वालायेषामित्यर्चद्धूमासः। पा ॥१५०॥
वकाः शोधकाः। श्वितीचयः। श्वितिं श्वेतवर्णं चिन्वंतीति कुर्वंतीति श्वितीचयः। चिनोतेः क्विप्। अन्तिस्समा
नमूसनमिति तुगागमाभावः। श्वितिशब्द दीर्घः। प्रादृतिक आर्षः। उज्ज्वलत्वकारिणः। श्वात्रासः। श्वात्र शब्दः क्षिप्रवाचकः। श्वात्राः क्षिप्रफलप्रदाः। भुरण्यवः। तरणकर्त्तारः। वनर्षदः। वने काष्ठे सीदंती ति वनस
दः। एकदेशे हृस्ववन्निगमान्नवंती स्कंता॥ वनसदो वेटारफेणेति प्राप्तिन्नात्वयनरेफागमः। वायवोन। वाय

॥१५०॥ १०

वर्द्धयितारः पावयितारश्च। सोमाः सोम्याः सोमरसोपलक्षिता वा। अथवा वायवो विनोद्यन्ते ताः। नका
रश्चकारार्थः। अजरत्वादिदं विशेषणं समुच्चयाय। ततश्च प्रियस्य आग्नीः परेयम क्। तथाहि। अस्य प्रियस्य
वायवः प्राणाः अजराः जराविकाररहिताः। यत्रान्नमुक्ता जरसं तन्नानामिति तस्याः प्रार्थना यत्वात्तल्लक्षतया
काररहितसमेव विवक्षितं। दमानां गृहस्थानां गार्हपत्यादि जनितानां अरित्राः रक्षकाः। अथ वा दमाः अवंध्यकोपाः अ
ग्नयः अगमसमर्थं नियंतिपारं प्रापयंती सगन्तयः। कुंभकरेचकादिना पावयंतीति पावकाः। अतएव श्वितिं ना
वप्रभानो निर्देश्यः। उज्वलत्वं श्विन्चेती लिश्चिती स्थायः। स्वात्राः स्वकर्त्तव्ये आलस्यरहिताः। भुरण्यवः। पोषण
शीलाः। वने आनंदवने मोक्षार्थं सीदंति वसंतीति वनसदः सोमाः सोम्याः मन्त्रस्थलिङ्गेनाया सोमयागा
दिकारिणश्च संतु। अस्ति भवति इति वृत्तीनां प्रयोगः आकांक्षितः इत्युक्तेः क्रियापदाध्याहारः। भुरण्यवो
घृचि अकारलोपे अकारस्याकारे च सति भुरण्यरिति रूपं। चित्वादन्तोदात्तः। अन्तरादेवा अस्य दमामरित्राद
यः संहितिका। ।१। हरयो धूमकेतवः। गायत्री विरूपदृष्टा। इंद्रवाय्वादस्यास्याः स्थानीया। अग्नयः वृध वृष
धकृ वर्णव्यत्ययः। नानाप्रकारेण। अविस्वर्गप्रकारो वाउपयतंते। यजमानस्य स्वर्गं गंतुं अंतः कृपणस्य
कर्त्ते वाप्रयतंत इत्यर्थः। कीदृशाः। हरयः हरितवर्णाः। धूमः केतुर्ज्ञापको येषां ते धूमकेतवः। यत्र धूमस्त
त्राग्निरिति व्याप्तिसत्वात्। वातेन जूतं गमनं येषां ते वातजूताः। जगतो। अस्मात् दिव्य। द्यौर्दिवो द्यु स्त्रि
यामिस्वभिधानाद्यौस्तत्र स्वर्गवाची। द्युदीमान्वितिहितीयार्थे। अधिस्फुचाति स्फुवद् ।।२।। यजोनः।
गायत्री गौतमदृष्टा मित्रावरुणस्य पुरोरुक्। अयं वा मिसेस्याः स्थाने। हे ऽग्ने। नोऽस्माकं अर्थे मित्रावरु

ऽसोयज।तथा।देवांस्तदन्यानप्यज।उत्तयत्र दीर्घ आर्षः। तथा। वृहत्कृतं। महासमस्य रूपंविभ्युंयज।कीदृशंक्र
तं। स्वंदमं। तवाश्रयं॥३॥पुरुत्वाहि।गायत्री भरद्वाजदृष्टानेयी अग्निर्नग्रहस्य पुरोहूकूः।यावांकश्चास
स्याः स्थाने। हेऽग्ने। त्वं देवहूतमान्। देवानामतिशयेनमाह्वानकर्तॄ अस्मान्पुरुत्वा।योत्तय।दीर्घ आर्षः॥दि
त्राव्दः प्रसिद्धार्थः।प्रसिद्धेऽस्मिन्कर्मणी स्पर्धः।योदृजेनदृष्टाः। रथीरिवेति।रथीः अस्मान्प्रथायोजय
तितद्वदिस्पर्धः।रपेऽपिमत्वर्थीयः॥किंच।त्वं पत्वीः पूर्वजत्वः पुरातनोहोता होमोस्यादको भूत्वानिसस दः अ
त्रयागनिसीद॥४॥द्वे विरूपे।कुत्सदृष्टात्रिष्टुप्।उक्तयह पुरोहव्।तंप्रतथाइसस्या स्थाने।द्वेराव्यहनी
चरतः। अव्यवधानेनप्रवर्त्तते।कीदृशे। विरूपे। विविधस्वरूपयोस्तोभ। कृष्णारात्रिः शुक्लमहः।शुक्लेपि
स्वेदधानेदस्कृतः। स्वर्थे। ज्ञातनार्थे।लोकोपकारके।अन्यान्या।अन्याचअन्याचेत्यन्यान्ये।अहोरात्र
रः।वत्संउपधापयते।वारिपायपतः।धेटपाने।तथा।अन्यारकारात्रिः वत्समग्निं उपधापयते।रात्रौ
त्रग्निदेवत्यमग्निहोत्रं हूयते।अन्याद्दिवसस्वरूपावत्समादित्यमुपधापयते।अहि सूर्यदेवस्यमग्निहोत्रं।सत्र ॥१५२॥
देवेनसवित्रेस्वाहेतिमन्त्रवाक्येतथाभिधानमाह।तदेवाह।अन्यस्यांरात्रौ हरिः हरितवर्णोग्निः स्वधावान्
हव्यरूपान्नवान्भवति।अन्यस्यां उपसि शुक्रः शुक्रः शोभनस्वरः शोभनतेजाः आदित्योदृदृश्यते।आदित्यो
॥१५१॥ दिशुक्र भास्वरवर्णः।यद्वा द्यावापृथिव्यौ कथ्यते।अग्निर्नितो स्वधावान्।रविर्दिवि सुवर्चा दृश्यते।यद्वा
द्वे विरूपे विरुद्धरूपे जीवात्मपरमात्मलक्षणे।अन्यान्या।द्वितीयार्थे प्रथमा।अन्यामन्यां बुद्धिं गोर्वत्स
११ मिवउपधापयेते।स्वार्थेणिच्।धावते।सेवेते। तदुपयति।अज्ञानसंवलितत्वाद्धरितवर्णो जीवः अन्य

स्थां वृत्तिरूपायां बुद्धौ वर्तमानः सन् स्वभावात्कर्मजन्यान्नवान्नत्ति। संसरती स्पर्धः। मुक्तः मुक्तः परमात्मा अन्य
स्यां स्वस्वरूपबुद्धौ वर्तमानः सन्नुक्वचीद च्छेत्॥ निस्समुक्तः स्निग्धती स्पर्धः॥ ३॥ ...॥ द्वा सुपर्णा सयुजा सखाया स
मानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति [illegible]॥ ५॥ अयमिह। आग्नेयी
मातेव स्पर्धस्वजाते। ... ग्रहपुरोरुक्। अयं वेनस्य स्पाः स्थानि। अयमग्निरिह हूमते। शिथमो मोमुखः सन्॥
ग्नीवामदेव दृष्टा। मंथिग्रहपुरोरुक्। अयं वेन ... स्थापितः। अयमाधव आर्षः। कीदृशः। होता देवानां मान्द्रतमः
त्वमित्यर्थः रक्षितत्वे ... त्विगिनः धाधि। अधधि। स्थापितः। ... स्विशित तचो लोपः। अथ वेषुपत्नेषु अग्रः स्तुसः। अयं कः
शिष्टाः अतिशायेन यष्टा इति यजिष्टः। लुरिष्ठमेय स्विशित तचो लोपः। अस्थवे ... भगवः भृगुभिपाः ... विद्योविद्यो यजमानरूपायेतस्मै
मतओ आह। अभ्रवानः। अभ्रः सपसनामा। पुत्रवंतः भगवः ... भुवनेषु ... काष्ठेषु वायमग्निर्विरुरुचुः वि
त्रज्ञायेत रूपकारार्थवनेषु ग्रामाहुर्ईयजमाना रक्षे ... प्रदे ... भुवनेषु ... विश्वंविभुवंविभुत्वमाक्तिपुक्ते। प्रथम मत्र
रोचिणदीपितवंतः। कीदृशं। चित्रमनेकरूपं विविधकर्मापियोगित्वेन। विभ्वंविभुवंविभुत्वमाक्तिपुक्ते। इयमपि प्रियम
बृहस्पमुखार्थत्वं तित्ति त्रिराह। अयमिह प्रथमो धायि धातृभिरिस्याह। मुख्यमेवैनं करोतीति। इयमपि प्रियस्र
मोसनपरा। पृथा अयं प्रियः धातृभिर्भ्रातृसादिभिः प्रथमोमुख्यो धायि। होता स्मार्तकर्मकृत्। यजिष्ठः श्रौत
कर्मकृत्। यष्टिता होतीनां को विद्वोपस्तिष्ठ द्रुमा विषह्या रप्रदनायाम्नौ पुरोनुवाक्यमवेता यजनतय इष्टविधि
हामाः स्वाहाकारप्रदाना ... तयद्दतिकासायन स्रोतोक्तेः। अयं [illegible]॥ ६॥ यं अप्नवानो निष्यापाः तगवो
ग्निनो ... तेषुस्थित्वायं विद्वो विद्वो सर्वलोकार्यविरुरुचुः रोचितवंतः। रुचिविषयत्वेनाख्यान। अत एव वि
त्वं विभ्वं॥ ७॥ त्रीणिशता। विश्वामित्रद्रष्टा त्रिष्टुप्। विश्वेदेवदेवतास्याग्रयणग्रहस्य पुरोरुक्। ये देवा सहस
स्याः स्थाने। त्रीणिशता। त्रीणि शतानि। त्रीणि सहस्राणि। त्रिंशत्। नव च। देवाः ३३३९ एतावत्स्वादिगणदेवाः

२

अग्निं असपर्यन् परिचरेति। सपर्यतिः परिचरणकर्मा। यद्वा ऽऽगानोक्तदेवाः। नैवेषां कास्त्रिरुद्राः स्युर्देवा नोदक्षी वै
ष्णवि। तेऽब्रह्म विष्णुरुद्राणां त्वाक्षी नावर्णत्रेदतइति। तेयथा। ३३३३३३३३३९ तावंतो नवेति। कथं परिचरेति तदा
ह। घृतैः अग्निं औक्षन्। अभिषिंचन्। उक्षसेचने। लङ्। तथा अस्मै अग्नये बर्हिः अस्तृणन्। आस्तृतवंतः। अ
स्तृणन्ति यत्र पादादिस्था भावेपि कवाक्यांता दिर्वादामंत्रितमनानार्थे। पा दादावितिप्रातिरुप। खेनोद्घात्त
रत्ना। इत्यत्र सुपां सुलुक्। इत्यादिना विभक्तेः पूर्वसवर्णदीर्घः। धन्वेत्यत्र सुपां लुक्। दधात्वेरस्त्रदाम्ना न्साकान्दी
फोम्येति निपातः। वार्याणि सत्र। ऋहलोर्ण्यदितिण्यत्। तेण्यत्प्रत्ययो व्रीहिः॥ ९॥ हिरण्यपाणिः सविता। सवि
तासर्वप्रेरकः। सूर्यः। सौरफलानां सुहृत्। उभे द्यावापृथिवी अंतः। उभयोर्द्यावापृथिव्योर्मध्ये। ईयते। आगच्छ
तियदा। तदा अमीवां व्याधिं अपबाधते। अंधकारलक्षणरोगं प्राणिनां जाड्यादिरोगं च निवर्तयति। अथयदा। वेति।
अस्तमयं गच्छति। तदा कृष्णेन रजसा अंधकारलक्षणेन द्यां द्युलोकं अभिकृणोति। आच्छादयति। कीदृशः सूर्यः।
हिरण्यपाणिः। भक्तार्थं सुवर्णपाणिः। विचर्षणिः। विविधं द्रष्टा। सर्वेषां कृताकृतप्रत्यवेक्षकः। उभे द्यावापृथि
वी इत्यत्र विभक्तेः पूर्वसवर्णः। अंतः त्राब्दस्यांतरार्थिकत्वादंतरांतरेणयुक्ते इति द्वितीया। ईयते इत्यत्र ई इगतौ
दिवादिः॥ १०॥ हिरण्यहस्तो असुरः। योदेवः सविता। रक्षसो राक्षसान्यातुधानान् स्तेषु पिङ्गाति विशेषांश्च अ
पसेधन्। अपगमयन्। अस्थात्। उदस्थात्। उदेति। लकारव्यत्ययआर्षः। सदेवः। अर्वाङ्। अर्वागंचनः।
अस्मदभिमुखः यातु आयातु। कीदृशः सः। हिरण्यहस्तः। हिरण्यदानार्थं हस्तौयस्य सः। रूपेणवाताद्
शः। हारी हिरण्मयवपुर्धतत्वरूखचत्रः इतिस्मृतेः। असुरः। असून् प्राणान्रातीति व्याख्यपगामिन सक्तोभ्यो
ददातीत्यसुरः। नीथेतिस्तुतिनाम। कल्याणस्तुतिः। सुमृळीकः। साधुजनसुखयिता। स्ववान्। धनवान्

परिजनवान्वा। प्रतिदोषं। प्रतिजननंयो दोषः प्रसवायः प्रतिदोषस्तं। गृणानः। उच्चारयन्। श्रुतिस्मृतीचर्मेषु पराङ्मुखा
नां यावंतो दोषास्तावतउपभोगार्थं मुच्चरमाणइत्यर्थः। स्ववानिति नकारस्य रुत्वे न्वान्स्ववांत्वकारे लोपमिति आति
लोपे रयेननकारलोपः संहितायां। रुत्तस्त्राद्वस्यव्यत्ययेनपुंस्त्वं॥२०॥ येते पंथाः। हे सवितर्देव। ते तव ये पंथा मा
र्गाः। अंतरिक्षे सुकृताः। यात्रासाधुं कृतावर्त्तंते। तेइत्यनुदात्तत्वो युष्मदादेशः। पंथान इति प्राप्ते सुपां सुलुगिति जसः सु
कीदृशाः। पूर्व्यासः। पूर्वेषु कालेषु कृताः। पूर्व्याः। अदंता ज्जसेः असुगागमः। अरेणवः नास्ति रेणुर्यत्र। अंतरिक्षे त्वा
दृपांसवः। तेभिः पथिभिः। तैर्मार्गैः आगत्य अद्य नः अस्मान् रक्ष च। पालय। अधि ब्रूहि च। अधि अंगीकृत्य ब्रूहि
एते मदीया इति। अथवा अधि ब्रूहि। मद्भक्ते यधिकाएतदिति॥ अथवा। अधि ब्रूहि। त्रिद्रूय। यद्धितं पथ्यं तत्
कीदृशैः पथिभिः। सुगेभिः सुगैः। सुदुरोरधिकरणे [illegible] गमेर्डः। भिसऐसादेशाभावश्छांदसः। सुखेन गम्यते येषु ते
सुगाः। तैः। अन्तपानिप्रकृतौ भिसइत्यर्थः। पूर्व्यासइत्यत्र। [illegible] कृतमिनयोश्चेति यप्रत्ययः। यद्वा। ये पंथानस्तैः
विधात्राकृताः संमिलेनैस्मान्नयेति शेषः। अद्य रक्ष [illegible] जना। अन्यत्समानं॥२१॥ उभापिबतं। आश्विन्यसि
तृचः। एका गायत्री द्वे त्रिष्टुभौ। हे अश्विना अश्विनौ। उभा [illegible] उभावपि युवामपि बतं सोममिति शेषः। उभा। द्वौ युवां
नोऽस्मभ्यं मनूनां शर्म सुखं यच्छतं। दत्तं। काभिः सह। अविद्रियाभिः अविदीर्णाभिः रखंडिताभिरूतिभिः रक्षणैः
पालनैः सह। सुखं दत्तं पालयतं चेत्यर्थः। उभा। अश्विनेत्यत्र विभक्तेराकारः। विदीर्यंतीति विद्रियाः। तादृशानि
अविद्रियाः। दृ विदारणे। औणादिकइ यक् प्रत्ययः॥२२॥ अप्नस्वतीमश्विना। हे अश्विना अश्विनौ। हे दस्रा
दस्रौ नीयो। हे वृषणा। वर्षितारौ सेक्तारौ युवां नो अस्मे अस्माकं वाचं अप्नस्वतीं। अप्न इति कर्म नाम। कर्मवतीं
युक्तां कुरुतं। तथा नोस्माकं मनीषां मनन साधनां बुद्धिं अप्नस्वतीमेव कुरुतं। मनसा वाचा च यथा यज्ञे व्यापार्या

॥१७२॥

॥१७२॥

३२

नमसा कुरुत हि सर्वः। यतोऽहं वां युवां निह्वये आह्वयामि। किंनिमित्तं। अस्य सेस्य मार्गेण गते अन्ने। अन्ननिमित्तं।
घृतादिगतं घृते त्रवं वा रसे। नघ संअघ संस्मिन्। घृतादिगतं कर्मण्यन्न भवती सेवलक्ष्यते। घृतमन्यं वा मत्य
न्याय अन्नागम्नतामुपलक्षकं। किंच। वाजसातौ वाजानाम् अन्नानां सातिः संभजनं यस्मिन् तत्र वाजसातिर्यज्ञस्तस्मि
न्नोऽस्माकं वेधे वध्ये भवतं। अस्मे इत्यत्र आमः श्रे आदेशः। हतमित्यत्र कर्तेर्बहुलं छंदसीति शपो लुक् लोण्म
ध्यमद्विवचने रूपं। पादादित्वान्न निघातः। वृषणे इत्यत्र। वा षपूर्वस्य निगमे इति उपधा दीर्घाभावः॥ वृ वेद्वस्त्र।
वर्द्धनं वृत्। संपदादि त्वा क्विप्। अतो कप्रत्ययः॥२३॥ द्युभिः अक्तुभिः। हे मित्रावरुणौ नः युवां द्युभिः दिवसैः अक्तु
भिः रात्रिभिः सप्तम्यर्थे तृतीया। दिवसेषु रात्रिषु च। अहोरात्रं। अस्मान् परिपातं। केः। सोमनगोभिः। सोमत्रेगो
ऽगदृति चनताम। त्रातेन धनैः। स्वार्थेऽण्। हे द्रुगसि धनैस्य स्योति पूर्वस्य वृद्धिः। किंभूतैः। अरिष्टेभिः। अ
रैः अनुपीर्हसितैः। अखंडितैर्धनैरस्मान् रक्षतमित्यर्थः। यद्वा सोमनगोरैश्वर्ये रसः। नहोऽत्र रात्रिं परिपात

सरित = किंच। मित्रः वरुणः अदितिः सिंधुः समुद्रः पृथिवी उत अपि च। द्यौः द्युदेवता। एते देवाः नोऽस्माकं तत्त्ने
रक्षणं मामहंतां पूजयंतां। अनुमन्यंतामित्यर्थः। द्युरिति अहर्नाम। अक्तुरिति रात्रेः। मामहंतामित्यत्र बहुलं छं
दसीति शपः श्लुः। मूलविति द्वित्वं। अभ्यासस्य दीर्घश्छांदसः॥२४॥ आ रात्रि। रात्रिदेवतापथ्याबृहती। हे रात्रि
पयालया। पार्थिवः रजः रज इति लोकनाम। आख्यातं। व्याख्याता पूर्वाध्याये त्वती यानेनाके॥२५॥ ॥ प्रथमोऽनु॥ ॥ ४९२
पृथिवीसंबंधी लोकः पितुः द्युलोकस्य धामभिः स्थानैः सह आ अप्रायि। समंतात् पूरितं। द्यौः पितेति श्रुतेः।
पितृशब्दो द्युलोकार्थः। पार्थिव। दिवो द्युलोकस्य सदांसि स्थानानि बृहती महती त्वं वितिष्ठसे आक्रमसे। व्या
प्नोषि। तस्याः त्वेषं तमः आवर्त्तते प्रवर्त्तते। कीदृशं तमः। त्वेषं दीप्तं। महाप्रागल्भ्यमित्यर्थः। अप्रायि इत्यत्र। प्रा
पूरणे अस्मात् कर्मणि लुङि चिणि रूपं। यद्वा आत्रादो निरीक्षार्थः। यामालेप्यस्य तमः निवर्त्तते तां स्तुमः इति शेषः॥१॥

उपस्थाल। उषोदेवस्यो भिणक् । हेउष ः। हेवाजिनी वति अन्नवति। प्रगेवा। अस्मे स्यंतच्चित्रं न्यायनीयं आमुर्य कारि। मघवी
यंयन आ ऊर आहर। देहि। हय्यहो प्रश्यं दसि येन लब्धेन धनेन वयं तोकं पुत्रं तनयं पौत्रं च सर्वं सेतान वर्ग
महे पुष्कीमः। दधाते ः रूपोलुंकि रूपं॥२॥ प्रातर्जितं भगं। जगद्देवस्यास्त्रिष्टुप्। वयं तं भगं अदितेः पुत्रं हवेम। आ ह्वयामः
हे तं। प्रातर्जितं। प्रातः प्रातः कालेमं देहान् जनयतीति प्रातर्जित् तं। उग्रं उत्कृष्टं। अदितेः पुत्रं तं के। यो विधर्त्ता
विविधं जगतो धारयिता। आ ध्रश्चित्। विरुद्धार्थे। ध्रेत सौ न ध्यायति। न त्यजती साधः। नञ्जोदीर्घ स्छादसः
यद्व। आसमंताद्ध्ये आध्रः। अध्र एव वा ध्र इति वा। स्वार्थे तद्धितः। आध्रोपि अल्पोपि दरिद्रोपि यं भगं मं
नस्व। अर्था द्दयमिस्याह। सूर्ये। उदिते सतिया चन्दिना ... कि कुर्वन् मन्यमानः। पूजयन् स्वार्थे

मन्यति सर्चने कुर्मा। तथा। तुरश्चित्। आ तुरोपि यं भगं मन्यमानो ... उदये ... स्त्वि साह॥ दिवसे तस्य सुरवे
रोगिणो हि रात्रिः कष्टेन याति। यद्वा तुरो यमः। सोहि प्राणिमारणाय ... यति। तथा राजाद्
नापियं भगं भक्षी साह। तदुदये हि राज्ञां व्यवहार दर्शनादिना सर्वे ... भवति। नेत्री ... ततः स्तापि
लभि मध्यमे रूपं छादसं॥३॥ प्रूषं तव। दिपच्छ देवस्य गायत्री विष्णुः। हेपूषन्। पुष्णाति सर्वमिति पूषा। तव व्र
यतां। तव व्रत कर्मणि वर्त्तमाना वयं कदाचन कदापि न रिष्येम। न विनश्येम। खदन्त केपयास्वर्वा रिष्टनिर्दूत
पर्वकं सर्वा तीषु प्रास इति भाव ः॥ किंच। इहकर्मणि ते तव स्तोतारः स्तुतिकर्तारः। स्म सिस्मः। तवास्मः दृदं ते ॥१७३॥
मसीति कारस्थाने दसः॥४॥ पथस्पथः परिपतिं। यः पथश्च अर्के मर्के मंडलेमंत्रे अन्ने वाजं भ्यानेष्टु। अग्नि आ
॥१७२ चेति अग्निन। शिष्यप्रथ्यः। मंत्र व्याप्तिस्तद्वायते। अन्नं व्याप्तिर्वै गो कृतिः। स्त्रीद्वयः। कामेन। कामेन न अग्नि ३३,
दनं निमित्तेन वचस्या वेदवचसा कृतेः अभिमुखीकृतः। चित्रतो यदेवा ः॥ किं कृतवंते। पथस्पथः मक्ष्मार्गा
मार्गस्य मार्गा इति सर्वाप्सयो रितिद्दित्वं। समासश्च। सर्वेषां मार्गाणां परिपतिं अधिपतिं प्रदत्रीकलेन। ...

हे

।ब्राह्मणं। किंच स्य धर्मा धर्ममार्गप्रदर्शकत्वादन्नस्यापि तत्साधनत्वात्। सप्तम्या। नोऽस्माकं पुरु घः। पुरुधं न्नोवं
रंधं मीति पुरुध। अत्र वर्णनाश्त। पृषोदरादित्वात्। लोकनाशकरामिप्सा चतुर्णिरासत्। ददालुः लिंगं व्यत्ययः।
किं भूता इरुधः। चंद्रा ग्रा। चंद्र आह्लादकं अग्रे प्रात्रेयासोनाः। साधनेषु लुठितेषु इर्वदिरूपा हृदि न्नेवं
ति। तथास्य प्रथा। धियंधियां सर्वाणि कर्माणि इता। तानि वा प्रसीषधाति प्रकर्षेण साधयतु। एवत्वमार्थे
पं धियं मित्सत्राश्विवी प्रायों दृतिं। आनडिति। व्यासिकर्मसु दृष्टा स्वयं पठितः। सीसधाती सत्र साधसे सिद्धे
त्राप। स्तु प्रशंसः। हितं। लिटो ऽडाल् टो। रूआदीनां दीर्घो ऽभ्यासस्येस्य न्यासर्दीर्घः। उपधक्रस्वआर्षः॥५
त्रीणि पदा। देवेष्णा वो गण्पत्रयो। द्व्यरिकवाक्यत्वे। यो विष्णुः। यतः। त्रीणि पदा पदानि अग्निवायुस्सू
र्याण्निरूपाणि त्रयीलक्षणानि वा हृति त्रयात्मकानि वा पदानि विचक्रमे निक्रान्तवान्। किं भूतः। गोपा गो
पायती विगोपाः। देवमनुष्यादिरक्षकः। अदाभ्यः अनुपहिंस्यः। अतः अस्मात्व पदत्रयात् अन्या देर
पात्। धर्माणि पुण्यकर्माणि धारयन्। विभ्राणः। धर्मस्य शिष्याभिसंधि धाना न्नपुंसकत्वे॥६॥ तद्विप्रासः।
तत्। तस्य विष्णोर्यत्सस्य यत्परमं पदं स्वर्गादि स्थानं विप्रासो विप्राः ज्ञानिनो ब्राह्मणाः समिंधते। णिचो लोपः।
समिंधयंति आत्मनं प्रकाशयंति। कीदृशाः विपन्यवः। विगत पन्यु। संसारव्यवहारो येषां ते। जागृवांसः।
जागरणशीलाः अप्रमत्ताः। ज्ञानकर्मसमुच्चयकारिणः इत्यर्थः। परमात्मपद्धेतु। यो विष्णुस्त्रिविक्रमरूपेण
त्रीणि पदानि त्रिलोकस्थानानि विचक्रमे क्रांतवान्। अतः प्रदत्रयक्रमणात्। धर्माणि इन्द्रादि देवानां कर्मा
णि बलेः पुण्यानि व धारयन्नोषयन्सन्। वर्तते। तस्य विष्णोः परमं पदं पद्यत इति पदं। तुरीयं स्वरूपं विप्रा
सः ज्ञानिनः समिंधते समिंधयंति आत्मानं प्रापयंति। परमनुज्ञावती त्यर्थः। समानमन्यत्॥७॥ एतव

ती भुवनानां । जगती द्यावापृथिवी देवता । द्यावापृथिवी द्यावापृथिव्यौ वरुणस्यादित्यस्य । तमोनिवारणाद्वरुणः ।
तस्य । धर्मणा धारुणेन धारणगुणेन स्कभिते । विशेषणस्तंभिते । स्कभ्नोतिर्दृढीकरणार्थः । वरुणेन
स्वशक्त्या दृढीकृते इत्यर्थः । किंभूते । घृतवती । उदकवत्यौ । घृतमित्युदकनाम । भुवनानां भूतजातानां अभिश्रि
या । अभिश्रियौ । आश्रयणीये । अभिश्रीयेते ते अभिश्रियौ । कर्मणि क्विप् । विभक्तेराकारः । उर्वी उर्व्यौ । विस्तीर्णे ।
पृथ्वी पृथ्व्यौ । पृथुले । आयामविस्तराभ्यां महत्वं विशेषणद्वयेनोक्तं । मधुदुघे । मधु उदकं तस्य दोग्ध्र्यौ । सु
पेशसा । सुरूपे । अजरे जरारहिते । भूरिरेतसा । भूरि रेतो ययोस्ते । बहुरेतस्के । सर्वभूतानां हि रेतांसि ताभ्या
मेवोत्पद्यंते । सर्वत्र विभक्तेराकारः ॥ २ ॥ येनः ॥ जगती लिंगोक्तदेवत्या । येनोस्माकं सपत्नाः शत्रवः संति । ते अ
पक्रवंतु । अपगतवीर्या भवंतु । पराजयं यांत्वित्यर्थः । कुत इत्यत आह । यतो वयं तान्सपत्नान् इंद्राग्निभ्यां सहिता
अवबाधामहे । इंद्राग्नि बलेन नाशयामः । किंच । वसवो रुद्रा एकादश । आदित्या द्वादश एते । मा मां एता
दृशं भक्रन् । कुर्वंतु । लकारविकरणव्यत्ययः । कीदृशं । उपरिस्पृशं । उपरिस्पृशतीत्युपरिस्पृक् तं । उच्चस्था
ने स्थितं । उग्रं उत्कृष्टं । चेत्तारं । ज्ञातारं । चिती संज्ञाने । तृच् । अधिराजं । अधिकश्चासौ राजा च अधिराजस्तं ।
सर्वोत्तमं कुर्वंत्वित्यर्थः ॥ ९ ॥ आनासत्या । अश्विदेवत्या जगती । हे नासत्या । नासत्यौ । हे अश्विनौ । त्रिभिः एका
दशैः त्रिगुणैरेकादशभिस्त्रयस्त्रिंशत्संख्यैः देवेभिर्देवैः सह इह स्थाने । मधुपेयं । मधोर्मधुरस्य सोमस्य
पेयं पानं प्रतिलक्ष्य वा आयात आगच्छतं । किंच । आयुः प्रतारिष्टं प्रवर्धयतं । प्रतरिर्वर्धनार्थः । रपांसि । र
प इति पापनाम । पापानि निर्मृक्षतं । मृक्षेपूरुषं(?) । भिः शोधयतं । नाशयतमित्यर्थः । द्वेषः दौर्भाग्यं से
धतं । सिषुग सो । गमयतं । नाशयतमित्यर्थः । सचाभुवा । भवतं । सचाइत्यव्ययं सहार्थे । सचा सहभवत

॥१७४॥

इतिसचाभुवो। भवतेः क्विप्। सर्वकार्येषु समर्थो भवंत। अष्टौ वसव इत्यादिना त्रयस्त्रिंशद्देवगणिता॥ तारिष्ठभिस
त्रलरेतोर्लुङिमध्यमद्विवचनं। बहुलं छंदस्यमाङ्योगेपी त्यड्‌भावः। मन्तेतमिसत्र। रुट्ङः लोट्। लेटोडाटौ। सिब्बहु
लंलेटीतिसिप्। तस्यस्थविधिपातांतं ता मइतिव्यत्ययेन थसस्तमित्यादेशः। १०। एषवः। मारुतीत्रिष्टुप्। हेम
रुतः। कारोः। करोतीतिकारुस्तस्यकर्तुर्यजमानस्य। एषः स्तोमः। इयंचगीः। सखाचप्रियाचवो युष्मदर्थं
वर्ततइतिशेषः। कीदृशस्यकारोः। मांदार्यस्य। मांममेतिस्वस्वामित्वेवेधंधदारयतीतिमांदार्यः तस्य। वी
तरागस्येत्यर्थः। यद्वामांदारयतीत्येवंयः श्रूयमाणोप्रस्यमादर्शातिसमांदार्यः। मंदारः कल्पवृक्षस्तत्तु
ल्योमांदार्यः। तस्येतिवा। अर्थिकामपूरकस्येत्यर्थः। मान्यस्यमानार्हस्या किंच हेमरुतः यूयं। इषा अन्नेन
निमित्तेन। आ। सम्पवृयासीष्ट। आगच्छत। किमर्थं। वयां। वयसा। आमिटि लोपोनुङ्‌भावश्चआर्षः। बाल्य
यौवनस्थाविराणां वयसां संबंधिन्येतन्वे। स्मच्छरीराय। सर्वदात्रारीरस्थित्यर्थमित्यर्थः। किंच। इषं अन्नं
वृजनं बलं च वयं विद्यामलभेमहि। पादपूरणे। नान्निपातः। यद्वा वयां। वयां दीर्घश्छांदसः। तन्वे शरीराय।
शरीरस्थित्यर्थंइषंवृजनं विद्यामेतियोजना॥ किंभूतमिषंवृजनंच। जीरदानुं। वजीवदानुं। जीवयतीतिजी
र दानुस्तं। जीवयतेरौणादिको ऽरदानुप्रत्ययः। लोपोव्योर्वलीति वलोपः। छांदसो विवलोपः। जीवनदातृबलम
न्नंचवयंप्राप्स्यामेतिप्रार्थना॥११॥ सहस्तोमाः सहछंदसः। ऋषिस्त्वष्टिप्रतिपदिका त्रिष्टुप्। देव्याः देवस्य
प्रजापतेः इमे देव्याः सप्तऋषयः। प्रजापतिप्राणानिर्मातिनो भरद्वाजकश्यपौ। गौतमात्रिवसिष्ठविश्वामि
त्रजमदग्निसंज्ञाः अन्या। ते भिरे। अनुसृष्टवंतः। सृष्टिमंतामितिशेषः। किंकृत्वा पूर्वेषां पंथांपंथान

मनुदन्त्य। पूर्वकल्पोसन्नानामवस्थिताधिकारिणां मार्गं वेद दिग्भिः विलोक्य। पूर्वौ कल्पोसन्नेर्मूर्तिः [illegible]
र्थ धास्तथ्यंत धास्तथ्यंवंतत्रस्यर्थः। सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयदिति श्रुतेः। कथमिव। रथ्योनर
श्मीन्। न कारउपमार्थः। रथं वाहयतीति रथ्यः सारथिः। यथा इहदन्त्रा प्रास्यर्थं प्रथमं रश्मीनुग्रयहन्ना
लभते स्वन्नातिस्वजतिवा। तथोते पि स्वष्टवंतः। यद्वा रथं वहतीति रथ्यः अश्वः रश्मीन् न। पूर्वं सारथिना
प्रेरितान् प्र ऽग्रहान नुसृत्य यथा गच्छतितथेति। किं भूताः। सदस्तोमाः। स्तोमसहिताः। सहछंदसः।
छंदोभिर्गायत्र्यादिभिः सहिताः। आवृतः। अत्र सहत्रा बोध्याहार्यः। आद इव्द कर्मेतिकर्त्तव्यता
चनः। सहावृतः कर्मेतिकर्त्तव्यता ज्ञानसहिताः। श्रद्धा ज्ञानपूर्वं कर्मानुष्ठातार इत्यर्थः। सहप्रमाः। प्रमा
वेदार्थोतोस्त्यर्था तया सहिताः सहप्रमाः। धीराः। धीमंतो धैर्यवंतोवा। मत्वर्थीयोरप्रत्ययः। ५२॥ आयुष्यं
वर्चस्यं। तिस्र उष्णिक् कुरिद्धकुरी विस्तुरोदद्वहरा। हिरण्यस्तुतिः। इदं हिरण्यं कनकं जैत्राय जयाय मां आ
मेव। आविशताल्। आविशतु। मयि सर्वदा तिष्ठतु। कीदृशं। आयुष्यं। आयुषे हितं। अमृतं वै हिरण्यमिति
श्रुतेः। वर्चस्यं वर्चसे तेजसे हितं। रायो धनाग मस्य पोषं पोषयितृ। वर्द्धकं। औद्भिदं। उद्भिनत्तीति उद्भित्
उद्भिदेव औद्भिदं। उत्कृष्टं। शत्रुनाशकं। वर्चस्वत्। वर्चसंस्त नाम। अन्तवत्। अभिलषितान्न साधनं॥
॥१७५॥ ॥५३॥ न तत्। रक्षांसि पिशाचा वाध्यतत्तद्धिरण्यं न तरंति नाभिभवंति। नाति क्रामंतीत्यर्थः। कुत इत्यत आह।
हि। यस्मात् एतत् हिरण्यं देवानां प्रथमजं ओजः। प्रथमोत्पन्नं देवानां तेजएवेद। अतो यो हिरण्य
दाक्षायणं कृत्वा बिभर्ति। दाक्षायणशब्दो लंकारार्थः। दक्षिणार्हं वा। स देवेषु देवलोकेषु दीर्घं आयुः कृ

॥१७५॥

२५

श्रुते। देवलोके चिरं वसती त्यर्थः। सच मनुष्येषु मनुष्यलोकेषु स्वं आयुर्दीर्घं कृणुते मनुष्यायुरतिक्रम्य बहुकालं
जीवतीत्यर्थः। तरंतीतद्धधाय्यो ज्यं ॥१४॥ यदा बध्नन्। दाक्षायणाः। दक्षस्यापत्यानि। तऊ दित्या स्प के। देह
ज्ञो स[न्ना] ब्राह्मणाः यत् हिरण्यं शतानीकाय राज्ञे आबध्नन्। बबंधुः। शतानीकानाम नेकसैन्यानां [illegible] वास्य
थं बबंधुः। कीदृशाः दाक्षायणाः। सुमनस्यमानाः। शोभनं मनं यस्य सः सुमनाः सुमनस्यंतः। सुमनस्यंते इति सुमनस्य
मानाः। मनस्विनो तनं ध्यायंतः। तत् हिरण्यमेम मह्यं आबध्नामि। किमर्थं। शतसुतार दाय। शतं शरद
वत्सरान् जीवनाय। नकेवलं नोत्तनार्थमित्यर्थः। न तु शोभसीति अकाले मृत्युपरिहारस्वोक्तलेतान्। यथा
येन प्रकारेण हिरण्यबंधनात्वेन। आयुष्मान् दीर्घजीवी जरदष्टिः अस्सं आसंपत्स्यासं। तथा [illegible]
किं भूतोहं सुमती जरां प्राप्ता अष्टिः शरीरं यस्य स जरदष्टिः। यद्वा। जरां जरत्वं तद्वृत्तिः जरद [illegible] ष्टिः ॥[illegible]
नोहि। बहुदेवसास्त्रिष्टुप्। उत अपि च। अहिर्बुध्न्यः रुद्रविशेषः शृणोतु नोऽस्माकं वचांसीति शेषः। तथा
अजएकपाद् रुद्रः शृणोतु। पृथिवी च शृणोतु। समुद्रः शृणोतु। देवता [illegible] विश्वेदेवाः ऋतवृधः
त्वा चते। हिर्बुध्न्यादयः अवंतु पालयंतु अस्मान्। किं भूतास्ते। हुतावः च। सत्यवृधः। यज्ञवर्द्धना वा। [illegible]
घृ इतिसस्यवृद्धपेतीदिति श्रुतेः। दीर्घ आर्षः। हुवाना आहूयमानाः। मे मंत्रा मंत्रैरिति विभक्तिव्यत्ययः।
स्तुताः। कविशस्ताः मेधाविभिः प्रशंसिताः ॥१५॥ इमा गिरः। आदित्या देवतास्त्रिष्टुप्। इमा गिरो वाचः [illegible]
कास्तुवा कृत्वा आदित्येभ्यो जुहोमि। स्तुतिलक्षणाः वाणीर्जुहोमि[illegible]। आदित्येभ्यः समर्पयामी
त्यर्थः। किं भूताः गिरः। घृतस्नूः। घृतस्नुवंति स्नवंतीति तथा [illegible]। लुगभावे आर्षः। [illegible]
घृतवन्मधुराः। कीदृशेभ्यः। सनात् इति चिरनाम। चिरकाले राजभ्यः दीप्यमानेभ्यः। नाः मया हूयमाना

गिरः। नोऽस्मदीयाः मित्रः मृणोतु। एवं। अर्यमा। नगः। तुविजातो। बहुजातः। तुवीतिबहुनाम। वृष्णवा वातो वा। सदिवहु
रः प्रजायते। वरुणः दक्षः। अंशश्च। एते सूर्यविशेषाः॥१७॥ सप्त ऋषयः। अध्यात्मवादिनी जगती। समे ऋषयः प्राणाः।
प्राणा वा ऋषयः इति श्रुतेः। सप्तैव ऋषयः। प्राणा इति तैत्तिरीयश्रुतेश्च। त्वक् चक्षुः श्रोत्र रसना घ्राण मनो बुद्धिल
क्षणाः। तैत्तिरीयश्रुतिः स्थानानि प्रायाः शरीरे प्रतिहिताः। सर्वशरीरेषु स्थापिताः धात्रा। त एव सप्त। सदं सदा
सर्वकाले। अप्रमादं। सावधानं पुरुषं रक्षंति। जाग्रदवस्थावस्था रूपा। द्विविषया छावस्यर्सुविषये प्रवर्तयंतीत्य
र्थः। एषो ऽर्थोद्वयादृ प्राजापत्यादेवाश्चासुराश्च ततः कानीयसा एव देवी ज्यायसा असुरास्त एषु लोकेष्व स्पर्ध
न्त ते ह देवा ऊचुर्हंता सुरान्यज्ञ उद्गीथेनात्ययामेति ते ह वाचमूचुस्त्वं न उद्गाय
लोकं। प्रकान्त्रं। तुकुप्रकाशः। विज्ञानात्मनं प्रस्वापः प्राप्नुवंति। तथासो म्य संपन्नो भवतीति छांदोग्यश्रुतेः। कीदृशा स्ते।
आपः। आप्लव्याप्तौ। आप्नुवंति देहमेवस्वापः। बाह्यव्यापारस्मरण्याः। तत्रास्या मन आयां देवो दीप्यमानो प्राणाद्या
नोपरमात्सम्मुखप्राणो वा। जाग्रतः जागरणं कुर्वीते। स्वप्ने तन्नारी रमन्त्रि प्रहस्य सुप्तः सुज्ञानं भिवाक् इति
तिश्रुतेः। कीदृशौ। अत एवास्वप्नजौ। न स्वप्नो निद्रा जायते ययोस्तौ अस्वप्नजौ। स्वापरहितौ। सत्रसदौ। सत्रं
अविनाशिना जीवानां त्राणं रक्षणं सत्रं। तत्र सीदत इति सत्रसदौ। सुप्तजीवरक्षकौ॥१८॥ उत्तिष्ठ॥ नवो ब्रह्मण
स्पतिर्देवता॥ द्वे बृहत्यौ। त्रितीया त्रिष्टुप्। हे ब्रह्मणः वेदस्य वा मुखस्य वा पते पालक। त्वं उत्तिष्ठ। आरव्धकार्ये ते
न उत्थीतव। अस्मत्कार्यं उद्युक्तो भव। यतो वयं देवयंतो देवान्कामयमाना संतः त्वा त्वां ईमहे। याचामहे। आगच्छेति।
इति यी चनार्थः। तथा मरुतः देवाः आगच्छंतु नवं तु ते उपसन्नीपत्रयंतु। आगच्छंतु अनुगच्छंतु। किंभूताः। सुदान
वः शोभनं ददतीति सुदानवः। हे इंद्र। समपि। सचा। सहगमनाय प्राशूः। प्रकर्षेण वेगोद्यो भव देवान्कामयमाने
देवयंतीति। ननु तः रु च्यत्यय। सुप आत्मनः क्यच्। न च्छंदस्यपुत्रस्येति निषेधात्। क्यचि वितीत्वाभावः। अस्मा

॥२७६॥ ॥२७६॥ ३६

ऋस्यादित्सब्धाच्ययोरेवाकारविधानाद् तत्सार्वधातुकयोरिति दीर्घोपि न। ई महदिति। ई गतौ। प्राचा। तेकमेर्म सूपर्हि
तः। दिवादित्वादगतस्यत्रयपनस्त्यादसोलोपः। सुदानवइति। दा अभ्यां नुः। दान्नुर्तोनुरिति। प्रास्तरिसत्र आ
दीर्घोकारस्छांदसः। नवेसत्र छन्दोतस्त्तिङइति संहितायां दीर्घः॥१९॥ प्रन्ननं। ब्रह्मणस्पतिर्नेनेनिश्चितं। उक्थ्यता
स्त्रयोग्यं प्र मंत्रं सूवदति प्रकर्षेणोच्चारयति। यस्मिन् मंत्रे। मित्रः अर्यमा। अन्येदेवाः ओकांसि निवासान् चक्रि
रे। कृतवंतः। सर्वदेवाधारकृतं नास्त्रेपाठं नयं मंत्रं वदि सर्थः॥२०॥ ब्रह्मणस्पतेस्त्वं हे ब्रह्मणस्पते त्वं। यंता। स्त्र
गतो यंताभियेत्। अतः प्रार्थ्यसे। स्त्तस्यास्मदुक्तस्य साधुवचनस्य कर्मणि षष्ठी। सूक्तं बोधि। बुध्यस्व। अ
स्मदुक्ता स्तुतिर्भवता सादरं ज्ञायतामित्यर्थः। किंच। तनयं। अस्मदपत्यं जातं जिन्व प्रीणीहि। यद्ब्राह्मदस्मा। ग
पि। जिन्वतिः प्रीतिकर्मा। अतएव प्रार्थ्यतइत्यत आह। देवाः यत् विश्वं अवंतितत् भद्रं मंगलरूपं भवति। अतस्त्व
दनुगृहीताः सुवीराः शोभनपुत्राः संतो वयं विदथे यज्ञे बृहत् महत्। त्रयीलक्षणं ब्रह्म। वदेम उच्चारयेम। यद्य
लौकिकवाक्योच्चारे प्रायश्चित्तविधानात्। व्याहरेद्वैष्णवं मंत्रं जपेदिति कात्यायनस्मरणात्। अथ चतस्रः के
डिकाः प्रतीकोक्ताः। यइमाविश्वा भुवनानि जुह्वत्। विश्वकर्माविमनाः। योनः पिता। अन्नपतेन्नस्य नोदेहीति ए
ताश्च त्रयज्ञादावध्येतव्याः। अन्यथा प्रतीकग्रहणवैयर्थ्यापातादिति॥२०॥ ॥द्वितीयोनुवाकः॥ ॥इति श्री
म० ता० भाष्ये त्रयस्त्रिंशोध्यायः समाप्तः॥ ॥ ॥ ॥ ॐ नमः॥ अत ऊर्ध्वं पुरुषमेधोद्वावध्यायौ॥ नारायणः
पुरुषोऽपश्यत्। ब्राह्मणराजन्ययोरतिष्ठा कामयोः पुरुषमेधसंज्ञकोयज्ञो भवति। सर्वत् ताभ्यति
कम्यस्थितिरतिष्ठा। अस्य यज्ञस्य चैत्रशुक्लदशम्यामारंभः। अत्र त्रयोविंशतिदीक्षा भवंति। द्वादशोपस
दः। पंचसुत्याइति चत्वारिंशद्दिनैः समाप्यति। अत्र यूपैकादशिनी भवति। एकादशाग्नीषोमीयाः पशवो भ
वंति। तेषां प्रतियूपं मध्यमे वायव्यपशौ पन्द्रः नियोजनं भवति। तत्राद्यस्य अनेन सह ह्रः। तेन देवसवितरिति

॥१७७॥

प्रस्तूयंतिस्म आहुतीराहवनीयेजुहोतीतिकल्पकारः। तत्राद्याचारआयते॥ ॐ ३ देवसवितः॥ त्रिष्टुप्‌छंदः ॥का
सवितृदेवस्याग्यावार्षदृष्टा। हे सवितर्देव। सर्वबुद्धिप्रेरकां तयां भिन्दव। यज्ञंपुरुषमेध्यलक्षणं प्रसुव
प्रवर्त्तय। अंतर्यामी तण्यर्थः सुवतिः। तथाइमंयजमानं गायंतज्जनीयाय। यामानुष्ठानजन्यमेव प्राप्य
सुवप्रेरय। किंच। त्वत्प्रसादाद्दिव्योदिविजनोगंधर्वः गावांरश्मीनांधारयिता। एषादराद्दित्वात्साधुः। केतपूः।
केतशब्दोन्नवाची। अन्नस्यपोलयिता रश्म्यादिना। ईदृशः सूर्यमंडलस्थोदेवः नोऽस्माकं केतमन्नं पुरुष
मेधसाधनत्वेन पुनातु शोधयतु। किंच। वाचस्पतिः। त्रैवलक्षणायाः वाचः पतिः अग्निध्येयः भवान्नो नः
रूचिज्ञोवाचं स्वदतु। आस्वादयतु। यद्वा। हे सवितर्देव यज्ञं प्रसुव। यजतीति मानिनमस्मदनुकूलं कुरु
था। भवानेव भगाय यज्ञपतिं यजमानं प्रसुव। तथाद्दिव्योगंधर्वः केतपूः केतज्ञानं पुनातीति केतपूः नोस्मके
नः केतं ज्ञानं पुनातु। तथा। वाचस्पतिर्बृहस्पतिः नः श्वाचं स्वदतु स्वादुयुक्तां करोतु॥१॥ तत्सवितुः स
वसा गायत्री विश्वामित्रदृष्टा। यः परमेश्वरोंतर्यामी। नोस्माकं धियः धीः ज्ञानेंद्रियाणि कर्मेंद्रियाणि च प्र
दयात्। सत्कर्मानुष्ठानाय प्रकर्षेण प्रेरयति। चुद प्रेरणे। स्मात्लिङ्। लेटोऽडाटौ। इतिस्मादुं। इतश्चलोपः परस्मै
स्मै पदेष्विति तिपइकारलोपः। तस्य देवस्य क्रीडादि गुणविशिष्टस्य सवितुः भर्गः तेजो भ्राजगः सर्वपापा
नां सर्वसंसारस्य च भर्जनसमर्थं तेजः सत्यज्ञानादिवेदांतप्रतिपाद्यं तद्वरेण्यं वरणीयं सर्वैः प्रार्थनीयं स्म
स्ति। तद्धीमहि। ध्यायामः। ध्येचिंतायां। संप्रसादरूपं छांदसं। सवितृत्वाद्यर्थो ब्राह्मणेभिहितः। सविता वै दे
वानां प्रसविता तथो हास्मा एते सवितृप्रसूताः सर्वे कामाः समृध्यंत इति। स्थानस्यामित्रिमारसिद्धवैदो
रवजेया भाले रिवा। १। विश्वानिदेव। सवितृदेवस्यार्षगार्च्च। रम्याबार्षदृष्टा। हे देव सवितः। विश्वानि सर्वा
णि दुरितानि पापानि परासुव। दूरगमय। यद्भद्रं कल्याणमस्ति। तत्कल्याणं नोस्मानभिति आसुव आनय॥३॥

॥१७७॥

२७

विश्वकारं हवामहे ॥ इत्यादि पूर्ववत् । वयं सवितारं हवामहे । आहूयामः । कीदृशं । वसोर्वासयितुर्जगतः स्य नानाविध
स्य राधसो धनस्य विभक्तारं विभज्य दातारं । न्नृचक्षसं । नॄन् चष्टे पश्यतीति नृचक्षास्तं । प्राणिपुण्यपापसाक्षि
णं । आदित्यचंद्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं यमश्च । अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नर
स्य वृत्तमिति स्मृतेः ॥४॥ अतः परं पुरुषमेधे मन्त्रा वा निधीयंत आध्यायसमाप्तेः ॥ अथ प्रतियूपं एकैकमेकाद
शिनं नियुज्य ब्राह्मणादीनष्टाचत्वारिंशत्संख्यान्पुरुषान्स्वकामो यूपायोपसदमि संतानेन षष्ठे यूपे नियुनक्ति ।
इतरेषु यूपेषु एकादशैकादश पुरुषान्वर्णयानरूपेभिः स्थादीन्नियुनक्ति ॥ ब्रह्मणे ब्राह्मणं । तत्र ब्रह्मणे इत्यभि
युनज्मीति प्रयोगेण अग्निष्टे ब्राह्मणप्रथमेन नियुनक्ति । एवमग्रेऽपि प्रयोगः कार्यः । सर्वेषां यूपे एव बंधनं । अत्र च
तुर्थ्यंतं देवतापदं । द्वितीयांतं पुरुषपदमिति बोद्धव्यं ॥१॥ क्षत्राय राजन्यं क्षत्रियं ।२। मरुद्भ्यो वैश्यं ३ तपसे शूद्रं ४
तमसे तस्करं स्तेनं ५ नारकाय वीरहणं नष्टाग्निं स्मरं वा ६ पाप्मने क्लीबं नपुंसकं ७ आक्रयायै अयोगूं । अयःसोगं
तारं ८ कामाय पुंश्चलूं व्यभिचारिणीं ९ अतिक्रुष्टाय मागधं मगधदेशोत्पन्नं । क्षत्रियायां वैश्यात्पुंसो जातं प्र
तिलोमं वा १० ॥५॥ नृत्ताय सूतं ॥ ब्राह्मण्यां क्षत्रियाज्जातः सूतः तं ११ गीताय शैलूषं नटं १२ धर्मा
य सभाचरं सभायां चरतीति तं १३ नरिष्ठायै भीमलं भयंकरं १४ नर्माय रेभं वाक्कर्तारं वाचाटं १५ हसाय कारि
क्रियाशीलं १६ आनंदाय स्त्रीषखं स्त्रियाः सखायं स्त्रैणं १७ प्रमदे प्रकर्षेण माद्यतीति प्रमत् तस्मै । कुमारीपुत्र
कानीनं १८ मेधायै रथकारं माहिष्येण करण्यां जातं १९ धैर्याय तक्षाणं सूत्रधारं २० ॥६॥ तपसे कौलालं । कु
लालपसं २१ मायायै कर्मारं लोहकारं २२ रूपाय मणिकारं । रत्नपरिष्कर्त्तारं २३ शुभे वपं वपे बीजदं
तारं २४ शरव्यायै इषुकर्त्तारं बाणकर्त्तारं २५ हेत्यै धनुष्कारं चापकारिणं २६ कर्मणे ज्याकारं प्रत्यंचाकर्तारं २७
दिष्टाय रज्जुसर्जं रज्जूनां स्रष्टारं निर्मातारं २८ मृत्यवे मृगयुं मृगग्राहं २९ अंतकाय श्वनिनं कुक्कुरनेतारं ३० ।

।।७।। नदीभ्यः पौंजिष्टं। पुंजिष्टं सज्जः सुल्कसस्तं दण्स्तं। ३१ ऋक्षीकाभ्यो नैषादं निषादपुत्रं। ३२ पुरुषव्याघ्राय दुर्मदं उन्म
त्तं। ३३ गंधर्वाप्सरोभ्यो व्रात्यं सा विनष्टपतितं। ३४ प्रयुग्भ्य उन्मत्तं ३५ सर्पदेवजनेभ्यः अप्रतिपदं अप्रतिपद्यते ज्ञानाली
ति अप्रतिपत्। अनथाविद्यो अप्रतिपत्तं ज्ञातं। ३६ अयेभ्यः कितवं। द्यूतकारं ३७ ईर्यताये अकितवं अद्यूतकारिणं। ३८
पिशाचेभ्यो बिदलकारीं वंशविदारिणीं वंशपात्रकारिणीं ३९ यातुधानेभ्यः कंटकीकारीं। कंटकी कार्मणक्रिया। त
त्कारिणीं। ४०।।८।। ।।प्रथमोनु०।।१।। संधये जारं। उपपतिं। ४१ गेहायोपपतिं व्यभिचारिणं। ४२ आर्त्यै परिवित्तं कु
ष्ठकनिष्ठे पश्चादूढं। ४३ निर्ऋत्यै परिविविदानं अनूढे ज्येष्ठे ऊढवन्तं। ४४ अराध्यै एदिधिषुः पतिं। ज्येष्ठायां पु
त्र्यामनूढायां कनिष्ठा एदिधिषुः तस्याः पतिं। ४५ निष्कृत्यै पेशस्कारीं रूपकर्त्रीं सैरंध्रीं ४६ संज्ञानाय
स्मरकारीं मदनदीप्तिकरीं। ४७ प्रकामोद्याय उपसदं। उपसीदतीत्युपसत् अंतेवासीनं। ४८ एतान् गिनेष्टि निक्
ष्यात्। अथ श्रुतिये पेये। वर्णाय अनुरुधं। अनुरुणद्धि सेनुरुत् अनुरोधिनं। १ बलायोपदां। उपददाती
त्युपदास्तं उपदां उपायनदातारं। २।।१।। उत्सादेभ्यः कुब्जं। वक्रांगं। ३ प्रमुदे वामनं ह्रस्वांगं ४ द्वार्भ्यः स्त्रामं स
र्वदा जलक्लिन्ननेत्रं ५ स्वप्नाय अंधं नेत्रहीनं। ६ अधर्माय बधिरं ७ पवित्राय भिषजं वैद्यं ८ प्रज्ञानाय नक्
षत्रदर्शं। नक्षत्राणि दर्शयतीति तं गणकं ९ आशिक्षायै प्रश्निनं प्रश्नवंतं कुतूहलिप्रष्टारं। १० उपशि
क्षायै अभिप्रश्निनं प्रतिप्रश्नवंतं। ११ अधर्मल्तीये। मर्यादायै प्रश्नविवाकं। कृतान् प्रश्नान्यो विवेचयति तं। १।। ।।१७८।।

।।१७८।।

।२।। ऋर्मेभ्यो हस्तिपं। गजपालकं। २ जवायाश्वपं तुरगपालकं। ३ पुष्ट्यै गोपालं धेनुपालं। ४ वीर्याय अवि
पालं मेषपालं। ५ तेजसे अजपालं ६ इरायै कीनाशं कर्षकं। कीनाशः कर्षुकः कथ मेद्दसन्निधाने। ७ कीला
लाय सुराकारं मद्यकारिणं। ८ भद्राय गृहपं गृहपालकं सेवकं। ९ श्रेयसे वित्तधं वित्तं दधातीति वित्त

३९

घसं घनघर्त्तारं १० आध्यच्छायानुकर्त्तारं सारथ्यनुसारिणं ॥ ११ ॥ ३ ॥ अथ चतुर्थरूपे । ज्ञायेद्दार्वीहारं । का क्षुन्ना
म्राहर्त्तारं । १ ग्रसाये अग्न्येधं । अग्निं एधयतीति तं । अग्नेर्वर्द्धकं । २ ब्रध्नस्य विष्टपाय । सूर्यलोकाय अभिषेक्ता
रं । अभिषेककर्त्तारं । ३ वर्षिष्ठायनाकाय उलूखाय स्वर्गायपरिवेष्टारं परिवेषणकर्त्तारं ४ देवलोकाय पेशितारं ।
पिशा अवयवे पिंशतीति पेशितातं । अतिमाधवपवकर्त्तारं । ५ भूमि लोकाय प्रकरितारं । कृषिक्षेपे । विक्षेप्ता
रं । ६ सर्वेभ्यो लोकेभ्य उपसेक्तारं उपसेचनकर्त्तारं । ७ अवऋत्यै वधाय उपमन्थितारं उपमंथनकर्त्तारं । ८ मे
धाय वासः पल्पूलीं वासःप्रक्षालनकर्त्रीं । पल्पूलप्रक्षालनछेदनयोः । ९ प्रकामाय रजयित्रीं वस्त्राणां रं
गकारिणीं नारीं ॥ १० ॥ ४ ॥ ॥ द्वितीयानु० ॥ ॥ ऋतये स्तेनहृदयं । स्तेनस्येव हृदयं यस्य स स्तेनहृदयस्तं ११ अ
थ पंचमरूपे । वैरहत्याय पिशुनं । परवृत्तसूचकं । १ विविक्त्यै क्षत्तारं प्रतीहारं २ औपद्रष्ट्र्यायानुक्षत्तारं प्रती
हारसेवकं । ३ बलायानुचरं सेवकं ४ भूम्ने परिष्कंदं परितः स्कंदति रतः सिंचतीति तं । ५ प्रियाय प्रियवादिनं ।
मधुरभाषिणं ६ अरिष्ट्यै अश्वसादं । अश्वारोहं । ७ स्वर्गाय लोकाय भागदुघं । भागं दुग्धे स भागदुघस्तं । वि
भागप्रदं । ८ वर्षिष्ठायनाकाय परिवेष्टारं ९ ॥ ५ ॥ ॥ तृतीयानु० ॥ ॥ मन्यवे अयस्तापं लोहतापकं । १० क्रोधाय नि
सरं नितरां सर्त्तारं ११ अथ षष्ठेरूपे । योगाय योक्तारं योगकर्त्तारं १ शोकायाभिसर्त्तारं संमुखमागमन
कर्त्रीं तं । २ क्षेमाय विमोक्तारं विमोचनकर्त्तारं ३ उत्कूलनिकूलेभ्यस्त्रिष्ठिनं । त्रिषु तिष्ठतीति त्रिष्ठी तं । विघ्नादि
नयकर्त्री लर्वतं । विघ्नातपो वृत्तं वंतं वा । ४ वपुषे मानस्कृतं मनस्वाया अभिमानस्य वा कर्त्तारं । सगाग मन्दार
सः । ५ शीलाय आंजनीकारीं अंजनविधाक कर्त्रीं कन्यां । ६ निर्ऋत्यै कोशकारीं । खड्गादीनामावरणं कोशः स्तकां

हिणी स्त्रियं ७ यमाया। अस्त्री। न स्त्रते इस सरूस्ताविंध्यामिसर्थः। ८॥१॥ यमाययमस्त्रं। युग्मप्रसविन्त्री। ९ अधर्व
न्योऽकतोकां। तोकं पुत्रः। न विद्यंते ऽपत्यानि यस्याः सा ऽवतोकाता। मृतप्रजो। अवोपसर्गो निषेधार्थः। १०।
संवत्सरायपर्याप्तिणी। पर्यायो ऽनुक्रमस्तद्वती। वंदयाघनुक्रमवती। ११ अथ सप्तमे। परिवत्सरायविज्ञा
तां। अवस्तृतां। १ दूदावत्सरायातीत्सरं। अस्यंतं कुलटां। अस्यंत एति इतस्ततोगच्छती सतीत्वरी तां। अतिप्र
वादिणः धृरप्रांदि द्वाणिति ङीप्। २ इद्वत्सरायातिघाद्वरी। अतिस्कंदति स्रवति रतइति अतिस्कंदरी। अ
तिरतः स्त्रवां। स्कंदे वनंतात्डी पूरेफो। ३ वत्सरायविजर्जरां। शिथिलत्वारीरां। ४। संवत्सरायपलिक्नी।
सरो
म्बतकेत्रां। ५। स्ततकुर्ज्योऽजिनसंधं। दूषणचर्मसंधातारं। ६ साध्येभ्यश्चर्मम्लं। चर्मम्नं दुःखकरं ७॥२॥ सरो
भ्यो धैवरं। कैवर्तोपसं। ८ उपस्थावराभ्यो दान्नां। धीवरं। केवर्तो दात्रं। धीवरा विस्तारिणि धानाल। ९ वैदांता
भ्यो बैदं। क्षिंदो निषादस्तदपसं १० नड्कलाभ्यः क्रोष्टकलं। मत्स्यजीविनं। रज्जुकलामत्स्याः स्तोजीवतीति रोधक
लस्त्रं। ११ अथाष्टमेयूपे। पारायमार्गारिं। मार्गो रपत्यं मार्गारिस्तं। १॥ अवरायकेवर्तं। २ तीर्थेभ्य आंदं। अ
दिबंधने। अंदती सांदस्तं। बंधनकर्तारं। ३ विषमेभ्यो मैनालं। अलवारणे। अलति मीनान्नालेनवा
रयतीति मीनालस्तदपसं। ४। स्वनेभ्यः पर्णकं। त्रिलं। पगुहाभ्यः कितरातं। ६ सानुभ्यो जंतकं। जंभि नाश
ने। जंभयतीति जंभस्तं हिंसकं। ७ पर्वतेभ्यः किंपूरुषं। कुत्सितकर्माणं। पुरुषो ऽवसाने इति प्राति त्राणं। १० तुला
तदर्थः। ८॥५॥ बीभत्सायै पौल्कसं। पुल्कसापत्यं। ९ वर्णायहिरण्यकारं। स्वर्णाभरणकर्तारं। १० तुला
खेवाणिजं। वणिजोऽपत्यं। ११ अथ नवमे यूपे। पश्चाद्दोषाय ग्लाधिनं। ग्लेहर्षक्षये। अहृष्टं। १ विश्वेभ्यो भूतेभ्यः

॥१२९॥

सिध्माल्नं। सिध्माख्यरोगवंतं। रोमत्वर्थीयः। तस्य लत्वं छांदसं। २ ह्रियै आगरणं। आगरूकं ३ अभूत्यै स्वपनं
स्वपालुं। ४ आर्त्यै जनवादिनं जनापवादकर्त्तारं। ५ व्यृध्यै अपगल्भं अप्रगल्भं ६ संशराय प्रछिदं प्रछेदन
कर्त्तारं। ७॥४॥ अक्षराजाय कितवं। धूर्त्तं। ८ कृताय आदिनवदर्शं। आदिनवो दोषः। तं पश्यतीति तथा तं। दोष
आदिनवो मत इति कोशात्। ९ त्रेतायै कल्पिनं कल्पकं। १० द्वापराय अधिकल्पिनं अधिककल्पनाकर्त्तारं। ११
अथ द्वादशे यूपे। आस्कंदाय सभास्थाणुं सभायां स्थिरं। १ मृत्यवे गोव्यछं। गाः विविधं अछतीति गोव्यछस्तं।
अछगतौ। गोनुगामिनं। २ अंतकाय गोघातं गवां हंतारं। ३ क्षुधे यो गां विकृंतंतं भिक्षमाणं उपतिष्ठति
यः पुमान् गां विकृंतंतं छिंदंतं भिक्षमाणो याचमानः सन्नुपतिष्ठति। तं याचितारं क्षुधे देवतायै आलभेत ४
दुष्कृताय चरकाचार्यं चरकाणां तीर्थचारिणां गुरुं। ५ पाप्मने सैलगं सैलगो दुष्टस्तद्रूपस्तं। ६॥५॥ [illegible]
नु०॥ ॥ प्रतिश्रुत्काया अर्त्तनं। दुःखिनं। ७ घोषाय भषं जल्पकं। ८ अंताय बहुवादिनं वाचालं। ९ अनंताय मू
कं। वाग्विकलं। १० शब्दाय आडंबराघातं। आडंबरं आहंतीति तं। कोलाहलकर्त्तारं। ११ अथैकादशे यूपे।
महसे वीणावादं वीणावादकर्त्तारं। १ क्रोशाय तूणवध्मं। तूणवं वाद्यविशेषं धमति शब्दयतीति तूणव
ध्मस्तं। ध्मा शब्दाग्निसंयोगयोः। अस्मादच्। २ अवरस्पराय शंखध्मं। शंखवादकं। ३ वनाय वनपं व
नपालकं ४ अन्यतोरण्याय दावपं। वनवह्निपालकं। ५।१॥ नर्माय पुंश्चलूं॥ दुष्टनारीं ६ हसाय कारिं क्रिया
शीलं। ७ यादसे शाबल्यां शबलः कर्बुरवर्णस्तद्रूपस्य कुलां स्त्रियं। ८ ग्रामण्यं ग्रामनेतारं ९ गणकं ज्यो
तिर्विदं १० अभिक्रोशकं निंदकं ११ तानेतान् ग्रामण्यादीन् हसे देवतायै जुष्टं नियुञ्ज्मी सैकादशो यू

प आलभते। एवं प्रीतरूपं एकादश स्वेकादशसु नियुक्तेषु सत्सु ये धिका अवशिष्टास्तान ध्यायसमाप्तिपर्यंतो
द्वितीयाश्रितरूपेनियुनक्ति। वीणावादं पाणिघ्नमित्यादीन् षड्विंशतिं। पूर्वं नियुक्ताः एकादशावर्तते एवं च स
र्वे मिलिताः सप्तत्रिंशत् द्वितीयरूपे नियुज्यंते। षड्विंशतिमाह। वीणावादं। पाणिघ्नं हस्ततलवादकं तूणव
ध्मं तान्त्रीन्त्वलनाय आलभते। ३ आनंदाय तलवं वेगाति गं [illegible] ध्वनेर्हिंसा। तलहस्तादि तलवादि तिहंति
नादमुखेस तलं वस्तं वाघवादकं। ४॥२॥ अग्नये पीवानं। स्थूलं ५ पृथिव्ये पीठसर्पिणं पीठेनासनेन सर्पति गच्छ
ति सर्पी १० सर्पीतं। पंगु ६ वायवे चांडालं चंडालकर्माणं ७ अंतरिक्षाय वंशनर्तिनं। वंशोनर्तनशीलं। चदि
वे खलतिं। अलोमशं शिरस्के खल्वाटं ९ सूर्याय हर्यक्षं हरितनेत्रं १० नक्षत्रेभ्यः किर्मिरं कर्बुरवर्णं ११
चंद्रमसे किलासं सिध्मरोगवंतं १२ अह्ने शुक्लं शुक्लवर्णं पिंगाक्षं पिंगलनेत्रं १३ रात्र्यै कृष्णं पिंगाक्षं १४॥३॥ अ
ष्टौ विरूपान् [illegible] नाल [illegible] ते नियुक्ते। तानाह
थैतानष्टौ। अथानंतरं एतान्वक्ष्यमाणान् अष्टौ विरूपान् परस्परं विरुद्धरूपान् [illegible]
अतिशुक्लं। अत्यंतशुक्लवर्णं १५ अतिकृष्णं १६ अतिदीर्घं १७ अति [illegible] ह्रस्वं १८ अतिस्थूलं १९ अति [illegible] २० अ
तिकृशं। अत्यंतरोमशं २१ अतिलोमशं सर्वगात्रेष्वपि रोमाणं २२ अतिशुक्लादयो [illegible] अशूद्राः अब्राह्मणाः
॥१२०॥ णाः शूद्र ब्राह्मणव्यतिरिक्ता भवंति अष्टावपि प्राजापत्याः प्रजापतिदेवत्याः। अष्टौ उत्तमाजालि [illegible] ॥१२०॥
प्रजापतिदेवत्याः भवंतीति श्रुतेः। अष्टसु जातेषु नियमात्सर्वेष्वेषु जातेरनियमइतिगम्यते। तथा [illegible]
यः पूर्वेनि[illegible] २३ पुंश्चलीः स्वली २४ क्लीबः २५ भिंदः २६ ते एते चत्वारोपि अशूद्रा अब्राह्मणाः क्षत्रियाद्वा
प्राजापत्याः प्रजापतिदेवत्याः द्वितीयरूपेनियोज्याः हितार्थं। एवं सर्वेषां नियोजनानंतर अग्निहोत्रे
मापस्याः प्रजापतिदेवत्याः द्वितीयरूपेनियोज्याः हितार्थं। एवं सर्वेषां
ध्यायं व्याख्यास्यति ॥४॥ ॥ चतुर्थोनुवाकः॥ ॥ इति श्रीम० चतुस्त्रिंशोऽध्यायः समाप्तः॥ ॥ [illegible] ॥

एवं ब्राह्मणादिपशुनियोजनानंतरं कर्त्तव्यं श्रौतानुसारेणोच्यते। नियुक्तान्पुरुषान्सहस्रशीर्षेत्युत्तरे
णानुवाकेन दक्षिणत उपविष्टो ब्रह्मा होतृवदभिष्टौतीति कात्यायनः। होतृवदिति अलिंदेनेन ब्रह्म
[illegible] त्रिर्वचनं कृतानां प्रणवेन संधानं चेति कार्यः। तथा च नियुक्तेषु पशुषु जगद्बीजं पुरुषं
मंत्रैः [illegible] पुष्पादिभिरभ्यर्च्य स्तुवीत। तद्यथा। ॐ सहस्रशीर्षा पुरुष० दशांगुलं १ पुरुष एवेदं० अ
यथा ध्यात्वा गंधपुष्पादिभिरभ्यर्च्य त्रिपादूर्ध्व इत्यादि एवं क्रमेण साध्याः संति देवा इत्यंतेन स्तुत्वा आलंभेन
रोहति २ एतावा० दिवि ३ त्रिपादूर्ध्व ततो ब्राह्मणादिपशूनां पर्यग्निकरणानंतरं इदं ब्रह्मणे इदं क्षत्राय इत्येवं सर्वेषां पशूनां
यथादेवतं प्रोक्षणादिकार्यं। ततः सर्वान् ब्राह्मणादीन् पशून् यूपेभ्यो विमोच्योत्सृजेत्। तत एकादशिनैः पशुभिः संज्ञ
स्वं देवतोद्देशेन यागः कार्यः। तं वनस्पतियागं कृत्वा प्राक् स्विष्टकृतः अध्वर्युराज्यं संस्रुवे सकृद्गृहीतमाज्यं गृहीत्वा
पनादिप्रधानयागो ब्रह्मादिभ्य आहवनीये जुहुयात्। तन्मंत्राः। ॐ ब्रह्मणे स्वाहा। क्षत्राय स्वाहा २ मरुद्भ्यः
गृहीत्वा पुरुषदेवताभ्यो ब्रह्मादिभ्य आहवनीये जुहुयात्। सर्वदेवताभ्यः पंचाशीत्युत्तरशतसंख्याकाभ्यस्तावतीर्घृता
स्वाहा ३ तपसे० ४ तमसे स्वाहा इत्याद्यध्यायोक्ताभ्यः सर्वदेवताभ्यः आत्मन्यग्नीन्समारोप्य
हुतीर्हुत्वा स्विष्टकृदादि उदवसानीयांतं कर्म कृत्वा। यो यज्ञमानो ऽयं ते योनिरिति मंत्रेण आत्मन्यग्नीन्समारोप्य
अग्नेः संनतद्दृष्टिबद्धवेना० नुवाकेन सूर्यमुपस्थाय पश्चादनवलोकयन्नरण्यं गत्वा संन्यसेत्। भगवान्हुपरस्येऽर्थे
रारंभिमनुप्रहस आहवनीये उत्तरारणिमात्मन्यग्नीन्समारोप्यारण्यं व्रजेदिति तिसृणां स्वास्मनोक्तेः। अथ
पूर्वं पुरुषमेधानंतरं ग्राममवासेकास्यान्नदा उदवसानीयांते सायमाहुतिं हुत्वा ऽरण्यो रग्नीसमारोप्योत्तरना
रायणेनार्कमुपस्थाय देवयजनमादाय गृहं व्रजेत्। अथ गृहमेवसारेण। ग्रामगतो निर्मथ्य स्थापयेत्॥ यद्वो
पञ्चानपि कुर्यात् पूर्ववदिस्यमध्यकः पृष्ठे केवलं पुरुषमेधानंतरं संन्यासीरवेति सर्वमा [illegible]
नमतिमपि पंचेन॥ ॥ इति श्रीम० वेदार्थदीपिकायां त्रिंशोऽध्यायः॥ ॥१॥ ॥

७०३ म॥ कात्यायनः॥ नियुक्तान्ब्राह्मणान् स्तौति होता त्वदनुवाकेन सहस्रशीर्षेति। अस्यार्थः। नियुक्तान् यूपे ब्राह्मण
मिश्रादिपञ्चदश सहस्रशीर्षेत्यनुवाकेन षोडशर्चेन ब्रह्मा स्तौति। होतृवदिति। अथ [illegible]
कारेण सर्वः। तथा। अथ यातव्यं ते। समारोप्याग्नी आत्मन्यग्नी सूर्यमुपस्थायानपेक्ष्यः सम्भृत इममनुवाकेनानपेक्षमा
णोऽरण्यं गच्छेत् [illegible] ग्रामवासिवत्सन्नरण्यामिति। अथ यातवी उदवसानीयेष्टिस्तदन्ते अयं तयेनिरिस
ग्नी आत्मनि समारोप्य तदृष्माणमास्य प्रवेन्य अद्यः स [illegible] अनुवाके न सूर्यमुपस्थाय पश्चा
दपत्र्यपन्नमेगत्वा ग्रामं प्रति नागच्छेत्। वानप्रस्थो नवेदित्यर्थः। यद्वा। ग्रामे वस्तुमिच्छन्नरण्यारग्नी। आ
रोप्यार्केपि स्थानानेतरं ग्रामे गत्वाऽरणीन्याममग्नी अवरोह्य पुत्रान्कुर्यादिति सूत्रार्थः॥ अथ मंत्रार्थः। सह
स्रशीर्षा पुरुषः। नारायणपुरुषदृष्टा जगद्बीजपुरुषदेवत्याः षोडशर्चश्च। पंचदशानुष्टुभः षोडशी त्रिष्टुप्।
ब्राह्मणब्राह्मणभिन्या याति युक्ताः प्राणिनः पुरुषमेधस्य [illegible] दस्य परमात्मनो वयवन्तां प
[illegible] पुरुषात्सृष्टये। पुरुषः पूर्णत्वेन अवक्तः सहस्रादिविलक्षण [illegible]
र्थाध्यायां तेये प्रोक्ताः [illegible] पुरुषः सर्वासु पुरिषु [illegible] किंच नानाहृतं नेबं न
विशेषः। पुरः पुरुष आविशादिति स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयो नैनेन किंच नानावृतं नैनेन कि
वसन्नासंवृतमिति श्रुतेः परमपुरुषः। इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धे
रात्मा महान्परः। महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति
श्रुतिषु प्रसिद्धः सर्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो विराडाख्यो योस्ति। कीदृशः। सहस्रशीर्षा। सहस्र
शब्दो बहुसंख्यावाची। सहस्रसंख्यावाचित्वे सहस्रा [illegible] विरोधः स्यात्। तावच्छिरस्त्वे नेत्रसहस्रद्वय
मावं [illegible] सहस्रसंख्यानि शीर्षाणि [illegible] शीर्षाणि [illegible]
शिरो ग्रहणं सर्वावयवोपलक्षणं। सर्वावयवानां मध्ये शिरसः प्राधान्यात् अथ मंत्रोपादाने अनेन लोके [illegible]

१९८१॥

१९८॥

४०

त्वप्यकथनेनन्यग्भावार्थो द्यावयनास्तत्स्वरूपरूताएवेतिगम्यते। परास्यशक्तिर्विविधैवश्रूयते स्वाभाविकी ज्ञानबलक्रि
याचेतिकश्रुतेः। सर्वतः पाणिपादंतंसर्वतोक्षिशिरोमुखं। सर्वतः श्रुतिमल्लोके सर्वमावृत्यतिष्ठतीतिस्मृतेश्च।
यद्वा यानि सर्वप्राणिनांशिरांसि तानि सर्वाणि ब्रह्मांडांतःपातित्वात्तस्यैवेति सहस्रशीर्षत्वं। एवमग्रेपि ज्ञेयं। पु
नः कीदृशः सहस्राक्षः। सहस्रमनंतान्यक्षीणि यस्य सः। अक्षिग्रहणं सर्वज्ञानेंद्रियोपलक्षकं। सहस्रपात्।
सहस्रंपादायस्य सतथा। संख्यासुपूर्वस्येति पादस्यांत्यलोपः। पादग्रहणं कर्मेंद्रियोपलक्षकं। स पुरुषो भूमिं
ब्रह्मांडगोलकरूपां सर्वतः तिर्यगूर्ध्वमधश्च स्पृत्वा व्याप्य दशांगुलमत्यतिष्ठत्। दशेत्युपलक्षणं ब्रह्मांडा
द्बहिरपि सप्तावरणानि सर्वतो व्याप्यावस्थित इति भावः। स्पृणोति व्याप्तिकर्मा। यद्वा भूमिशब्दो भूतोपलक्षकः
पंचमहाभूतानि व्याप्य दशांगुलपरिमितं देशमत्यतिष्ठत्। अतिक्रम्यावस्थितः। अनेनापरिच्छिन्नत्वमु
क्तं भवति। यद्वा सर्वप्राणिषु नाभेः सकाशाद्दशांगुलमतिक्रम्य हृदि स्थितः। नाभितद्दतिकुतोवगम्यते इति चे
नृ उत्थं। कतम आत्मेत्युपक्रम्य योयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुष इति श्रुतेः। प्रादेशमात्रं पुरुषं
वसंतमिति स्मृतेश्च। तत्र जीवात्मनो हृदयमवस्थानं कर्मफलभोगाय। अंतर्यामिणो नियमनाय। तदुक्तं द्वासु
पर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योभिचाकशीतीति ऋग्वेदे। सएव
पुरुषोत्र देवता। इमेवैलोकाः पूरयमेव पुरुषो योयं पवते सोस्यां पुरिशेते तस्मात्पुरुष इति श्रुतेः अंतरात्मा। तद्दक्त्रैव
रुच्यं। पृथग्गौरवभयादुपरम्यते। १। पुरुष एव। यत् इदं वर्तमानं जगत् तत्सर्वं पुरुष एव। तथा। यच्च भूतमतीतं ज
गत्। यच्च भाव्यं भविष्यं जगत्। तदपि पुरुष एव। यथास्मिन्कल्पे वर्तमानाः प्राणिनः पुरुषदेहास्तान्निमयाः स्त
थैवातीतागामिनोरपि कल्पयोर्द्रष्टव्यमिति भावः। उत अपि च। अमृतत्वस्य देवत्वस्य मुक्तत्वस्य वा ईशानः स्वा
मी सपुरुषो यत् यस्मात्। अन्नेन प्राणिनां भोग्येनान्नेन फलेन निमित्तेन तेनातिरोहति। स्वकीयां कारण

६

॥१८२॥

वस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां मत्स्यकूर्मादिरूपेण प्राप्नोति न वस्तुतः। तस्मात्पुरुषस्य देवत्वादे
रीशान इति भावः। यद्वा पुरुषश्चेत्सर्वं तर्हि तादात्म्येन परिणामी स्यादित्यत आशंक्याह। अमृतत्वस्येशान इति।
देवत्वस्य मुक्तेश्चेशानः स्वामी। यो ह्यन्यस्य मोक्षदो नासौ संसारिधर्मेत्यर्थः। किंच यदन्नेनाजायते अन्नेन कर्
मणा अतिरोहति प्ररोहति उत्पद्यते उत्पत्तिरवस्थाननाशयोरुपलक्षका। कर्मणोत्पद्यते तिष्ठति नश्यति यस्
त्तस्य चेशानः। कर्मणा जायते जंतुः कर्मणैव प्रलीयत इत्यादिस्मृतेः। ब्रह्मादिस्तंबपर्यंतो भूतग्रामः कर्म
तस्यान्नेनावस्थितेः। अतः प्रधानाद्धि देवा उपजीवंतीति श्रुतेः। ब्रह्मादिजगतो नियंता तस्य मोक्षप्रदश्च भग
वानेव नान्य इति भावः॥ श्रीवेदव्यासोपि। अमृतस्यात्मयस्येशो मर्त्यमन्नो यदत्यगादिति भागवते वेद स
वामुमंत्रं व्याचष्टे। अमृतस्य मरणादिरहितस्यात्मयस्य मोक्षस्येशाद इत्यर्थः॥२॥ एतावानस्य। पूर्वमचि
रमात्मलक्षणमुक्तं इदानीमुपसंहरति। अतीतानागतवर्त्तमानकालसंबंधं जगद्यावदस्ति एतावा
न्सर्वोपि अस्य परमपुरुषस्य महिमा। विभूतिः। स्वकीयसामर्थ्यविशेष इत्यर्थः। अतोस्मान्महिम्नः स
काशात् ज्यायान् जगतोधिकतरः। महत्तरः। न चास्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृ
श्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति श्वेताश्वतरश्रुतेः। यद्वा एतावान्य
र्वोक्तोऽतीतानागतवर्त्तमानकालसंबद्धो लोकसमुदायः अस्य परमपुरुषस्य महिमा माहात्म्यं प्रभावः
ऐश्वर्यं शक्तिरिति पर्यायः। अतोऽस्मान्महिम्नः ज्यायान् अधिकतरोपि पुरुषो ज्ञातव्यः। एतदुभयं स्पष्टीक्रिय
ते। अस्य पुरुषस्य विश्वा। सर्वाणि भूतानि पर्वकालानि प्राणिजातानि पादश्चतुर्थांशः। अस्य पुरुषस्या
वशिष्टं त्रिपात् पादत्रयरूपं स्वरूपं अमृतं सत्यज्ञानानंदात्मकं दिवि तिष्ठति। यद्यपि सत्यं ज्ञानमनंतं ब्र

॥१८२॥

४२

स्नेसाम्नातस्यपरब्रह्मणइयत्तायाअनावासादचतुष्टुत्वंनिरूपयितुमशक्यंतथापिजगदिदंब्रह्मस्वरूपापेक्ष
याल्पमितिविवक्षितत्वात्सादत्वोपन्यासः॥त्रिपात्स्वरूपमुक्तंअस्यभगवतः।महिमैषततोब्रह्मणःपुरुषस्यस्वरू
पः।पादोस्यसर्वभूतानिपुंसःस्थितिविदोविदुः।अमृतंक्षेममभयंत्रिमूर्ध्न्योऽस्या।धायिमूर्द्धसु।पादास्त्र
याबहिस्त्वासन्नप्रजानांयआश्रमाइति।अस्यार्थः।त्रिमूर्द्धेहरेस्त्रिषुमूर्द्धसुअमृतमनंतासनंक्षेममवैकुंठ
स्थानंअभयंस्वतदीयाऽरव्यमितिपुरत्रयमथोपिहिरण्यायत्ततत्रादिविशिष्टंतीत्यर्थः।ब्रह्मविष्णुमहेश्वरा
त्मनात्रिपात्स्वरूपस्यलोकवैकुंठकैलासरूपेदिविनिष्ठुतीतिकेचिद्वदंति।इतिहासपुराणाभ्यांवेदार्थमु
पबृंहयेत्।बिभेत्यल्पश्रुताद्वेदोमामयंप्रतरिष्यतीतिपुराणवचनादेषएवार्थःसाधुः॥३॥त्रिपादू
र्ध्वः।योयंत्रिपात्पुरुषःसंसारस्पर्शरहितब्रह्मस्वरूपःअयंऊर्ध्वउदैत्।अस्मादज्ञानकार्यात्संसाराद्ब
हिर्भूतोऽत्रत्यैर्गुणदोषैरस्पृष्टःउत्कर्षेणस्थितवान्।तस्यास्यपादोंऽशःजगद्रूपःइहअज्ञानाद्यविद्याकाम
कर्मनिबद्धःसंसारेपुनरभवत्।सौवात्मापुनःपुनःसृष्टिसंहाराभ्यामावर्ततइत्यर्थः।जगतोस्यपरमात्मांश
त्वंभगवताप्युक्तंगीतायां।विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदिति।ततस्तस्मात्कारणाद्विष्वङ्
विष्वक्सर्वत्रांचतीतिविष्वङ्देवतिर्यगादिरूपेणविविधःसन्व्यक्रामत्व्याप्तवान्पुरुषः।किंकृत्वा।साश
नानशनेअभिलक्ष्य।अशनेनसहवर्तमानंसाशनं।अशनादिव्यवहारोपेतंचेतनंप्राणिजातं।अनशनं
तद्रहितमचेतनंगिरिनद्यादिकं।तेउभेअभिलक्ष्यस्वयमेवविविधोभूत्वाव्याप्तवानित्यर्थः।तत्सृष्ट्वात
देवानुप्राविशदितिश्रुतेः।यद्वासाशनानशनेविद्याविद्येअभिलक्ष्य।अनशनानविद्यास्मृतिः।हविदानि

घ तावात्। साक्षानाऽविद्यास्थितिः ह्यविषः सद्भावात्। देवमनुष्यसंज्ञे स्थले ज्ञानकर्मरूपे अखिलस्थले तुर्थः। अ
हिम्रो नागवते। अंतस्त्रिलोक्याः स्वपरोगरूपमेधे सूर्यहृत्तः। स्थले विचक्रमे विष्वक् साशनानशने अभि इति
संहारकाले सर्वं जगत् संहृत्य पुरुषः स त्रिपादूर्ध्व उदैत् उदगवत्। स्थितिकाले साशनानशने अखिलजगद्विष्वङ्
व्यक्रामत्। स्थितिहेतुभूतैर्नानावतारैः स्थितिविरोधिनः संहरन् सत्सु सुमार्गं प्रदर्शयन् सर्वं जगदाक्रांत
वानिति भावः॥४॥ ततो विराट्। विष्वङ् व्यक्रामदिति यदुक्तं तदेव प्रपंच्यते। ततः तस्मादादिपुरुषात् विराट्
ब्रह्मांडलक्षणो देहोऽजायत जातः। विविधानि राजंते वस्तून्यत्रेति स विराट्। विराजो अधि विराड्देहस्योपरि तं
मेव देहमधिकरणं कृत्वा पुरुषस्तद्देहाभिमानी एक एव पुमानजायत। सर्ववेदांतवेद्यः परमात्मा स्वमायया विराड्
देहं ब्रह्मांडरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्मांडाभिमानी देवतात्मा जीवोऽभवदित्यर्थः। एतच्चाथर्वण
तापनीये स्पष्टमुक्तं। स वा एष भूतानींद्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा तत्र प्रविश्य मूढ इव विहरतीति। किं
च। स जातो विराट् पुरुषोऽत्यरिच्यत। देवतिर्यङ्मनुष्यादिरूपेणातिरिक्तोऽभूत्। पश्चाद्देवादिसृष्टेरूर्ध्वं भू
मिं ससर्जेति शेषः। अथो भूमिसृष्टेरनंतरं पूर्वं तेषां जीवानां पुरः शरीराणि ससर्ज। पूर्यंते सप्तभि
र्धातुभिरिति पुरः॥५॥ तस्माद्यज्ञात्सर्वहुतः। सर्वं हूयते यस्मिन्स सर्वहुत् तस्मात् पुरुषमेधाख्यात् यज्ञात्। यद्वा ॥१८३॥
॥१८३॥ तस्माद्यज्ञात् तस्माद्विष्णोः यज्ञो वै विष्णुरिति श्रुतेः। पृषदाज्यं दधिमिश्रमाज्यं संभृतं संपन्नं। पशूंस्तां
श्चक्रे लक्षितं सर्वं प्राण्युपलक्षितमिति भावः। तथा स पुरुषो वायव्यान् वायुदेवताकान् तानारण्यान्ग्राम्यांश्चक्रे
उत्पादितवान्। अंतरिक्षदेवत्याः खलु वै पशव इति श्रुतेः। तस्य वायुर्देवता लोको संभृतानां वायुदेवतात्वं। तं ४२

के। ये चारण्याः अरण्ये तत्र वाः हरिणादयः। ये च ग्राम्या ग्रामे भवाः गवाश्वादयः तांश्च चक्रे इति पूर्वेणान्वयः॥८॥ तस्माद्य
ज्ञात्। सर्वहुतः तस्मात् यज्ञात् ऋचः सामानि च जज्ञिरे उत्पन्नानि। छंदांसि गायत्र्यादीनि जज्ञिरे। तस्मात् यज्ञात् यजु
रप्यजायत। ऋग्यजुः साम छंदांसि विना यैः ऋचः सामानीति कर्तव्यपदे ...रः॥९॥ तस्मादश्वा अजायंत। तस्माद्
यज्ञात् अश्वा अजायंत उत्पन्नाः। तथा॥ × ग्रामि सिध्यंतीति यज्ञसामग्री तस्मादुत्पन्नेत्यर्थः। तदीदृशसामर्थ्येन तेषामु
त्पत्तिरिति सूचनाय × ३ ये केच अश्वातिरिक्ता गर्दभाश्वतराश्च उभये ऊर्ध्वाधोभागयोर्दंतयुक्तास्ते उभयद
न्तः ... पदन्तीति ... तस्य ... उर्ध्वाधो भागयोर्दंतयुक्ता ये संति ते अप्यजायंत। ह ... तस्मात् य
ज्ञात् गावश्च जज्ञिरे। किंच। तस्माद्यज्ञात् अजावय अजाश्च अवयश्च जाताः। नहि ... विना यज्ञः सिध्यति॥१०॥
तं यज्ञं यज्ञसाधनेऽपि यज्ञत्वाद् देवाः यज्ञ ... तं पुरुषं पशुत्वभावनया यूपे बद्धं बर्हिषि मानसे यज्ञे प्रो
क्षन् प्रोक्षितवंतः प्रोक्षणादिभिः संस्कारैः संस्कृतवंतः। कं पुरुषं। अग्रतः सर्वसृष्टेः पूर्वं जातं। पुरुषत्वेन ...
न्न। एतच्च प्रागेवोक्तं। ततो विराळजायत विराजो अधिपूरुष इति। तेन पुरुषरूपेण पशुना देवाः ... यदा पुरु
षेण ... अयजंत। मानसयागं निष्पादितवंतः। के ते देवा इत्यत्राह। ये साध्याः सृष्टिसाधनयोग्याः प्रजापतिप्रभृतयः ...
... तदनुकूला ऋषयो मंत्रद्रष्टारः। ते सर्वेऽप्ययजंत॥११॥ यत्पुरुषं। प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिनां
प्रश्न उच्यते। प्रजापतेः प्राणरूपा देवाः। यत् यदा पुरुषं व्यदधुः संकल्पेनोत्पादितवन्तः। तदा कतिधा कतिभिः
प्रकारैः अकल्पयन्। विविधं कल्पितवंतः। अस्य पुरुषस्य मुखं किमासीत्। किं बाहू ऊरू च आस्तां। कौ
पादावुच्येते। पादावपि किमास्तामित्यर्थः। किमित्यर्थः। कौ बाहू कावूरू कौ पादाविति स्पर्धः॥१२॥ पूर्वप्रश्नानामुत्तरमा
ह॥ ब्राह्मणोस्येति। ब्राह्मणः ब्राह्मणत्वजातिविशिष्टः पुरुषोऽस्य प्रजापतेर्मुखमासीत्। मुखादुत्पन्न इत्यर्थः।
राजन्यः क्षत्रियत्वजातिविशिष्टः बाहूकृतः। बाहुभ्यामुत्पादितः। तत् तदा अस्य प्रजापतेः यत् यौ ऊरू। तत् तद्रूपो

वैश्यः संपन्नः। वैश्य ऊरुभ्यामुत्पादितः। तथा अस्य प्रजापतेः पद्भ्यां शूद्रः शूद्रत्वजातिमान्पुरुषो ऽजायत। उत्पन्नः ॥११॥
यथा दध्याज्यादिद्रव्याणि गवादयः पशवः ऋग्वेदादिवेदाः ब्राह्मणादयो मनुष्याश्च तस्मादुत्पन्नाः। एवं चन्द्रादयो दे-
वा अपि तस्मादेवोत्पन्ना इत्याह। प्रजापतेर्मनसः सकाशात् चंद्रमाः जातः। चक्षोश्च चक्षुषः सकाशात् सूर्यो ऽजायत। श्रोत्रा-
द्वायुः ... तस्मात्तदस्य। वायुः प्राणश्च श्रोत्राच्च कर्णादजायत। मुखादग्निरजायत ॥१२॥ यथा प्रजापतेर्मनःप्रभृति-
भ्यश्चंद्रादीनकल्पयन् तथा अंतरिक्षादीन् लोकानकल्पयन्नित्याह। नाभ्या आसीदिति। प्रजापतेर्नाभेः सकाशादंतरिक्षमासीत्।
शीर्ष्णः शिरसः द्यौर्द्युलोकः समवर्तत। तथा। पद्भ्यां पादाभ्यां भूमिः समवर्तत। श्रोत्राद्दिशः समवर्तत। तथा अन्ये
लोकान् विविधान् लोकान् भूरादीन् प्रजापतेरवयवा अकल्पयन्। यदा पुराणादौ तदेवं ... ॥१३॥ यत्पुरुषेणेति। य-
दा पूर्वोक्तक्रमेणैव देवशरीरेषूत्पन्नेषु सत्सु देवा उत्तरसृष्टिसिद्ध्यर्थं बाह्यद्रव्यस्यानुत्पन्नत्वेन पुरुषस्वरू-
पमेव मनसा हविष्ट्वेन संकल्प्य तेन पुरुषरूपेण पुरुषाख्येन हविषा मानसं यज्ञमतन्वत। अन्वतिष्ठत। तदानीमस्य
यज्ञस्य वसंतः ऋतुरेवाज्यमासीत्। आज्यत्वेन संकल्पितवंतः। एवं ग्रीष्म इध्मः आसीत्। तथा शरदृतुः हविः आसी-
त्। शरदृतुमेव पुरोडाशादिहविष्ट्वेन संकल्पितवंत इत्यर्थः। वसंतादौ आज्यादीनां प्रभूतत्वात्तदुक्तिः। पूर्वं पुरुष-
स्य हविः सामान्यरूपत्वेन संकल्पः। अनंतरं वसंतादीनामाज्यादिविशेषरूपत्वेन संकल्प इति द्रष्टव्यं॥ अत्रार्थे
काले यत्पुरुषेण यस्या अनंतरं तं यज्ञमिष्टवंत। ततस्माच्च ... क्रमेण ततः सप्तास्यासन्निति
मोपि ... पात्क्रमादर्थक्रमस्य बलीयस्त्वादग्निहोत्रं ... ॥१४॥ सप्तास्यासन्निति। दे-
वा यद्देवाः प्रजापतिप्राणेन्द्रियरूपाः यज्ञं तन्वानाः मानसं यज्ञं कुर्वाणाः पुरुषं पशुमबध्नन्। विराट्पुरुषमे-
व पशुत्वेन भावितवंतः। एतदेवाभिप्रेत्य पूर्वत्र पुरुषेण हविषेत्युक्तं। ... सांकल्पिकस्य यज्ञस्य सप्त
छन्दांसि परिधय आसन्। ऐष्टिकस्याहवनीयस्य त्रयः परिधयः। औत्तरवेदिकास्त्रयः। आदित्यः
सप्तमः परिधिप्रतिनिधिरूपः। तथा चाम्नातं ... परिधयो ... तत्स्वरूपमेव पुरस्ताद्रक्षांसि

स ॥१८४॥ ॥१८४॥ २ ४४

कुरोतीति। ततस्ते आदित्यसंहिताः सप्तपरिधयोऽत्र सप्तछंदोरूपाः। त्रिःसप्त। त्रिगुणाः सप्त एकविंशति संख्याकाः स
मिधः कृताः। द्वादशमासाः पंचर्तवस्त्रय इमे लोका असावादित्य एकविंशति एकविंशतिदार्वात्मके भूत्वा कल्
पिताः। यद्वा सप्त समुद्राः क्षारोदाद्याः ऽस्य यज्ञस्य परिधय आसन्। एतत्तरव हियागा भवति। कर्मसूत्रा
अतः समुद्राः परिधयः सन्तीति युक्तं। त्रिःसप्त। त्रिगुणाः सप्त छंदोवर्गाः समिधः कृताः। गायत्र्यादीनि सप्त।
अतिजगत्यादीनि सप्त। कृत्यादीनि सप्तैव एकविंशतिस्त्वं ॥१५॥ यज्ञेन यज्ञं ॥ पूर्वं प्रपंचेनोक्तमर्थं संक्षिप्यात्र
दर्शयति। प्रजापतिप्राणरूपा देवाः यज्ञेन यथोक्तेन मानसेन संकल्पयज्ञेन यज्ञं परमात्मानं विष्णुं अयजंत पू
जितवंतः। तस्माद्यजनात्तानि प्रसिद्धानि देवरूपाणि धर्माणि जगद्रूपविकाराणां धारकाणि प्रथमानि मुख्यानि
कृतान्यासन्। एतावता सृष्टिप्रतिपादकसूक्तभागार्थ उक्तः। अथोपासनतत्फलानुवादकभागार्थः संगृह्यो
च्यते। यत्र यस्मिन्विराट्प्राप्तिरूपे नाके पूर्वे साध्याः पुरातनाः विराडुपाधिसाधका देवाः संतितिष्ठंति तं ना
कं विराट्प्राप्तिरूपं स्वर्गं ते महिमानस्तदुपासका महात्मानः सचंत सचंते समवयंति प्राप्नुवंति। अत्राथ
आर्थः। अनेन सृष्टेः प्रवाहनित्यतां दर्शयति। उक्तं हि। सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयदिति। एष
एवार्थो ब्राह्मणे विहितः। यान्येतान्सप्त पुरुषानेकं पुरुषमकुर्वन्स प्रजापतिरभवत्स प्रजा असृजत स प्रजाः
सृष्ट्वा ऊर्ध्व उदक्रामत्स एतं लोकमगच्छद्यत्रैष एतत्तपति नान्य ... नेतर्ह्यन्य आसीत्तस्माद्यज्ञियश्रास्तं देवा यज्ञेन
व यज्ञमयजंत। तस्मादेतदृषिणाभ्यनूक्तं यज्ञेन यज्ञमयजंत देवा इति यज्ञेन हि तं यज्ञमयजंत देवास्ता
नि धर्माणि प्रथमान्यासन्निति ते ह नाकं महिमानः सचंतेति स्वर्गो वै लोको ना
कः देवा महिमानस्ते देवाः स्वर्गं लोकं सचंत ये तं यज्ञं यज्ञेनायजंत यत्र पूर्वे साध्याः संतीति देवा इति प्राणा वै सा

यादेवास्तरतमेमग्रएवंमसायपूर्णोतदेवकुर्वंत स्तउएवाप्येतर्हि स्ताचयंनीति ॥१६॥ ... श्रीकार्य
यणप्रज्ञायां विनियुक्तं ब्रह्मकैवल्यैकरूविधानेच ॥ निसमूलोमुपक्रम्योक्तं ॥ सांगदेवस्य विन्यासं षोडशोपचारकाः
होमाः पुष्पांजलिर्जपंषडावृत्तिरिमेक्रमात् । वक्ष्ये पुरुषसूक्तस्य विधानं त्वर्चनं प्रति । अग्निकार्यं जपाविधिस्तो
त्रेचैवैतदात्मकं । कुर्याद्यथोक्तविधिना प्राङ्मुखः शुद्धमानसः । षोडशर्चंत्वेतत्सूक्तं ऋग्जं पुरुषदेवतं । अस्य देवात्म
कस्यास्य ऋषिर्नारायणः परः । पुरुषो यो जगद्बीजं वेदसारमयोच्युतः । देवतास्त्रिष्टुबंस्यस्य छंदो ह्यनुष्टुप्च तुष्ट
दी । पुरुषएवेदमिति पदं जंत्रैलोक्यविश्रुतं । एतावानस्य महिमाइति शक्तिः सनातनी । प्रथमां विन्यसेद्वामे द्वि
तीयां दक्षिणकरे । तृतीयां वामपादे तु चतुर्थीं दक्षिणे तथा । पंचमीं वामजानौ तु षष्ठीं वै दक्षिणे तथा । सप्तमीं
वामकट्यां तु अष्टमीं दक्षिणे तथा । नवमीं नाभिमध्ये तु दशमीं हृदये तथा । एकादशीं स्कंधदेशे द्वादशीं वामबा
हुके । त्रयोदशीं दक्षिणे च आस्यदेशे चतुर्दशीं । अक्ष्णोः पंचदशीं चैव षोडशीं मूर्ध्नि विन्यसेत् । ब्राह्मणोस्येति
हृदयं चंद्रमेति शिरस्तथा । नाभ्या आसीदिति शिखा सप्तेति कवचं न्यसेत् । यज्ञेनेत्यस्त्रमुद्दिष्टमेवं पंचांगकल्
पं । कर्मणोऽहं हरेर्ध्यायेद्विनान्यासं वृतस्य च । तेनान्यथा न कस्यापि पूजा होम जपादिकं । चतुर्भिश्च चतुर्भिश्चके
त्रैः प्रतिमुखं यजेत् । वेदमूर्त्तिस्थितं सर्वं श्रोत्रजेरव्यविरावतः । ऋग्वेदास्याय जुः कुक्षिः सामच उरस्यथर्व हृत् । रुं
प्रथमवक्त्रस्याद्यजुःषु चैरमुच्यते । सामपश्चिमं मुखं ज्ञेयमथर्वादक्षिणंमुखं । अथवर्णनाम्न्यथवपुस्तावदन्यारव्या महा
त्मनः । हिरण्मयं वपुस्तस्य स्मश्रुकेशौ हिरण्मयौ । पीतवस्त्रपरीधानं श्वेतवस्त्रोत्तरीयकं । हारकेयूरमुकुटकुंडलाद्य
भिराजितं । आयुधानि चतुर्वेदाः शाकाः लादिमयाः स्मृताः । ऋग्वेदो ... मात्रेया शंखश्च कौमोदकी काः । मुसलो
रिधनुः पात्रं बोधकलादिमयाः स्मृताः । ... रथांग दाच मुसलं खड्गं दक्षोपरि स्मरेत् । चक्राद्या

...र्द्धपात्रं श्वतथोत्तरके रस्मे रत।आद्यस्याचावाहनं स्यादासनं तु द्वितीयकं।पाद्यं तृतीयमाख्यातं चतुर्थं दद्याच्चार्घ्यमेव वै।
पुरुस्याः चमनीयं च स्थाने षष्ठमथ वाससी।सप्तम्याः यज्ञोपवीतं स्यादष्टम्यां तु पितामह।गंधं नवम्यां पुष्पं तु द-
शम्यै कादशकं धूपं दीपं च द्वादश्यां त्रयोदश्यां नैवेद्यं ... दक्षिणा।विस-
र्जनं तु षोडश्यां इति ... क्रमात्।आवाहनं ... षोडशोपचाराः क्रमात्।दद्यात्पुरुषसूक्तेन ...
पुष्पाण्यपि एव वा।अर्चितं तेन वै सर्वं त्रैलोक्यं सचराचरमिति॥ ॥प्रथमो नु॥ ॥प्रकृतमनुक्रियते॥ ना-
रायण॥ओं सहस्रशीर्षा पुरुष ... नारायण ... इति पुरुषसूक्तस्य ... अस्य ... षोडशर्चस्य नारा-
यण ऋषिः।अनुष्टुप् छंदः।त्रिष्टुप् ... आदित्यो देवता।अत्र पूर्वकल्पे पुरुषमेधयाजी ... प्र-
...पते।अस्य ... पृथिव्याः सकाशात् ... भूतपंचकात् ... रसः ...
तः पुरुषः।तथा विश्वकर्मणः यस्य तस्य विश्वकर्मणः कालात्मनः ... रसस्य रसात् ... अग्रे प्रथम-
समवर्तत समभवत्।भूतपंचकस्य कालात्मनः ईश्वरस्य च सर्वं प्रतिकारणत्वात् पुरुषमेधयाजिनो लिंगश-
रीरमेव च भूतानि तु तानि कालात्मानः तुष्टः।ततस्तेभ्यः तेभ्यः कश्चिद्रसविशेषः फलरूपं ...
...इत्यर्थः।तस्य रसस्य रूपं विदधत् धारयं स्त्वष्टा आदित्य एति।प्रत्यहमुदयं करोति।अग्रे प्रथमं मर्त्यस्य
मनुष्यस्य सतस्तस्य पुरुषमेधयाजिन आजानं देवत्वं मुख्यं देवत्वं सूर्यरूपेणास्तीति विशेषः।द्विविधा देवाः
कर्मदेवा आजानदेवाश्चेति।उत्कृष्टेन कर्मणा देवत्वं प्राप्तास्ते कर्मदेवाः।सृष्ट्यादावुत्पन्ना आजानदेवास्ते
कर्मदेवेभ्यः श्रेष्ठाः।अधि ये शतं कर्मदेवानामानंदाः स एक आजानदेवानामानंद इति श्रुतेः ... यादय
आजानदेवाः॥१॥वेदाहमेतं महान्तं सवितृ ... पुरुषं ... सूर्यमंडलस्थं अहं वेद जानामीति मंत्र ...

वचनं। सन्दो नरनारायणः। कीदृशं। आदित्यवर्णं आदित्यस्येव वर्णो यस्य तं। उपमालंकारः भावात्‌ सेवोपमं सागरः सागर इव उपमा इतिवत्। तथा तमसः परस्तात्‌ दूरतरं। तमोरहितमित्यर्थः। अत्र तमः शब्देनाविद्योच्यते। त्रैगुण्यं
च णद्वयेनादित्यस्यः परमात्मोच्यते। ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सरसिजासनसंनिवि
ष्टः। केयूरवान्मकरकुंडलवान्किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः इति स्मृतेः। यो सावादित्ये पुरुषः सो
सावहमिति श्रुतेश्च। तेनश्च। महान्तमपरिच्छिन्नं आदित्यवर्णं स्वप्रकाशं तमसः परस्तात्‌ स्थितं। अविद्या
तएतं पुरुषं पुरि शयं सारूप्यं अहं वेद अपरोक्षीकृतवानस्मि यतः सोऽस्मीति भावः। एवं स्वानुभूतमन्य
त्प्रदर्शयति। तमेव विदित्वा परोक्षीकृत्य संसारमत्येति अतिक्रामति। मुक्तो भवति। एवकारनिव
र्त्यमर्थमाह। नेति। अयनाय गमनाय स्वरूपप्राप्तये अन्यः पन्थाः इतोऽतिरिक्तो मार्गो न विद्यते उपायो नास्ती
त्यर्थः॥२॥ प्रजापतिश्चरति। यः सर्वात्मा प्रजापतिः अंतः हृदि स्थितः सन्‌ गर्भे चरति शरीरमध्ये वर्तमान इ
त्यर्थः। प्रजापतिश्चरति। यः सर्वात्मा ... जायमानः जन्मादिरहितो नित्यः सन्‌ बहुधा विजायते बहुप्रकारेणावतरति। अ
येण चरतीति। यच्चाजायमानः ... स्य ... इति ... श्रुतेः।
नेनांतर्यामित्वं बहिः कालरूपत्वं च तस्योक्तं भवति। अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः इति स्मृतेः।
धीराः धीमंतः। रामत्वर्थीयः। ब्रह्मज्ञानिनः तस्य प्रजापतेर्योनिं स्थानं स्वरूपं च परिपश्यंति साक्षात्कुर्वंति। ॥१९८६॥
